# A DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS IN THE CURATOR'S OFFICE LIBRARY TRIVANDRUM.

EDITED BY

Vaidyasastranipuna L. A. Ravi Varma,
Honorary Director, Oriental Manuscripts Department,
University of Travancore.

Published under the authority
of the Government of
H. H. THE MAHARAJAH OF TRAVANCORE.

## VOL. VII.

Stuti, Nīti, Chandas, Alaṅkāra, Saṅgītaśāstra
and Kāmaśāstra.

PRINTED AT THE
V. V. PRESS BRANCH, TRIVANDRUM.

1940

( All Rights Reserved )

# ABBREVIATIONS.

| | |
|---|---|
| CC. | Catalogus Catalogorum |
| CO. | Curator's Office, Trivandrum |
| COL. | Curator's Office Library, Trivandrum. |
| DCSMMPL | Descriptive Catalogue of Sanskrit Manuscripts, H H The Mahārājāh's Palace Library, Trivandrum |
| GNP | Gujarati News Press |
| NSPB | Nirnayasāgara Press, Bombay |
| SMMS | Śrī Mūlam Malayālam Series, Trivandrum |
| TSS | Trivandrum Sanskrit Series. |

# PREFACE

This is the seventh volume of the Descriptive Catalogue of this Library It embodies descriptive notices of manuscripts embracing a wide range of subjects as Stuti, Nīti, Chandas, Alankāra, Sangītaśāstra, and Kāmaśāstra These manuscripts are remarkable not only for variations in reading occurring *passim* but also for the inclusion of rare and valuable commentaries shedding considerable light on many obscure passages Many of the codices contain unpublished works, some have considerable and important additional matter as against published books extant of the same works, some are rare and ancient works of merit

In the preparation of this Catalogue the principle of epitomising details both historic and thematic has been kept in view in order to stimulate interest in oriental research. The significance of the Mss. from a palæographic point of view has also been alluded to where deemed necessary Among the Mss. herein catalogued, certain works as Tattvasudhā-a commentary on the Dakṣiṇāmūrtistotra, Laghustutivyākhyā by Parameśvarācārya, Śoṇācalastotra embodying nearly 1000 verses; Jayamangalā, Nayacandrikā and Pratipadapañcikā—commentaries on the Koutalīyārthaśāstra, Chandoviciti, Vṛttaprakāśikā; Alankāra-

Sarvasvasañjīvinī, Uttejinī, and Sāhityadīpikā—commentaries on the Kāvyaprakāśa, Kāvyādarśaṭīkā by Yāmuneya, Rūpadīpikā—a commentary on the Daśarūpaka, Nāṭyavedavivṛti, Kohalamata, and Ratnaratnapradīpikā deserve special mention by virtue of their rarity, antiquity and thought-provoking characteristics.

Trivandrum,
1—11—1115

L. A. Ravi Varmā,
Honorary Director.

# DETAILED CONTENTS

OF

# WORKS NOTICED IN VOL. VII.

## STUTI.


| General No | Catalogue No | Name of work | Page |
|---|---|---|---|
| 1680 | 1094 (a) | Aṣṭaśatanāmastotram | 2457 |
| 1681 | ,, (b) | Viṣṇusahasranāmastotram | 2459 |
| 1682 | ,, (c) | Śukasandeśavyākhyā | 2460 |
| 1683 | ,, (d) | Nyāyasāra | 2462 |
| 1684 | ,, (e) | Mantraprayoga | 2463 |
| 1685 | ,, (f) | Maraṇalakṣaṇam | 2464 |
| 1686 | ,, (g) | Śivārcāvidhi | 2465 |
| 1687 | ,, (h) | Nītisūtram | 2467 |
| 1688 | 1095 (a) | Ānandalaharīvyākhyā (Manoramā) | 2469 |
| 1689 | ,, (b) | Soundaryalaharīvyākhyā | 2470 |
| 1690 | 1096 (a) | Kṛṣṇakarṇāmṛtam | 2472 |
| 1691 | ,, (b) | Śivānandalaharī | 2474 |
| 1692 | ,, (c) | Mūkapañcāśikā | 2475 |
| 1693 | ,, (d) | Amarakośavyākhyānam | 2477 |
| 1694 | 1097 | Gurupavanapurādhīśastotram | 2478 |
| 1695 | 1098 | Caṇḍikāsaptati | 2480 |
| 1696 | 1099 | Caṇḍikāsaptativyākhyā | 2482 |
| 1697 | 1100 | Do. | 2484 |

| General No. | Catalogue No. | Name of work. | Page |
|---|---|---|---|
| 1698 | 1101 (a) | Dakṣiṇāmūrtistavavyākhyā | 2485 |
| 1699 | ,, (b) | Do. | 2487 |
| 1700 | 1102 (a) | Dakṣiṇāmūrtistotravyākhyā | 2488 |
| 1701 | ,, (b) | Mānasikasnānam | 2490 |
| 1702 | ,, (c) | Dakṣiṇāmūrtistotram | 2491 |
| 1703 | ,, (d) | Vedāntasāra | 2492 |
| 1704 | ,, (e) | Vedāntārthasārasaṅgraha-prakaraṇam | 2493 |
| 1705 | 1103 (a) | Dikcūrṇikā | 2495 |
| 1706 | ,, (b) | Brahmayāmaḷam | 2497 |
| 1707 | ,, (c) | Durgāpūjāvidhi | 2499 |
| 1708 | ,, (d) | Nārāyaṇastotram | 2500 |
| 1709 | 1104 | Nārāyaṇīyam with Malayāḷam commentary | 2502 |
| 1710 | 1105 | Prajñālaharīstotram | 2504 |
| 1711 | 1106 (a) | Bālāsahasranāmastotram | 2506 |
| 1712 | ,, (b) | Bālākhaḍgamālā | 2507 |
| 1713 | ,, (c) | Bālātripurasundarīhṛdayam | 2509 |
| 1714 | ,, (d) | Bālātripurasundarīkavacam | 2510 |
| 1715 | ,, (e) | Śrībālāstavarāja | 2512 |
| 1716 | ,, (f) | Bālātripurasundarīstavarāja | 2513 |
| 1717 | ,,(g) | Bālāṣṭottaram | 2514 |
| 1718 | ,, (h) | Bālāstotram | 2516 |
| 1719 | 1107 | Bhaktisaṃvardhanaśatakam | 2517 |
| 1720 | 1108 (a) | Bhāratasāvitrī | 2519 |
| 1721 | ,, (b) | Yudhiṣṭhiravijayavyākhyā | 2521 |
| 1722 | ,, (c) | Raghuvaṃśaprakāśikā | 2523 |
| 1723 | 1109 (a) | Māryaṣṭakam | 2527 |

| General No | Catalogue No. | Name of work. | Page |
|---|---|---|---|
| 1724 | 1109 (b) | Varamaṅgalāṣṭakam | 2528 |
| 1725 | ,, (c) | Nayasūtravākyam | 2530 |
| 1726 | ,, (d) | Mahābhāṣyapradīpavivaraṇam | 2531 |
| 1727 | 1110 | Mukundamālā with Malayāḷam commentary | 2533 |
| 1728 | 1111 | Rāmāyaṇasārastava | 2535 |
| 1729 | 1112 | Laghustutivyākhyā | 2536 |
| 1730 | 1113 | Laḷitāsahasranāmavyākhyā | 2539 |
| 1731 | 1114 | Viṣṇubhujaṅgaprayātastotram with commentary | 2542 |
| 1732 | 1115 | Viṣṇusahasranāmanirukti (Haribhaktikāmadhenu) | 2545 |
| 1733 | 1116 | Viṣṇusahasranāmabhāṣyam | 2547 |
| 1734 | 1117 (a) | Viṣṇusahasranāmalaghuvivaraṇam | 2549 |
| 1735 | ,, (b) | Kāmandakīyanītisāra | 2552 |
| 1736 | 1118 | Viṣṇusahasranāmalaghuvivaraṇam | 2553 |
| 1737 | 1119 | Do. | ,, |
| 1738 | 1120 | Śivapādādikeśastavavyākhyā | 2554 |
| 1739 | 1121 | Śivasahasranāmavyākhyā | 2556 |
| 1740 | 1122 | Śūlinīstotram | 2558 |
| 1741 | 1123 | Śaivakarṇāmṛtam | 2560 |
| 1742 | 1124 | Śoṇācalastotram | 2561 |
| 1743 | 1125 | Śrīrāmapañcaśatīstotram | 2564 |
| 1744 | 1126 (a) | Śrīrāmastavarāja | 2565 |
| 1745 | ,, (b) | Yudhiṣṭhiravijayavyākhyā | 2567 |
| 1746 | 1127 (a) | Sampatkarīsamvitstuticarcā | 2569 |

| General No. | Catalogue No. | | Name of work. | Page |
|---|---|---|---|---|
| 1747 | „ | (b) | Paryantapañcāśikā | 2571 |
| 1748 | „ | (c) | Kaivalyasiddhyudayavimarśa-stotram | 2572 |
| 1749 | „ | (d) | Śrīśāmbhavodayādarśa | 2575 |
| 1750 | „ | (e) | Āhnikam | 2577 |
| 1751 | „ | (f) | Śrīniṣkalakramacaryā | 2578 |
| 1752 | „ | (g) | Śāmbhavam | 2580 |
| 1753 | „ | (h) | Kāmakalāvilāsa | 2582 |
| 1754 | „ | (i) | Soubhāgyasudhodaya | 2584 |
| 1755 | „ | (j) | Dīkṣāpaddhati | 2585 |
| 1756 | „ | (k) | Tattvavimarśinī | 2588 |
| 1757 | „ | (l) | Śrīpañcārthakrama | 2591 |
| 1758 | „ | (m) | Śivabodhajñānadīpikā | 2592 |
| 1759 | 1128 | | Sampatkarīsamvitstotracar-coddyota | 2594 |
| 1760 | 1129 | (a) | Sārasvatastava | 2595 |
| 1761 | „ | (b) | Āścaryacūḍāmaṇi | 2597 |
| 1762 | „ | (c) | Dharmasamhitā | 2599 |
| 1763 | „ | (d) | Harilīlā | 2602 |
| 1764 | „ | (e) | Śivarātrimāhātmyam | 2603 |
| 1765 | 1130 | | Sūryaśatakam with commentary | 2606 |
| 1766 | 1131 | | Sūryaśatakaṭīkā | 2608 |
| 1767 | 1132 | | Sūryaśatakam with commentary | 2610 |
| 1768 | 1133 | | Do. Do. | 2611 |
| 1769 | 1134 | | Sūryaśatakavyākhyā | 2613 |
| 1770 | 1135 | | Soundaryalaharī with Malayāḷam commentary | 2614 |
| 1771 | 1136 | | Soundaryalaharī with Malayāḷam commentary | 2616 |

| General No. | Catalogue No. | Name of work. | Page |
|---|---|---|---|
| 1772 | 1137 | Soundaryalaharī with commentary | 2617 |
| 1773 | 1138 | Soundaryalaharīvyākhyā (Soubhāgyavardhanī) | 2619 |
| 1774 | 1139 | Do. (Sudhāvidyotinī) | 2622 |
| 1775 | 1140 (a) | Haristutivyākhyā | 2623 |
| 1776 | „ (b) | Mānasollāsa | 2625 |
| 1777 | „ (c) | Mānasollāsavṛttāndavilāsa | 2628 |
| 1778 | „ (d) | Mahāvākyavyākhyā | 2630 |
| 1779 | „ (e) | Hastāmalakastotram | 2631 |
| 1780 | „ (f) | Nyāsadīpikā | 2633 |
| 1781 | 1141 | Haristutivyākhyā | 2634 |
| 1782 | 1142 (a) | Hastāmalakastotram | 2635 |
| 1783 | „ (b) | Sanatsujātīyabhāṣyam | 2637 |
| 1784 | „ (c) | Samsāratarani | 2638 |
| 1785 | „ (d) | Taittirīyabhāṣyam | 2640 |


## NĪTI.


| General No. | Catalogue No. | Name of work. | Page |
|---|---|---|---|
| 1786 | 1143 (a) | Kāmandakīyam | 2641 |
| 1787 | „ (b) | Jayamaṅgalā, commentary on the Kāmandakīya | „ |
| 1788 | 1144 (a) | Kauṭalīyam (Arthaśāstram) | 2644 |
| 1789 | „ (b) | Cāṇakyasūtram | 2645 |
| 1790 | 1145 | Kauṭalīyārthaśāstravyākhyā (Jayamaṅgalā) | 2646 |
| 1791 | 1146 | Do, (Nayacandrikā) | 2649 |

| General No. | Catalogue No. | Name of work. | Page |
|---|---|---|---|
| 1792 | 1147 | Kauṭalīyārthaśāstravyākhyā (Pratipadapañcikā) | 2650 |
| 1793 | 1148 | Do. Bhāṣā | 2652 |
| 1794 | 1149 | Cākṣuṣīyārthaśāstram | 2654 |
| 1795 | 1150 (a) | Nītiśāstravyākhyānam | „ |
| 1796 | „ (b) | Āśoucanirṇayavyākhyānam | 2656 |
| 1797 | 1151 | Bārhaspatyasūtram | 2659 |
| 1798 | 1152 | Rājanītisamuccaya | 2660 |
| 1799 | 1153 | Laghucāṇakyam | 2662 |
| 1800 | 1154 | Vṛddhacāṇakyam | 2664 |


## CHANDAS.


| | | | |
|---|---|---|---|
| 1801 | 1155 | Chandoviciti (Jānāśrayī) | 2666 |
| 1802 | 1156 | Vṛttaprakāśikā | 2668 |
| 1803 | 1157 | Vṛttaratnākaravyākhyā | 2670 |
| 1804 | 1158 | Do. | 2674 |


## ALAṄKĀRA.


| | | | |
|---|---|---|---|
| 1805 | 1159 | Alaṅkārasarvasvasañjīvinī | 2675 |
| 1806 | 1160 (a) | Do. | 2677 |
| 1807 | „ (b) | Alaṅkārasarvasvam | 2680 |
| 1808 | 1161 | Alaṅkārasarvasvasañjīvinī | 2682 |
| 1809 | 1162 | Āsthānabhūṣaṇam | 2683 |
| 1810 | 1163 | Kāvyadarpaṇam | 2685 |
| 1811 | 1164 | Kāvyaprakāśaṭīkā (Prakāśikā) | 2686 |
| 1812 | 1165 | Do. Do. | 2688 |
| 1813 | 1166 (a) | Do. Do. | 2689 |

| General No. | Catalogue No. | Name of work. | Page |
|---|---|---|---|
| 1814 | 1166 (b) | Setubandhavyākhyā | 2691 |
| 1815 | „ (c) | Sāhityadarpaṇam | 2692 |
| 1816 | 1167 (a) | Kāvyaprakāśaṭīkā (Prakāśikā) | 2694 |
| 1817 | „ (b) | Do. Do. | 2696 |
| 1818 | 1168 | Kāvyaprakāśavyākhyā (Uttejinī) | 2698 |
| 1819 | 1169 | Do. Do. | 2704 |
| 1820 | 1170 | Do. Do. | 2706 |
| 1821 | 1171 | Do. (Sāhityadīpikā) | 2709 |
| 1822 | 1172 | Kāvyādarśa | 2711 |
| 1823 | 1173 | Kāvyādarśaṭīkā | 2713 |
| 1824 | 1174 | Kāvyādarśavyākhyā | 2715 |
| 1825 | 1175 (a) | Kavyādarśaṭīkā | „ |
| 1826 | „ (b) | Do. | 2717 |
| 1827 | 1176 | Kāvyādarśavyākhyā | „ |
| 1828 | 1177 | Kāvyālaṅkāra | 2719 |
| 1829 | 1178 | Do. | 2722 |
| 1830 | 1179 | Godavarmayaśobhūṣaṇam | 2723 |
| 1831 | 1180 | Do. | 2726 |
| 1832 | 1181 (a) | Candrāloka | „ |
| 1833 | „ (b) | Gaṇitasaṅgraha | 2728 |
| 1834 | „ (c) | Jyotiśśāstrasaṅgrahabhāṣā | 2729 |
| 1835 | „ (d) | Gaṇitasaṅgraha with Malayāḷam commentary | 2731 |
| 1836 | 1182 (a) | Daśarūpakaṭīkā | 2733 |
| 1837 | „ (b) | Daśarūpakaṭīkāvyākhyā | 2734 |
| 1838 | 1183 (a) | Do. | 2736 |
| 1839 | „ (b) | Nayaviveka | 2738 |

| General No. | Catalogue No. | Name of work. | Page |
|---|---|---|---|
| 1840 | 1184 (a) | Daśarūpakavyākhyā | 2739 |
| 1841 | ,, (b) | Daśarūpakaṭīkāvyākhyā | 2741 |
| 1842 | ,, (c) | Pūjāvidhi | 2743 |
| 1843 | ,, (d) | Nṛsimhastotram | 2744 |
| 1844 | 1185 (a) | Daśarūpakavyākhyā | 2746 |
| 1845 | ,, (b) | Daśarūpakāvalokanavyākhyā | 2748 |
| 1846 | 1186 | Daśarūpakaṭīkāvyākhyā | 2749 |
| 1847 | 1187 | Daśarūpakavyākhyā (Rūpadīpikā) | 2751 |
| 1848 | 1188 (a) | Do. Do. | 2753 |
| 1849 | ,, (b) | Māghavyākhyā | ,, |
| 1850 | 1189 | Daśarūpakavyākhyā (Rūpadīpikā) | 2755 |
| 1851 | 1190 | Dhvanyālokalocanam | 2756 |
| 1852 | 1191 | Do. | 2757 |
| 1853 | 1192 (a) | Do. | 2759 |
| 1854 | ,, (b) | Daśarūpakavyākhyā | 2762 |
| 1855 | ,, (c) | Bhāratavyākhyā | 2765 |
| 1856 | 1193 (a) | Dhvanyālokavyākhyā | 2766 |
| 1857 | ,, (b) | Do. | 2768 |
| 1858 | ,, (c) | Locanavyākhyā | 2770 |
| 1859 | 1194 | Dhvanyālokavyākhyā | 2771 |
| 1860 | 1195 | Dhvanyālokalocanavivṛti | 2774 |
| 1861 | 1196 (a) | Dhvanyālokalocanavyākhyānam | 2778 |
| 1862 | ,, (b) | Śṛṅgāraprakāśa | 2780 |
| 1863 | 1197 | Dhvanyālokalocanavyākhyā | 2781 |
| 1864 | 1198 (a) | Do. (Koumudī) | 2782 |
| 1865 | ,, (b) | Brahmasūtraśāṅkarabhāṣyavyākhyā | 2785 |

| General No. | Catalogue No. | Name of work. | Page |
|---|---|---|---|
| 1866 | 1199 | Nañjarājayaśobhūṣaṇam | 2787 |
| 1867 | 1200 | Bālarāmavarmayaśobhūṣaṇam | ,, |
| 1868 | 1201 | Bhāvaprakāśanam | 2788 |
| 1869 | 1202 | Rasaviveka | 2791 |
| 1870 | 1203 | Do. | 2793 |
| 1871 | 1204 | Rasārṇavasudhākaram | 2794 |
| 1872 | 1205 | Vāmanālaṅkārasūtravṛtti | ,, |
| 1873 | 1206 (a) | Vyaktiviveka | 2797 |
| 1874 | ,, (b) | Vyaktivivekavyākhyā | 2798 |
| 1875 | 1207 | Vyaktiviveka | ,, |
| 1876 | 1208 | Do. | 2799 |
| 1877 | 1209 | Śrīrāmabhūṣaṇavyākhyā | 2800 |
| 1878 | 1210 | Do. | 2801 |
| 1879 | 1211 | Sarasvatīkaṇṭhābharaṇavyākhyā | 2802 |
| 1880 | 1212 | Do. | 2803 |
| 1881 | 1213 (a) | Sāhityamīmāṃsā | 2804 |
| 1882 | ,, (b) | Kāṇādasiddhāntacandrikā-vyākhyā | 2805 |
| 1883 | ,, (c) | Vāsavīśāntanavam | 2807 |
| 1884 | 1214 | Sāhityamīmāmsā | 2809 |
| 1885 | 1215 (a) | Sāhityasāra | 2810 |
| 1886 | ,, (b) | Bhāvavivekodaya | 2811 |
| 1887 | 1216(a&b) | Nāṭyaveda with commentary | 2813 |
| 1888 | ,, (c) | Nāṭyavedavyākhyā | 2815 |
| 1889 | 1217 | Nāṭyavedavivṛti | 2817 |
| 1890 | 1218 | Do. | 2819 |
| 1891 | 1219 | Do. | 2821 |
| 1892 | 1220 | Hastalakṣaṇadīpikā | 2824 |


## SAṄGĪTAŚĀSTRAM.


| | | | |
|---|---|---|---|
| 1893 | 1221 | Kohalamatam | 2825 |

| General No | Catalogue No | Name of work | Page |
|---|---|---|---|
| 1894 | 1222 | Taranga | 2827 |
| 1895 | 1223 | Tālacandrikā | 2830 |
| 1896 | 1224 | Bṛhaddeśī | 2832 |
| 1897 | 1225 | Saṅgītagrantha | ,, |
| 1898 | 1226 | Saṅgītacūḍāmaṇi | 2835 |
| 1899 | 1227 | Do | 2838 |
| 1900 | 1228 | Saṅgītasudhā | 2842 |
| 1901 | 1229 | Do | 2844 |
| 1902 | 1230 | Saṅgītasudhākara | 2845 |
| 1903 | 1231 | Svaratālādilakṣaṇam | 2848 |

## KĀMAŚĀSTRAM

| General No | Catalogue No | Name of work | Page |
|---|---|---|---|
| 1904 | 1232 (a) | Anangarangam | 2848 |
| 1905 | ,, (b) | Goulīpatanaphalādi | 2851 |
| 1906 | 1233 | Anangaranga | 2852 |
| 1907 | 1234 (a) | Do. | 2853 |
| 1908 | ,, (b) | Kāmaprābhṛtam | 2855 |
| 1909 | 1235 (a) | Rakṣāphalasangraha | 2857 |
| 1910 | ,, (b) | Ratisāram | 2859 |
| 1911 | 1236 (a) | Ratimañjarī | 2861 |
| 1912 | ,, (b) | Paribhāṣenduśekhara | 2863 |
| 1913 | ,, (c) | Grahacāraphalam | 2865 |
| 1914 | ,, (d) | Do | 2867 |
| 1915 | 1237 | Ratiratnapradīpikā | 2869 |
| 1916 | 1238 | Ratirahasyadīpikā | 2871 |
| 1917 | 1239 | Ratimañjarī with commentary | 2873 |

॥ श्री ॥

# A DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS IN THE CURATOR'S OFFICE LIBRARY TRIVANDRUM

---

## स्तुतयः ।

### ॥ अष्टशतनामस्तोत्रम् ॥

No. 1094 A ASṬAŚATANĀMASTOTRA.

C. O L. No. 1815 A.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaf—1. 8 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—25.

Owner—Brahmadattan Nambūri Avl., Kūḍallūr.

Subject—An eulogy of Viṣṇu.

Beginning :

हरिः । धरण्युवाच—

श्रुतानि तावत् सर्वाणि शुभानि जगतः पते! ।
नामान्यष्टशतान्येव श्रोतुं कौतूहलं हि मे ॥

श्रीपराशर(?) उवाच—

अयमेवं पुरा प्रश्नः कृतश्चन्द्रार्धमौलिना ।
न तस्यापि मयाख्यातो रहस्यत्वाच्छुचिस्मिते! ॥

त्वं चासि मत्प्रिया चैव मद्भक्ता मत्परायणा ।
अतः सर्वा चास? बिशिष्टा इति मे मतिः ॥

असङ्ख्यानि विशालाक्षि! मम नामानि तेषु वै ।
सहस्राणि सुमुख्यानि तेष्वप्यष्टाशतानि च ॥

तेभ्यश्चान्यानि नामानि मत्प्रियाणि नहि प्रिये! ।
तस्मात् तान्येव वक्ष्यामि त्वय्यनुग्रहकाम्यया ॥

नारायणो नरः शौरिश्चक्रपाणिर्जनार्दनः ।
वासुदेवो जगद्योनिर्वामनो ज्ञानपञ्जरः ॥

End :

महापातकयुक्तोऽपि मां ध्यात्वा मधुसूदनम् ।
जपेदष्टशतं नाम्नां तस्मात् पापात् प्रमुच्यते ॥

अपुत्रो लभते पुत्रमधनो धनवान् भवेत् ।
अशान्तः शान्तिमाप्नोति मत्प्रसादान्न संशयः ॥

भूतवेताळसर्पाद्या यक्षगन्धर्वराक्षसाः ।
नश्यन्ति स्मृतिमात्रेण नाम्नामष्टशतस्य वै ॥

मद्भक्तैर्मद्गतप्राणैर्मयि सन्न्यस्तबुद्धिभिः ।
स्तवमेतद्विशेषेण पठितव्यं दिव... ॥

... ... ... ... ... ... ।
... ... ... .... .... .... ॥

Colophon :

Author :

Remarks—The praise of Viṣṇu is depicted here as being imparted by Parāśara to Goddess Earth.

---

## ।। विष्णुसहस्रनामस्तोत्रम् ।।

No. 1094 B. VIṢṆUSAHASRANĀMASTOTRAM.

C. O. L. No. 1815 B.

Substance—Palm leaf. Size—$15\frac{1}{3}'' \times 1\frac{3}{4}''$. Leaves—5. 8 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—125.

Owner—Same as No. 1094 A.

Subject—Same as No. 1094 A.

Author :

Remarks—The Ms. is devoid of its beginning. The work is available in print.

---

## ॥ शुकसन्देशव्याख्या ॥

No. 1094 C. ŚUKASANDEŚAVYĀKHYA.

C. O. L. No. 1815 C.

Substance—Palm leaf. Size—15½″ × 1¾″. Leaves—22. 87 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—400.

Owner—Same as No. 1094 A.

Subject—Exposition of Śukasandeśa.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

मद्वारिषु मिलितालिभिरुपशोभितवदनं
वरवारणमुखपङ्कजमखिलार्थदममलम् ।
करसंभृतसृणिपाशकर(द)डाडिमकलशं
नमताखिलजनवन्दितचरणं भवतनयम् ॥

प्रसरति जगतीह यत्प्रसादा-
दमृतमयी भणितिर्नितान्तहृद्या ।
तुहिनकरकलाकृतावतंसां
शरणमहं समुपैमि भारतीं ताम् ॥

अन्तराहितसन्तापशान्तये सन्ततं भजे ।
तारकान्तकरं देवमन्तकान्तकृतः सुतम् ॥

वासुदेवपदाम्भोजपरागपरमाणवः ।
परिशोधितमच्चेतोमुकुराः पान्तु सन्ततम् ॥

व्याख्यास्ये शुकसन्देशं देशिकापाङ्गसंश्रयः
पूर्वव्याख्यानुसारेण तत्र सन्तः प्रसीदतात् ॥

भुजङ्गभूषं भसिताङ्गरागं
भवापवर्गप्रभवैकहेतुम् ।
भवाब्धिकल्लोलनिमग्नचेता
भवं शरण्यं शरणं प्रपद्ये ॥

अथ सकलविबुधजनहृदयमार्ताण्डः कविकुलावतंसः सकलरसिकजनरसायनं शुकसन्देशसंज्ञितं काव्यमारभमाण आशीरादित्र्यन्यतमेन प्रबन्धमुखे भवितव्यमिति प्रथमपद्येन वस्तुनिर्देशं करोति लक्ष्म्या रङ्गे इति ।

End :

अम्भोजिन्यां कमलिन्याम् । न विरलाः अविरलाः । विरला न्यूनाः । वलन्तः तिर्यक् भ्रमन्तः । अविरलाश्च ते वलन्तश्चेति तथा । अविरलवलन्तश्च ते मारुताश्चेति तथा । तैरुद्भ्राम्यमाणा अविरलवलन्मारुतोद्भ्राम्यमाणाः । अलयो गर्भे अन्तर्भागे येषां ते तथा । सरसिजं कमलम् । तस्य रजांसि परागाः त एव काहलाः सरसिजरजःकाहलाः शब्दायन्ते । शब्दनोपपत्तिमाह—अलिगर्भाः । अलिशब्देनाजहल्लक्षणया मधुमदमुदितविरुतसहितमधुकरनिकरवि-

शिष्टा इत्यर्थो लभ्यते। काहलत्त्वोपपत्तिरविलमरुन्मारुतै(?)रुद्भ्राम्यमाणा ऊर्ध्वं भ्राम्यमाणा इत्यनेन दर्शिता। 'वल तिर्यग्भ्रमण' इति धातुः। ननु अम्भोजिन्यां सरसिजरजःकाहलाः शब्दायन्त इति कथमुक्तम्। समुद्रसद्भावेनाद्वयमुपपद्यतां नामसमुद्रस्याम्भोजिनीत्वाभावात्। तत् कथमिदमुक्तम्। उच्यते। 'अभ्रस्येवोच्छ्वसिति बिसिनीजालमि'ति पूर्वोक्तबिसिनीजालाधिकरणभूतं सर इहोच्यते। अतो न दोषः। परिणाम इहालङ्कारः।

Colophon :

Author :

Remarks—Only 16 verses are commented upon herein. Three leaves in the middle are blank on one side.

---

## ॥ न्यायसारः ॥

### No 1094 D. NYĀYASĀRA

C. O. L. No. 1815 D.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—27. 10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1000. Incomplete.

Owner—Same as No. 1094 A.

Subject—Explication of Nyāya Śāstra.

Author—Vāsudeva Sūri.

Remarks—The work has been printed in this Office as No. 109 TSS.

---

## ॥ मन्त्रप्रयोगः ॥

## No. 1094 E. MANTRAPRAYOGA.

C. O. L. No. 1815 E.

Substance—Palm leaf. Size—15½" × 1¾". Leaves—22. 8 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas — 500. Incomplete.

Owner—Same as No. 1094 A.

Subject—A collection of mantras and their application.

Beginning:

हरिः। श्री ह्रीं क्लीं कालि कालि महाकालि भद्रकालि भद्रकालि रुधिरद्रवसाक्षिणि मम शत्रून् छेदय पिब शोषय हुं फट् स्वाहा। ओं नमश्चामुण्डे करकरकमले भृत्यभूतपरिवारे श्मशानप्रिये नररुधिरमांसप्रियभोजने सिद्धविद्याधरवन्दितचरणे ब्रह्मसूर्येशयमवरुणकुबेरविष्णुपूजिते क्रोधविवर्जितशरीरे द्वादशादित्यप्रभे एहि चामुण्डास्वरूपिणि।

End:

एकारात्मिकायै हरसात्मिकायै शान्तायै नमः। वायव्यादिपूर्वान्तम्। ऐं ह्रीं श्रीं अविकृतनाथश्रीपादुकां पूजयामि। शून्यनाथस्पर्शनाथबिन्दुनाथध्वनिनाथनादनाथशक्तिनाथबीजनाथाक्षरा-

स्मनाथनवाधारेषु अञ्जलिना न्यसेत् । सपरार्धानन्दानन्दनाथरूपवक्त्रश्रीपादुकां पूजयामि । मूर्धादिचिबुकान्तं सपरार्धात्मतत्त्वबिन्दुस्तनयुगलश्रीपादुकां पूजयामि । चिबुकादिनाभ्यन्तं ई अन्नम ई इति चतुर्थस्वरपुटितमातृकां विन्यस्य अङ्गैः सकलीकृत्य ऋष्यादिकं कृत्वा अक्षहोमं कुर्यात् ।

Colophon :

Author :

Remarks—This Ms. is largely utilised by sorcerers.

---

## ॥ मरणलक्षणम् ॥

### No. 1094 F. MARAṆALAKṢAṆAM.

C. O. L. No. 1815 F.

Substance—Palm leaf. Size—15½″ × 1¾″. Leaves—5. 6 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—100.

Owner—Same as No. 1094 A.

Subject—Symptoms of death.

Beginning :

ഹരിഃ. മരണലക്ഷണം.

പൂവുണ്ടായാൽ കായുണ്ടാം. പുകയുണ്ടായാൽ തീയുണ്ടെൻറു കല്പിക്കാം. അവ്വണ്ണമേ മരണലക്ഷണം കണ്ടാൽ മരിക്കുമെൻറു കല്പിക്കാം. അതു് രണ്ടുജാതിയുണ്ടു്. സ്ഥായിച്ചെൻറും അസ്ഥായിച്ചെൻറും. സ്ഥായിച്ചെങ്കിൽ മരിക്കും. അസ്ഥായിച്ചെങ്കിൽ വ്യാധിശമിക്കുമ്പോൾ കൂടെ ശമിക്കും. എൻറാൽ മരണലക്ഷണം കണ്ടു

മരിക്കുമെൻറു ചൊല്ലുക. വ്യാധിതൻെറ തലമയിർ പറിച്ചാൽ അതിൻെറ വേദന അറിഞ്ഞീലവൻ എങ്കിൽ ആറുദിവസത്തിലകത്തു മരിക്കുമെൻറു ചൊല്ലാം. യാവനൊരുത്തനു് നെററിമേൽതാൻ വസ്തിയിൽതാൻ ചന്ദ്രക്കലപോലെ ഞരമ്പു് പൊങ്ങുകിൽ മുപ്പത്തുനാളെയ്ക്കകത്തു മരിപ്പനെൻറു ചൊല്ലുക.

End :

വൈദ്യനു കൊടുപ്പാൻ പണവും നോക്കി കാണ്ടാൽ? ഔഷധവും കാണ്മാഞ്ഞിൽ ചികിൽസിക്കേണ്ടതില്ല. ഔഷധം ചികിൽസിച്ചാൽ ഫലിയാതവനാം ചികിൽസവേണ്ടാ. ചാൺജനം വൈദ്യനോടു ചോദിച്ചാൽ മരിക്കുമെൻറു ചൊല്ലൊല്ല. മററാരാദനോടു ചൊല്ലുകയാവു. ക്ലേശിതൻ മരിക്കുമെൻറിരിക്കിൽ യമദൂതന്മാരും പിശാചങ്ങളും അവൻെറ ചുററുമിരുന്നു് ഔഷധവീര്യത്തെ കടന്നും തൃപ്തിയുമില്ലാതെയാക്കും. അതുകൊണ്ടു് വ്യാധി ശമിയായിട്ട എൻറു ചൊല്ലുക.

Colophon ·

മരണലക്ഷണമേതൽ.

Author :

Remarks—This Ms. is of immense use to all, particularly medical men. The next 9 leaves embody a topic on Mīmāṃsā without beginning and end.

## ॥ शिवार्चाविधिः ॥

## No. 1094 G. SIVĀRCĀVIDHI.

C. O. L. No. 1815 G.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—15. 2

6—7 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—350.

Owner—Same as No. 1094 A.

Subject—The worship of Śiva and the rites thereof.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । ओम् ।

वन्दे कल्पतरूद्यानलतामण्डपसंस्थितम् ।
गुहमम्बास्तनद्वन्द्वपरामर्शपरायणम् ।
अभिवन्द्य गुरुना...यनपरायणान् ॥
शिवार्चाविधिरस्माभिरविस्मृत्यै विलिख्यते ॥

अभिवन्द्य गणाधिपं गुरून्
शिवयोः पादसरोरुहद्वयीम् ।
अखिलार्थविशेषवैभवं
विमृशेत् प्रत्युपसि प्रमाणवत् ॥

रजनीचरनाथपालिते
दिशि मैत्रं(?) प्रविधाय तन्मृदा ।
सलिलैश्च विशोध्य शुद्धधी-
रवगाह्यात्मतनुं विशोधयेत् ॥

अभिमन्त्रितवारिणोक्षितः
परिधायाम्बरमाचमय्य च ।
रविमण्डलदत्तदृष्टिर-
प्यप ऊर्ध्वं विकिरेन्मनुं जपन् ॥

End :

भुव ओं स्वाहा । ओं निधन निधन निधनोद्भव शिव शर्व परमात्मन् महेश्वर सद्भावेश्वर महादेव महातेजो योगाधिपते मुञ्च मुञ्च । प्रमथप्रमथ शर्व शर्व भव भवोद्भव वामदेव सर्वभूतसुखप्रद सर्वसान्निध्यकरब्रह्मविष्णुरुद्रपर अनर्चितानर्चित असंस्तुतासंस्तुत पूर्वस्थित पूर्वस्थित साक्षिन् साक्षिन् तुरु तुरु पतङ्ग पतङ्ग पिङ्ग पिङ्ग ज्ञान ज्ञान शब्द शब्द सूक्ष्म सूक्ष्म शिव शर्व सर्वद ओं नमो नमः नमः शिवाय नमो नमः ।

Colophon :

Author :

Remarks—The author himself observes that this composition has been indited for his personal use. Hence the inference that he was a great devotee of Śiva.

---

## ॥ नीतिसूत्रम् ॥

### No. 1094 H. NĪTISŪTRA.

C. O. L. No. 1815 H.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—9. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—200.

Owner—Same as No 1094 A.

Subject—Sociology.

Beginning :

हीयमानः सन्धिं कुर्वीत । तेजो हि सन्धानहेतुस्तदर्थिनाम् । नातप्तं लोहं लोहेन सन्धत्ते । बलवान् हीनेन.... .... ....यात् । नच विगृह्णीयात् ज्यायसा समेन वा । हस्तिनः पादयुद्धमिव बलवद्विग्रहः । आमपात्रमामेनैव सह विनश्यति । अरिप्रयत्नमपि समीक्ष्यात्मरक्षया वसेत् । शक्तिहीनो बलवन्तमाश्रयेत् । दुर्बलाश्रयो हि दुःखमावहति । अग्निवद्राजानमाश्रयेत् । राज्ञः प्रतिकूलं नाचरेत । न देवचरितं चरेत् । उद्धतवेषधरो न स्यात । द्वयोरधृष्ययोर्द्वैधीभावं कुर्वीत ।

End :

स्वधर्मानुष्ठानादिहैव सुखमाप्यते । सततं स्वपरशरीरं मन्यते साधुः । सर्वत्र मान्यं श्रेशयति बालिशः । मांसभक्षणमयुक्तम् । .... .... ....वतां विज्ञानेन संसारमिति निवर्तयेत् । सर्वं जनिमदद्र.... .... ....कृमिशकृन्मूत्रभाजनं शरीरम् । पुण्यपापमेव जन्म.... .... ....युक्तस्य तपो वर्धते सर्वं मङ्गलम् ।

Colophon :

Author :

Remarks—The Ms. is bereft of its beginning. The following verse occurs at its close.

मन्दं मन्दं मधुरनिनदैर्वेणुमापूरयन्तं<br>
  वृन्दं वृन्दावनभुवि गवां चारयन्तं चरन्तम् ।<br>
छन्दोभागे शतमखमखध्वंसिनां दानवानां<br>
  हन्तारं तं कथय रसने गोपकन्याभुजङ्गम् ॥

## ॥ आनन्दलहरीव्याख्या (मनोरमा) ॥

No. 1095 A. ĀNANDALAHARĪVYĀKHYĀ
(Manoramā).

C. O. L. No. 41 A.

Substance—Paper. Size—13½″ × 8½″. Pages—11. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—110. Complete.

Owner—C. O.

Subject—A Panegyric of Devi.

Beginning:

प्रचण्डपञ्चकाण्डारेर्गण्डस्पृष्टा मदालसा ।
अखिलाण्डेश्वरीदृष्टिः कुर्यादिष्टं मम मङ्गलम् ॥

गणपमथ गुरुं सच्चिदानन्दनाथं(?)
शिवमिथुनमुपास्य ब्रह्मविद्यारहस्यम् ।
भुव इव बहुतन्त्रं वीक्ष्य चैषां प्रसादात्
त्रिणयनविभवश्रीशङ्कराचार्यपद्ये ॥

सच्चिदानन्दशिष्येण सहजानन्दधीमता ।
आनन्दलहरीव्याख्या तन्यतेऽसौ मनोरमा ॥

इह खलु सर्वेषां जन्तूनां सुखमेव भूयात्, दुःखं मा भूयादिति सुखोपादित्सादुःखजिहासे भवतः । अत्यन्तदुःखनिवृत्तिः सुखावाप्तिश्च ब्रह्मज्ञानमन्तरेण न भवतः । ब्रह्म वेद ब्रह्मैव भवति ।

End :

यथादेशं यथाकालं यथालोकहिताहितम् ।
तथैवाभ्यर्चयेदेनां नान्यथा सिद्धिभाग् भवेत् ॥

तत्र श्रीमच्छङ्कराचार्यः—
राज्यमप्यर.... ....लमपि मनसोऽपि समीप्सितम् ।
लोकाविद्वेषणं वेषं नैव कुर्यात् कदाचन ॥

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरे जनाः ।
इति श्रीकृष्णवचनेन च सर्वेषां शिष्टाचारमेव निश्चितं सर्वमनवद्यम् ।

Colophon :

इति श्रीशिवादिगुरुपारम्पर्यसत्सम्प्रदायानुसारिश्रीमुनीन्द्रस्वचिदानन्दनाथशिष्यसहजानन्दविरचितायाम् आनन्दलहरीव्याख्यायां मनोरमायां प्रथमोल्लासः ।

Author—Sahajānanda.

Remarks—Several authoritative citations occur in the course of the work. The opening Ullāsa alone is available here. Eight verses glorifying Devi and six praising Rāma form its beginning.

---

## ॥ सौन्दर्यलहरीव्याख्या ॥

No. 1095 B. SAUNDARYALAHARĪVYĀKHYĀ.

C. O. L. No. 41 B.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—293.

20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas — 3275. Complete.

Owner—C. O.

Subject—Same as No. 726.

Beginning :

या मुक्तिहेतुरविचिन्त्यमहाव्रतैस्त्व-
मस्यस्यसे मुनियतेन्द्रियसत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमासि देवी ॥

इति मार्कण्डेयपुराणे सूचिता परमा ब्रह्मविद्या । तस्याः प्रकाशं जितेन्द्रियं अस्तौषं अस्तदोषजितारिषड्वर्गम्? । शिवमिथुनोपासकस्तोतारं प्रत्याशङ्कते—ननु लोके स्त्रीपुंसयोर्मध्ये पुमानेव प्रधानः । तथा मम रमणं परमशिवमनादृत्य तदङ्कस्थामस्वतन्त्रां मां कथमस्तौषीः इत्याशङ्कायामाह ।

शेषाः शेषोक्तिभूषाकरचरणचणद्ग्रन्थसौगन्ध्यजिघ्रा
भट्टोक्तिप्रौढलीलागुरुतर.... ....शुभद्विजृंभाः ।
निश्शङ्काः शङ्करोक्तौ पशुपतिमतनिर्वाहकाः सांख्यसख्या
यस्य श्रीलोलल्लक्ष्मीधरविबुधमणेर्भान्ति वाचां निगुम्भाः ॥

सोऽयं लक्ष्मीधरः प्राह टीकां लक्ष्मीधराभिधाम् ।
एनां समाहितस्वान्ताः सेवन्तां सततं बुधाः ॥

स्यादेव मेऽलसतया मतिमान्द्यतो वा
दोषः क्वचित् क्वचिदथापि न कापि शङ्का ।

नैसर्गिकी खलु गुणीकरणप्रवीणा
शक्तिः सदा विजयते खलु सज्जनानाम् ॥

इह खलु शङ्करभगवत्पूज्यपादाः समयमततत्त्ववेदिनः समयाख्यां चन्द्रकलां श्लोकशतेन स्तुवन्ति ।

शिवश्शक्त्या.... .... .... ....प्रभवति ।

End :

उपमानोपमेययोर्वस्तुप्रतिवस्तुभावेनान्वयात् यदा इयं स्तुतिरिति स्वरूपमात्रमेव परामृशति, तदा भिन्नवाक्यत्वेन बिम्बप्रतिबिम्बाक्षेपात् दृष्टान्तालङ्कारः । एवं प्रतिवस्तूपमादृष्टान्तालङ्कारयोरन्वयभेदेन प्रतीयमानत्वात् संसृष्टिरेवेति ध्येयम् ।

Colophon :

Author—Lakṣmīdhara.

Remarks—The author proclaims his proficiency in Sanskrit grammar in the course of the work. No colophon marking the close is seen herein.

## ॥ कृष्णकर्णामृतम् ॥

No. 1096 A. KṚṢṆAKARṆĀMṚTAM.

C. O. L. No. 2506 A.

Substance—Palm leaf. Size—17″ × 1¾″. Leaves—24. 7 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—500.

Owner—Muttu Śāstrī, Cape Comorin.

Subject—Stuti.

Beginning:

... ... ...नाथकिशोरः
माधुर्यवारिमदान्धत... ...
... ... ... ताम्मनो मे ।
अव्याजमञ्जुलमुखाम्बुजमु... ... ...
.... .... मदीयहृदये भुवनाभूमोजः(?) ॥

मणिनूपुरवाचालं व.... ..... .....
..... ..... .....वल्लवीविभो ।
मणिनूपुरप्रणयि मञ्जुशिञ्जितं
कमलावनेचरकलिन्दकन्य.... .... ॥

End:

प्रातर्नमामि मनसा रभसा च वाचा
पादारविन्दयुगलं परमस्य पुंसः ।
नारायणस्य नरकार्णवतारकस्य
पारायणप्रवणविप्रपरायणस्य ॥

प्रातर्भजामि भजतामपि वा करन्तं(?)
प्राक् सर्वजन्मकृतपापभयापहत्यै ।
यो ग्राहवक्त्रपतितांघ्रिगजेन्द्रघोर-
शोकप्रणाशनकरोद्धृतशङ्खचक्रः ॥

पुल्लहल्लकवतंसकोल्लसद्वल्लमार्गमगवीः(?)

Colophon :

इति श्रीकर्णामृते तृतीयोऽध्यायः ।

श्रीकृष्णाय नमः । परस्मै नमः । वेदव्यासाय नमः । श्रीराम-चन्द्रपरब्रह्मणे नमः ।

Author:

Remarks—The Ms. begins with the 13th verse. The first leaf is worn out.

---

## ॥ शिवानन्दलहरी ॥

No. 1096 B. ŚIVĀNANDALAHARĪ.

C. O. L. No. 2506 B.

Substance—Palm leaf. Size—17″ × 1¾″. Leaves—13. 7 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—2750.

Owner—Same as No. 1096 A.

Subject—Stuti.

Beginning:

वागर्थाविव सम्पृक्तौ
वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे
पार्वतीपरमेश्वरौ ॥

श्रीसाम्बपरमेशाय नमः ।

कलाभ्यां चूडालङ्कृतशशिकलाभ्यां निजतपः-
फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे ।
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुन-
र्भवाभ्यामानन्दस्फुरदनुभवाभ्यां नतिरियम् ॥

End :

...र्याङ्कुशेन निभृतं रभसादात्वर्ष्य(?) भक्तिशृङ्खलया ।
पुरहर चरणालाने हृदयमदेभं बधान चिद्यन्त्रैः ॥

....त्यभितः प्रगल्भवृत्त्या मदवानेष मनःकटंकरीयम् ।
परिगृह्य नयेन भक्तियज्वा परमस्थाणुपदाम्बुजं नमामि ॥

श्रीशिवाय नमः ।

Colophon :

... ...शङ्कराचार्यविरचितायां मोक्षमार्गहेतौ शिवानन्दलहरी सम्पूर्णा । हरिः । ओम् । शुभमस्तु । गुरुभ्यो नमः ।

Author—Śaṅkarācārya.

Remarks — An intervening leaf contains a few verses from another work.

---

## ॥ मूकपञ्चाशिका ॥

## No. 1096 C. MŪKAPAÑCĀŚIKĀ.

C. O. L. No. 2506 C.

Substance—Palm leaf. Size—17″ × 1¾″. Leaves—8. 5—6 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—140,

Owner—Same as No. 1096 A.

Subject—Stuti.

Beginning :

कारणपरचिद्रूपा
काञ्चीपुरसीम्नि कामपीठगता ।
काचन विहरति करुणा
काश्मीरस्तबककोमलाङ्गलता ॥

कश्चन काञ्चीनिलयं
करधृतकोदण्डबाणसृणिपाशम् ।
कठिनस्तनभरनम्रं
कैवल्यानन्दकन्दमवलम्बे ॥

End :

.... ....त्वपवर्गा
कृतरणसर्गा ससिंहसंसर्गा ।
कामाक्षि मुदितदुर्गा
हतरिपुवर्गा त्वामसा? दुर्गा ॥

.... ....चलवेतण्डा
समरो गण्डा (?) धुतासुरशिखण्डा ।
देवि कलितान्त्रषण्डा
धृतनरमुण्डा त्वमेव चामुण्डा ॥

Colophon :

Author—Mukakavi.

Remarks—The Ms. contains 88 verses only.

---

## ॥ अमरकोशव्याख्यानम् ॥

## No. 1096 D. AMARAKOŚAVYĀKHYĀNAM.

C. O. L. No. 2506 D.

Substance—Palm leaf. Size—17″ × 1¼″. Leaves—50. 6 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—900.

Owner—Same as No. 1096 A.

Subject—Lexicon.

Beginning :

अवश्यायः- तु- नीहारः तुषारः तुहिनं हिमं प्रालेयं मिहिका च 7 பனி. हिमानी हिमसंहतिः பெரும்பனி। शीतं १ गुणे. குளிர்। तद्वदर्था।

End :

उत्तरासङ्गश्च प्रा+गौ समौ बृहतिका-तथा। संव्यानं ............ .... .... कूर्पासकः अस्त्रियाम्। சட்டை। नीशारस्तु प्रावरणे हिमानिलनिवारणे பருக்கன் अर्धोरुकं वरस्त्रीणां ...... ......

Colophon :

Author :

Remarks—The commentary is in Tamil. The Ms. ends on the 133rd verse in Manuṣya varga.

## ॥ गुरुपवनपुराधीशस्तोत्रम् ॥

No. 1097. GURUPAVANAPURĀDHĪŚASTOTRAM.

C. O. L. No. 916.

Substance—Paper. Size—12″ × 9″. Pages — 190. 20 lines per page and 21 letters per line. Script—Devanāgarī. No. of Granthas—1125. Incomplete.

Owner—C. O.

Subject—Eulogy.

Beginning :

कुम्भप्रान्तसमुद्भवाद्भुतमहावीची(+)टोद्धङ्कना-
घोषप्रान्तदिगन्तदन्तिनिचयोन्निष्यन्दिदानाम्भसाम् ।
गण्डोद्रेकनितान्तसम्भृतमहालोभभ्रमद्भृङ्गराड्-
झङ्कारप्रतिघोषघोषितदशाशोऽव्यात् स वो विघ्नराड् ॥

अं....द्भवकान्तकेलिपरिरम्भालापसम्भोगजा-
नन्दोद्रिक्तमनःप्रसादपिशुनप्रोद्यन्मुखाम्भोरुहा ।
श्रोत्रानन्दरसप्रवाहजनकक्काणोल्लसत्कच्छपी-
वीणावादनशीलपाणिजलजा सा भारती पातु नः ॥

× × × × ×

राज्ये शेखरभूपतेरपि पुरग्रामेऽवसच्छ्रीमति
ब्रह्मीभूतमहारुणाद्रिविदुषां शिष्यस्य पुत्रस्त्वहम् ।
विद्वान् कौशिकवंशजो द्विजवरः श्रीदेवराजाह्वयो
भक्त्या कृष्णकथां प्रवक्तुमनिशं मुक्त्यै सुखेनारभे ॥

श्रीमद्यत्पादपद्मप्रभजनविधिनान्येतरं(?) जन्मवार्धि-
र्नित्यानन्दस्वरूपं गुरुपवनकृतालयालये भासमानम् ।
अन्यैर्वाक्यैरमेयं विधिमुखकृतिभिस्सत्यमित्यादिवाक्यै-
र्ज्ञेयं तद्ब्रह्म साक्षाद्विभु परमसुखावाप्तये वस्तु नोऽस्तु ॥

× × × × ×

श्रीमद्भागवतं मुनीन्द्रकथितं यद्द्वादशस्कन्धकं
तस्मिन् दाशमिके हरेस्तु चरितं यद्भूयसावर्जितम् ।
तत्सर्वं त्वहमादरेण वचसा चाल्पीयसा संग्रहा-
द्वक्तुं प्रारभ आर्तिनाशनविधेः श्रीदेवराजाह्वयः ॥

साक्षान्नारायणांशादुदितमिदमहं संगृहीतं चिकीर्षु-
र्विद्वद्भिर्निन्दनीयो गुरुतरमतिभिः पूजनीयोऽथवा स्याम् ।
नाहं जाने तथापि प्रबलहरिकथावर्जनीयात्मशुद्ध्यै
लोके गङ्गाजलैस्तैर्न किमखिलजनास्तर्पयेयुः पितॄन् स्वान् ॥

End :

सोऽहन्त्विज्यातपोभ्यां सदुपशमरतो वा न तुष्येयमित्थं
शुश्रूषाया विधानात् सततमपि गुरोस्तद्यथा प्रीतियुक्तः ।

गेहे वृत्तं गुरोर्नः स्मरसि सुवसतां तत्र जातान्त्विदानीं
कृष्णास्मान् पाहि विष्णो! गुरुपवनपुराधीश! तापावलिभ्यः ॥

तद्दारैश्चोदितानामतिगहनमहारण्यगानां विशेषात्
तत्रै...दानकर्माण्यमितपवनयुग्वृष्टिरासीत्तदानीम् ।
तीव्रापत्तौ रवावस्तमनमुपगते चागते चान्धकारे
कृष्णास्मान् पाहि विष्णो! गुरुपवनपुराधीश! तापावलिभ्यः ॥

Colophon :

इति श्रीदेवराजीये श्रीमत्कृष्णावतारकृतहरिचरितमधुररससारे दशकथासंग्रहे श्रीमद्गुरुपवनपुराधीशस्तवे अष्टमशतकं समाप्तम् ।

Author—Deva Rāja.

Remarks—The Ms. covers 8 centuries of poems along with a half of the 9th.

---

## ॥ चण्डिकासप्तति: (सव्याख्या) ॥

### No. 1098. CAṆḌIKĀSAPTATI with commentary.

C. O. L. No. 142.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1''$. Leaves—73. 7 lines per page and 36—38 letters per line. Script—Malayāḷam. No. of Granthas—1200. Complete.

Owner—Kṛṣṇaru Keśavaru, Jñārakkal, Quilon.

Subject—A panegyric.

Beginning:

श्रीमहागणपतये नमः ।

ओङ्कारस्सारभूतोऽप्यखिलनिगमतो यन्महो नाभिधत्ते
यद्भासा भाति नित्यं निखिलमपि जगद्भास्यते यन्न भाभिः ।
यत्तत्त्वं वेत्ति साक्षान्नियमितधिषणश्शङ्करश्शाम्भवं त-
द्वन्दे वृन्दारमुख्यैर्वटतटनिलयं वन्दितं वेदवेद्यम् ॥

व्याख्यानृत्तं निखिलविदुषां कुर्वती निर्विशङ्कं
यद्वाङ्नारी निगमभरतं निर्मलं योजयन्ती ।
विद्यारत्नं निजसुखकरं वेदलोकादवाप-
त्तं वन्देऽहं यतिवरव्रतं सत्यशैलं यतीन्द्रम् ॥

बाणनाम्नाभिविख्यातश्चण्डिकासप्ततिं कविः ।
चकार चन्द्रवच्चारु करैकैरिव कौमुदी ॥

व्याख्यानं क्रियते तस्याः पूर्णविद्यैर्यतीश्वरैः ।
वेदपूर्णपदाम्भोजभृङ्गभूतैः समासतः ॥

तत्र मूलप्रकृतेर्ज्ञानैश्वर्यादिवपुषः परमेश्वर्याः सत्त्वरजस्तमस्सा-
म्यात्मिका याः काश्चित् तिस्रोऽवस्थाः सात्त्विकतामसराजसात्मिकाः
चण्डिका पार्वती भद्रकालीति प्रसिद्धाः तासां यां काञ्चिदाश्रित्य
क्वचित् क्वचित् स्तुतिः क्रियते ।

End:

हसितवती देवी कस्येति सम्बन्धः । अस्येत्यध्याहृते यस्य

चर्मणा अस्य चर्मणा बाणवेगः प्रतिहत इत्युक्त्वा हसितहाराभूत् ।
तस्य महिषस्य मृत्युं कुर्वतीति ।

Colophon :

वेदपूर्णपदपङ्कजसेवालब्धभूरिकरुणोपचितात्मा ।
दौर्गसप्ततिवरस्तुतिवृत्तिं पूर्णविद्यमुनिरेप चकार ॥

व्याख्याञ्जनां लघुधिया रचितामपीमां
गूढार्थसप्ततिगतार्थविवित्त्ययैव ।
स्वीकुर्वते विपुलरोगपरीतगात्राः
पथ्यं यथौपधमतो न निरर्थिकेयम् ॥

चण्डिकासप्ततिव्याख्या पूर्णविद्ययतीरिता ।
माधवाख्येन लिखिता खचिता बहुभिर्गुणैः ॥

चण्डिकासप्ततिव्याख्या च समाप्ता ।

Author—Text—Bāṇa.

Commentary—Pūrṇavidyāmuni.

Remarks—The Ms. contains the text and the commentary thereon.

---

॥ चण्डिकासप्ततिव्याख्या ॥

No. 1099. CAṆḌIKĀSAPTATIVYĀKHYĀ.

C. O. L. No. 1928.

Substance—Palm leaf. Size—10″ × 2″. Leaves—47. 9 lines per page and 32 letters per line.

Script—Malayāḷam. No. of Granthas—850. Complete.

Owner—Subramoṇyan Mūttatu, Harippād.

Subject—Same as No. 1098.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

मा भाङ्क्षीर्विभ्रमं भ्रूरधर विधुरता केयमास्यास्य रागं
पाणे! प्राण्येव नायं कलयसि कलहश्रद्धया किं त्रिशूलम् ।
इत्युद्यत्कोपकेतून् प्रकृतिमवयवान् प्रापयन्त्येव देव्या
न्यस्तो वो मूर्ध्नि मुष्यान्मरुदसुहृदसून् संहरन्नङ्घ्रिरंहः ॥

मेति ॥ हे भ्रूः त्वं विभ्रमं स्त्रीणां निसर्गसिद्धं विलासं मा भाङ्क्षीः । हे अधर! तव केयं विधुरता प्रकम्पः । हे आस्य वदन! रागं रक्तिमानम् अस्य परित्यज। हे पाणे! कलहश्रद्धया किं किमर्थं त्रिशूलं कलयसि परिणहयसि । सम्प्रति प्रबलोऽयं पापिष्ठस्तत एवमादि कुतो न कर्तव्यमिति चेत्—तत्राह । अयं प्राण्येव न प्राणनमात्रेऽप्यसमर्थो लघुः। इति उक्त्वेति शेषः । उद्यत्कोपकेतून् पूर्वम् उदयत्कोपचिह्नान् अवयवान् चिल्ल्यादीन् प्रकृतिं पूर्वावस्थां प्रापयन्त्येव देव्या मूर्ध्नि। महिषस्येत्यर्थाल्लभ्यते । न्यस्तो मरुदसुहृदसून् महिषासुरप्राणान् संहरन्निराकुर्वन् अङ्घ्रिर्वः अंहो दुरितं मुष्यान्नाशयेत् । अत्र भगवती असुरनिरसनमहोत्सवप्रसन्नमुखी जाता । तत एवावयवस्थापि प्रकृतिमापन्ना । तत्र कविना पूर्णं कोपचिह्नोपलक्षितत्वादित्युक्त्वा प्रकृतिं प्रापयन्त्येवेत्युत्प्रेक्षितम् ।

End:

चक्रे चक्रायुधस्य क्वणति निपतिते रोमणि ग्रावणीव
स्थाणोर्बाणस्य वेगः प्रतिहत उरुणा चर्मणा वर्मणेव ।
यस्येति क्रोधगर्भं हसितहरिहरा तस्य गीर्वाणशत्रोः
पायात् पादेन मृत्युं महिषतनुभृतः कुर्वती पार्वती वः ॥

चक्र इति । यस्य रोमणि लोम्नि निपतिते चक्रायुधस्य विष्णोश्चक्रे ग्रावणि शिलायां निपतित इव क्वणति शब्दं कुर्वति सति स्थाणोर्महेश्वरस्य बाणस्य पाशुपतस्य वेगो यस्योरुणा दृढेन चर्मणा त्वचा वर्मणा कवचेनैव प्रतिहतः प्रतिबद्धेव हसितहरिहरा तस्य महिषतनुभृतो गीर्वाणशत्रोः महिषासुरस्य मृत्युं पश्चत्वं पादेन श्रीपादकमलेन क्रोधगर्भं यथा तथा कुर्वती पार्वती वः पायात् ।

Colophon:

൧൦൫൩-ാമാണ്ട് ചിങ്ങമാസം ൨൯ാംനു സോമവാരെ പുനർതം നക്ഷത്രേ അപ്പൂംഷ്യകാദശിയിൽ പുലിക്കരണവും അന്നു വൃച്ഛികം രാശിക്കാരത്തു എഴുതിത്തീർത്ത വ്യാഖ്യാനസഹിതചണ്ഡികാസപ്തശതിഗ്രന്ഥം.

Author:

Remarks:

## ॥ चण्डिकासप्ततिव्याख्या ॥

## No. 1100. CAṆḌIKĀSAPTATIVYĀKHYĀ.

C. O. L. No. 2215.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—39.

9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—700.

Owner—Subramoṇyan Śaṅkaran Mūttatu, Kiḍaṅgūr.

Subject etc.—Same as No. 1098.

Colophon :

920ാമാണ്ടു മിഥുനമാസം 12ാംനു- ബൃഹസ്പതിവാരെ ചിത്തിര നക്ഷത്രെ പൂർവ്വദശമിയിൻ കഴുതക്കരണവും കൂടിയ സമയെ വൃശ്ചികം രാശിനേരത്തു് എഴുതിതീർത്ത വ്യാഖ്യാനസഹിത ചണ്ഡീസപ്തതിഗ്രന്ഥം (കുളങ്ങരെത്തു്)

Author :

Remarks—The date of transcription is evinced by the colophon.

---

## ॥ दाक्षिणामूर्त्तिस्तवव्याख्या ॥

## No. 1101 A. DAKṢIṆĀMŪRTISTAVAVYĀKHYĀ.

C. O. L. No. 782 A.

Substance—Paper. Size—11″ × 9″ Pages — 39. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas — 400.

Owner—C. O.

Subject—A panegyric of Dakṣiṇāmūrti.

Beginning :

भगवत्पादपादाब्जद्वन्द्वं द्वन्द्वानिबर्हणम् ।
सुरेश्वरादिसद्भृङ्गैरवलम्बितमाभजे ॥

मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती ।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥

... ... ... ... ... ... ...

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

अन्तरस्मिन्निमे लोका अन्तर्विश्वमिदं जगत् ।
बहिर्वा मायया भाति द॰र्णे प्रतिबिम्बिते ॥

स्वप्ने स्वान्तर्गतं विश्वं यथा पृथगवेक्ष्यते ।
तथैव जाग्रत्कालेऽपि प्रपञ्चोऽयं विविच्यताम् ॥

End:

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मनः ॥

प्रकाशात्मिकया शक्त्या प्रकाशप्रभवाकरः ।
प्रकाशयति यो विश्वं प्रकाशोऽयं प्रकाश्यताम् ॥

Colophon:

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके प्रबन्धमानसोल्लासे दशमोल्लाससंग्रहः ।

इति श्रीसुरेश्वराचार्यकृतो मानसोल्लासः समाप्तः ।

Author:

Remarks—The commentary is composed in verse.

## ॥ दक्षिणामूर्तिस्तवव्याख्या ॥

## No. 1101 B. DAKṢIṆĀMŪRTISTAVAVYĀKHYĀ.

C. O. L. No. 782 B.

Substance—Paper. Size—11″ × 9″. Pages—105. 20 lines per page and 22—24 letters per line. Script—Devanāgarī. No. of Granthas—1750.

Owner—C. O.

Subject—Same as No. 1101 A.

Beginning :

प्रोद्यच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं
प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिनं प्रोद्वीक्ष्यमाणाननम् ।
मुद्रां तर्कमयीं दधानमचलं कर्पूरगौरं शिवं
हृद्यन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्तिकम् ॥

नत्वाथ शङ्कराचार्यमुख्यान् सर्वान् गरीयसः ।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥

इह हि भगवान् भाष्यकारः श्रीमच्छङ्कराचार्यनामा मन्दमतीन् तत्त्वजिज्ञासून् अनुग्रहीतुं दक्षिणामूर्तिस्तोत्रव्याजेन समस्तवेदार्थरहस्यमाविश्चकार दशभिः पद्यबन्धैः ।

End :

दशमश्लोकव्याख्योपसंहारश्लोकः । इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादक इति ।

Colophon :

इति श्रीमानसोल्लासप्रबन्धोऽयं यथामति ।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥

अनेन भगवान् श्रीमद्दक्षिणामूर्तिरीश्वरः ।
गुर्वात्मा प्रीयतां नित्यं तत्त्वज्ञानप्रदः सताम् ॥

इति दक्षिणामूर्तिस्तोत्रार्थव्याख्याप्रबन्धो मानसोल्लासवृत्तान्तविलासः संपूर्णः ।

श्रीवासुदेवमरविन्ददलायताक्षं
श्रीनारदादिमुनिसेवितमप्रमेयम् ।
श्रीशार्ङ्गिणं सकललोकनिवासपात्रं
श्रीकृष्णमच्युतमहं प्रणतोऽस्मि नित्यम् ॥

अम्बिकानन्दनं देवमम्बुजायतलोचनम् ।
हरिं गीतपुराधीशमनिशं प्रणतोऽस्म्यहम् ॥

Author—Rāmatīrtha.

Remarks—Same as No. 782 A.

## ॥ दक्षिणामूर्त्तिस्तोत्रव्याख्या ॥

No. 1102 A. DAKṢIṆĀMŪRTISTOTRAVYĀKHYĀ.

C. O. L. No. 2102 A.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{4}''$. Leaves—20. 10 lines per page and 32 letters per line.

Script—Malayalam. No. of Granthas—400. Complete.

Owner—Revati Tirunāḷ.

Subject—A panegyric of Śrī Dakṣiṇāmūrti.

Beginning—Same as No. 1165 A. DCSMMPL.

End :

स एकधा भवति। त्रिधा भवति। स यदि पितृलोककामो भवति। संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिश्रुत्युक्तं सर्वं भवेदित्यर्थः।

एवमेषा कृता व्याख्या दक्षिणाशामुखस्तुतेः।
यथामति तथा तुष्टो दक्षिणामूर्तिरस्तु नः॥

भास्वद्रत्नासनस्थं मणिनिकरलसत्सार्पहेमाङ्घ्रिभूषं
हेमाहीन्द्रेन्द्रसूत्रीविधृतकटिलसत्क्षामकौसुम्भचेलम्।
सान्द्रानन्दं सुभक्ताभयवरदकरं स्मेरवक्त्रं त्रिनेत्रं
साम्बं चन्द्रार्धमौ... ...मरतकानन्दमूर्तिं भजामि॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनन्दयोगीन्द्रपादकमलभृङ्गायमाणस्वयंप्रकाशयतिना विरचिता दक्षिणामूर्तिस्तोत्रव्याख्या तत्त्वसुधाख्या समाप्ता।

Author—Svayamprakāśayati.

Remarks—The colophon furnishes the name of the author.

## ॥ मानसिकस्नानम् ॥

## No. 1102 B. MĀNASIKASNĀNAM.

C. O. L. No. 2102 B.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—$1\frac{1}{2}$. 8 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas — 22. Complete.

Owner—Same as No. 1102 A.

Subject—Purification by *Manasikasnana*.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

नवनीतघनश्यामं नलिनायतलोचनम् ।
स्मरामि पुण्डरीकाक्षं तेन स्नातो भवाम्यहम् ॥

इडा भागीरथी गङ्गा पिङ्गला यमुना स्मृता ।
तयोर्मध्ये महानाडी सुषुम्नाख्या सरस्वती ॥

ज्ञानह्रदे ध्यानजले रागद्वेषमलापहे ।
यः स्नाति मानसे तीर्थे स याति परमां गतिम् ॥

End:

ब्रह्मर.......विशन्तीं स्वकां तनुम् ।
तया संक्षालयेद्देहं बाह्यमाभ्यन्तरं मलम् ॥

इदं मानसिकं स्नानं प्रोक्तं हरिहरादिभिः ।
सार्धं त्रिकोटितीर्थेषु स्नानात् कोटिगुणाधिकम् ॥

यो नित्यमाचरेदेवं स वै नारायणः स्मृतः ।
कालमृत्युमतिक्रम्य जीवत्येव न संशयः ॥

Colophon:

श्रीपद्मनाभाय नमः ।

Author:

Remarks:

---

## ॥ दक्षिणामूर्तिस्तोत्रम् ॥

No. 1102 C. DAKṢIṆĀMŪRTISTOTRAM.

C. O. L. No. 2102 C.

Substance—Palm leaf. Size—7½″ × 1½″. Leaves—3. 8 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—48.

Owner—Subject—Same as No. 1102 A.

Beginning:

अविघ्नमस्तु ।

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

End :

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत् किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

सर्वात्मत्वमिति स्फुटं कृतमिदं यस्मादमुष्मिन् स्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वत-
स्सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥

Colophon :

Author :

Remarks—This Ms. contains only the text whose commentary is separately catalogued as 1102 A. A few stanzas on the Bhagavadgīta bring the Ms. to a close.

---

## ॥ वेदान्तसारः ॥

### No. 1102 D. VEDĀNTASĀRA.

C. O. L. No. 2102 D.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—31,

8—9 lines per page and 28—34 letters per line. Script—Malayāḷam. No. of Granthas — 500. Complete.

Owner—Same as No. 1102 A.

Subject etc.—Same as No. 633, DCSMMPL.

Author :

Remarks—The remark "അധികാരിയാൽ കാണത്തകളു്" is seen at the end.

---

## ॥ वेदान्तार्थसारसंग्रहप्रकरणम् ॥

## No. 1102 E. VEDĀNTĀRTHASĀRASAṄGRAHA-PRAKARAṆAM.

C. O. L. No. 2102 E.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—33. 10 lines per page and 24—28 letters per line. Script—Malayāḷam. No. of Granthas —550. Complete.

Owner—Same as No. 1102 A.

Subject—Discrimination of Ātma and Anātma.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीपद्मनाभाय परमगुरवे नमः ।

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

प्रणताज्ञानतिमिरभास्वन्तं करुणार्णवम् ।
परमानन्दचिद्रूपं प्रणमाम्यादिमदेशिकम् ॥

स्वभक्तबोधजलधिसुधाकरमधोक्षजम् ।
वन्दे स्वानन्दसम्पूर्णं कृष्णं कारुण्यविग्रहम् ॥

इह खलु सकलश्रुतिमौलिलालितं सच्चिदानन्दघनमपास्तनिर्मलनिर्विकाररूपमशब्दवाच्यं परं ब्रह्मैवाद्वितीयमस्ति इति निर्मला वस्तुदृष्टिः । अस्यामेव सनकसनन्दनसनातनसनत्कुमारशुकवामदेवादयः समस्तसज्जनचूडामणयः सन्ततं सुखेन निर्भयमासते ।

End :

किन्तु साधनचतुष्टयसम्पन्नाय सर्वदा मुमुक्षवे अन्तर्मुखायानुरक्तसच्छिष्याय च देयम् । तदुक्तमुपदेशसाहस्र्यां श्रीमदाचार्यैः ।

प्रशान्तचित्ताय शमान्विताय
प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत् सततं मुमुक्षवे ॥

इति सर्वमवदातम् ।

वेदान्तसारसर्वस्वं संगृहीतं मयाधुना ।
अनेन भगवान् साक्षात् परमात्मा प्रसीदतु ॥

Colophon :

इति श्रीमद्दक्षिणामूर्तिचरणकमलभृङ्गेण सीतारामाख्यविदुषा

विरचितं वेदान्तार्थसारसङ्ग्रहप्रकरणं सम्पूर्णम् । श्रीकृष्णाय गुरवे नमः ।

श्रीपद्मनाभाय परमगुरवे नमः । ग्रामाभिधपुरनिवासिना लक्ष्मीपुत्रेण केरलवर्मणा लिखितोऽयं ग्रन्थः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
सर्वं श्रीपद्मनाभपादारविन्दार्पणं भवतु ।

Author—Sītārāma.

Remarks—Another work entitled Paramānanda-dīpikā is also attributed to the author herein.

---

## ॥ दिक्चूर्णिका ॥

### No. 1103 A. DIKCŪRṆIKĀ.

C. O. L. No. 1982 A.

Substance—Palm leaf. Size—9″ × 1″. Leaves—20 8 lines per page and 28 letters per line. Script — Grantha. No. of Granthas — 280. Complete.

Owner—P. Vāsudeva Śarma, Vaṭṭappaḷḷy, Sucīndram.

Subject—A panegyric of deities of the directions.

Beginning :

गजवदनमचिन्त्यं तीक्ष्णदन्तं त्रिणेत्रं
प्रहस्तरमशेषं भूतलक्षणं पुराणम् ।
अमरवरसुपूज्यं रक्तवर्णं सुरेशं
पशुपतिसुतमीशं विघ्नराजं नमामि ॥

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाड्
विघ्नोत्तुङ्गकिरिप्रभेदजगिरिर्विघ्नाब्धिकुम्भोद्भवः ।
विघ्नव्यालकुलोपमर्दगरुडो विघ्नेभपञ्चानना-
विघ्नप्रौढघनप्रचण्डपवनो विघ्नेश्वरः पातु नः ॥

हेमाम्भोचतुराननादिभिनयनं हेमाम्बरधारिणं?
नानास्थावरजङ्गमं नरमुखैर्नानापशुस्तु?ष्टितम् ।
वेदे हस्तकमण्डलुक्षधारिणं विश्वम्भिपद्मोद्भवं(?)
तीर्थान्तोत्सवमेवनाथमधुना क्षिप्रं समागच्छतु ॥

End :

ऐशान्यं पञ्चमं प्रोक्तं कुञ्चितं वर्मनालकम् ।
छायागौढसमायुक्तमीशदेशे प्रियार्थकम् ॥

ईशचक्रमयान् सर्वान् दिश विघ्नप्रमादये ।
सावधानेन यागान्तं यावत्सेव्या शिवाज्ञया ॥

Colophon :

स्वस्तिरस्तु । शिवं भवतु ।

Author :

Remarks—The Ms. is full of scribal errors.

## ॥ ब्रह्मयामलम् ॥

## No. 1103 B. BRAHMAYĀMALAM.

C. O. L. No. 1982 B.

Substance—Palm leaf. Size—9′ × 1″. Leaves—27. 7—9 lines per page and 25 letters per line. Script—Tamil Grantha. No. of Granthas—350. Incomplete.

Owner—Same as No. 1103 A.

Subject—The rites relating to consecration etc.

Beginning :

कैलासपर्वतमध्यस्थं देवदेवमुमापतिम् ।
ज्योतिष्कनिलयावासं सर्वज्ञं सर्वतोमुखम् ॥

सदाशिवं परं शम्भुं विद्यामूर्तिं त्रिलोचनम् ।
ज्ञानविज्ञानरूपं तु सर्वतत्त्वालयं प्रभुम् ॥

विद्यापीठसमारूढं ब्रह्मविष्ण्विन्द्रपूजितम् ।
विश्वेशं विपुलं शान्तं मातृभिः परिवारितम् ॥

मन्त्रतन्त्रात्मरूपं तं मङ्गलागमकारणम् ।
रुद्रैः समावृतं देवं योगिनीगणसेवितम् ॥

यक्षगन्धर्वभूताद्यैः पिशाचैः परिपालितम् ।
सदा त्रिदशसङ्घातमीश्वरं शिवमव्ययम् ॥

मध्ये ब्रह्मा समुत्थाय देवानां तु सनातनः ।
कृताञ्जलिरसौ भूत्वा प्रणम्यैतद्वचोऽब्रवीत् ॥

श्रुतं मातृमहातन्त्रमधिविस्तारसाधनम् ।
प्रपञ्चं यामलानां तु नवभेदं तु भैरवम् ॥

आनन्दं कुरु भेदश्च(?) सप्रपञ्चं पुरा मया ।
इदानीं श्रोतुमिच्छामि सारं सर्वस्य साधनम् ॥

अल्पग्रन्थं महार्थञ्च नानाविधिविभूषितम् ।
प्रतिष्ठातन्त्रमित्याख्यं यामलानवनिर्णयम् ॥

End :

उपशोभा च शुक्लेन कोणाः श्यामेन पूरयेत् ।
वाल्लिभिश्च लताभिश्च वीथ्याकारं प्रभूषयेत् ॥

तत्तदङ्गानि विन्यस्य पीतवर्णेन राजसा ।
ऐन्द्रं तु पूजयेद्वज्रं रक्तवर्णेन संयुतम् ॥

श्वेतेन पूरयेद्विद्वान् मातृमण्डलमुत्तमम् ।

Colophon :

इति ब्रह्मयामले सपादलक्षे विद्यापीठावतारिते प्रतिष्ठातन्त्रे एकाशीतिविधानाङ्के मातृपूजाधिकारो नाम चतुर्थोऽध्यायः ।

Author :

Remarks—The Ms. comprises chapters 1—4. Then follow 6 leaves containing topics relating to Bodhāyanasūtra.

॥ दुर्गापूजाविधिः ॥

No. 1103 C. DURGĀPŪJĀVIDHI.

C. O. L. No. 1982 C.

Substance—Palm leaf. Size—9″ × 1″. Leaves—5. 8 lines per page and 24 letters per line. Script—Tamil Grantha. No. of Granthas—60. Incomplete.

Owner—Same as No. 1103 A.

Subject — The rites relating to the worship of Durgā.

Beginning:

दुर्गापूजाविधिः । सङ्कल्पः ।

कर्ता स्नात्वा आचम्य स्वस्तिवाचनं कृत्वा वाद्यघोषणपुरस्सरम् अस्माकमित्यादि पापक्षयार्थम् आयुष्यसवाप?सगुणानेकसत्पुत्रावाप्त्यर्थं सर्वदा दिग्विजयसिद्ध्यर्थं.... ...स्त... ...श्वर्याधिराज्याभिवृद्ध्यर्थम् अत्र चतुर्थवर्तमानामहालक्ष्मी (स्तयंता?) युतोऽपि महदैश्वर्याभिवृद्ध्यर्थं दुर्गाप्रीत्यर्थं षोडशोपचारपूजां करिष्ये ।

End:

अथ दिक्पालकपूजा—

इन्द्राय नमः । अग्नये नमः । यमाय नमः । निर्ऋत्यै नमः । वरुणाय नमः । वायवे नमः । कुबेराय नमः । ईशानाय नमः ।

Colophon:

Author:

Remarks—The Ms. deals also with the worship of the *Dikpalas*. The last four leaves contain Candraśekharāṣṭaka.

॥ नारायणस्तोत्रम् ॥

No. 1103 D. NĀRĀYAṆASTOTRAM.

C. O. L. No. 1982 D.

Substance—Palm leaf. Size—9″ × 1″. Leaves—5. 4—6 lines per page and 24 letters per line. Script—Tamil Grantha.
Incomplete.

Owner—Same as No. 1103 A.

Subject—Glorification of Viṣṇu.

Beginning :

ब्रह्मोवाच —

नौमीड्य, तेऽभ्रवपुषे तडिदम्बराय
गुञ्जावतंसपरिपिञ्छलसन्मुखाय ।
वन्यस्रजे कवलनेत्रविषाणवेणु-
लक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय ॥

अस्यापि देव वपुषो मदनुग्रहस्य
स्वेच्छामयस्य नतु भूतमयस्य कोऽपि ।
नेशे महित्ववसितुं मनसान्तरेण

ज्ञाने प्रयासमुदपास्य नमन्त एव
जीवन्ति सन्मुखरितां भवदीयवार्ताम् ।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभि-
र्ये प्रायशोऽजित! जितोऽप्यसि तैस्त्रिलोक्याम् ॥

End :

तच्चेज्जलस्थं तव सज्जगद्वपुः
किं मे न दृष्टं भगवंस्तदैव
किं वा सुदृष्टं हृदि मे तदैव
किं नो सपद्येव पुनर्व्यदर्शि ॥

अत्रैव मायाधमनावतारे
ह्यस्य प्रपञ्चस्य बहिःस्फुटस्य ।
कृत्स्नस्य चान्तर्जठरे जनन्या
मायात्वमेव प्रकटीकृतं ते ॥

यस्य कुक्षाविदं सर्वं सात्मं भाति यथा तथा
तत्त्वय्यपीह तत्सर्वं किमिदं मायया विना ॥

अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शित-
मेकोऽसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता अपि ।
तावन्तोऽसि चतुर्भुजास्तदखिलैस्साकं मयोपासिता-
स्तावन्त्येव जगन्त्यभूस्तदमितं ब्रह्माद्वयं शिष्यते ॥

अजानतां त्वत्पदवीमनात्म-
न्यात्मात्मना भासि वितत्य मायाम्।
सृष्टाविवाहं जगतो विधान
इव त्वमेषोऽन्त इव त्रिनेत्रः ॥

Colophon :

Author :

Remarks—The text is borrowed from Adhyāya 14, *Skandha* 10, Bhāgavata.

---

## ॥ नारायणीयम् (भाषाव्याख्योपेतम्) ॥

No. 1104. NĀRĀYAṆĪYAM
with Malayāḷam commentary.

C. O. L. No. 263.

Substance—Paper. Size—$10\frac{3}{4}'' \times 8\frac{1}{2}''$. Pages—411. 22 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—5650. Complete.

Owner—C. O.

Subject—A panegyric of Nārāyaṇa.

Beginning :

सान्द्रानन्दावबोधात्मकमनुपमितं कालदेशावधिभ्यां
निर्मुक्तं नित्यमुक्तं निगमशतसहस्रेण निर्भास्यमानम्।
अस्पष्टं दृष्टमात्रे पुनरुरुपुरुषार्थात्मकं ब्रह्मतत्त्वं
तत्तावद्भाति साक्षाद् गुरुपवनपुरे हन्त भाग्यं जनानाम्।

സാന്ദ്രാനന്ദാവബോധാത്മകമായി അനുപമിതമായി കാലദേശാവധികളോട്ട നിർമ്മുക്തമായി നിത്യമുക്തമായി നിഗമശതസഹസ്രം കൊണ്ടു് അസ്പഷ്ടമാകുംവണ്ണം നിർഭാസ്യമാനമായി ദൃഷ്ടമാത്രത്തിങ്കൽ ഉരുപുരുഷാർത്ഥാത്മകമായി തത്വമായിരിക്കുന്ന ബ്രഹ്മം ഗുരുപവനപുരത്തിങ്കൽ തത്താവത്തായിട്ടു പ്രത്യക്ഷമായിട്ടു ശോഭിക്കുന്നു. ജനങ്ങളുടെ ഭാഗ്യമാർചഷ്ടം സാന്ദ്രമായിരിക്കുന്ന ആനന്ദവും സാന്ദ്രമായിരിക്കുന്ന അവബോധവും ആത്മകമായിരിക്കുന്നതു്-പൂർണമായിരിക്കുന്ന ജ്ഞാനവും സ്വരൂപവും ലോകങ്ങളിൽവച്ചു ശ്രേഷ്ഠമായിരിക്കുന്ന ബ്രഹ്മലോകത്തിങ്കൽ കൂടെ ഒരു ആനന്ദമനുഭവിക്കുമ്പോൾ മറ്റുള്ള ആനന്ദങ്ങൾ അനുഭവിയ്ക്കായ്കയും സമാധിങ്കൽ ബ്രഹ്മാനന്ദമുദിക്കുമ്പോൾ തങ്ങടെ ആനന്ദങ്ങളെ നിരൂപിയ്ക്കായ്കയും ചെയ്കഹേതുവായിട്ടു ബ്രഹ്മാനന്ദത്തിന്നു തന്നേ പൂർണാനന്ദത്വമുള്ളു. ലോകങ്ങളിൽ പഞ്ചേന്ദ്രിയങ്ങളെക്കൊണ്ടുള്ള ജ്ഞാനം തന്നേയുള്ളു. ഒരു ഇന്ദ്രിയംകൊണ്ടുള്ള ജ്ഞാനമില്ല. ഒരു ഇന്ദ്രിയത്തിന്നുതന്നെയും പല ഭേദങ്ങളിൽ ഒന്നിന്റെ ജ്ഞാനത്തിങ്കൽ മറ്റുള്ളവറ്റെടെ ജ്ഞാനമില്ലാ. അതുകൊണ്ടു ബ്രഹ്മജ്ഞാനത്തിനു തന്നേ പൂർണത്വമുള്ളു. അങ്ങനെയിരിക്കുന്ന ആനന്ദവും ജ്ഞാനവും സ്വരൂപമാകുന്നതു്.

End :

अज्ञात्वा ते महत्त्वं यदिह निगदितं विश्वनाथ! क्षमेथाः
स्तोत्रं चैतत्सहस्रोत्तरमधिकतरं त्वत्प्रसादाय! भूयात्।
द्वेधा नारायणीयं श्रुतिषु च जनुषा स्तुत्यतावर्णनेन
स्फीतं लीलावतारैरिदमिह कुरुतामायुरारोग्यसौख्यम् ॥

അല്ലയോ വിശ്വനാഥനായുള്ളോവെ നിന്തിരുവടിയുടെ മഹത്വത്തെയറിയാതെ കണ്ടു് ഇവിടെ യാതൊന്നൊക്കെ നി

ഗദിതമായി ഇതിനെ [illegible] കാമിക്കണമേ. സഹസ്രോത്താമമായിരിക്കുന്ന ഈ സ്തോത്രവും [illegible] തൽപ്രസാദത്തിനായി [illegible] നാരായണീയമായും പ്രതിദിനം [illegible] ലീലാവതാരങ്ങളെക്കൊണ്ടുള്ള സ്തുത്യ[illegible] സ്ഫീതമായുമിരിക്കുന്ന ഈ സ്തോത്രം [illegible] മാണ്ടെ.

Colophon :

श्रीकृष्णाय परब्रह्मणे नमः ।
नारायणीयं [illegible] समाप्तम् ।

Author—

Remarks :

## ॥ प्रज्ञालहरीस्तोत्रम् ॥

### No. 1105. PRAJÑĀLAHARĪSTOTRAM.

C. O. L. No. 903.

Substance — Paper. Size—12¼" × 9¼". Pages—21. 20 lines per page and 17 letters per line. Script—Devanāgarī. No of Granthas—220.

Owner—C. O.

Subject—Glorification of Devī.

Beginning :

विचित्रोऽयं लोकः प्रचुरसुखदुःखव्यतिकरः
कुतो जातः केन ध्रियत इति सञ्चिन्त्य मुनयः ।

तपस्तप्त्वा तीव्रं सकलजननीं व्यक्तविहितां
चिदानन्दाकारां ददृशुरनघां त्वां गिरिसुते! ॥

त्वमेवायं लोकस्त्वमसि परमात्मा गुणमयी
त्वमेवेयं माया सकलजगतां मोहजननी ।
अविद्या विद्या च त्वमसि भवबन्धच्युतिकरी
परा शक्तिः कापि त्वमसि निगमानामविषया ॥

End :

उमे! त्वां सन्द्रष्टुं त्वरितमुपयातं पटुधियं
सदा क्रीडासक्तं कुतुकभरितं कोमलतनुम् ।
कुमारं मत्पौत्रं जनिमरणहीनं कृतवती
क्षणात् त्वत्सायुज्यं वितर सकलस्यापि मम च ॥

तपस्यन्तीं याम्यां दिशमुपगते वारिधितटे
कराभ्यां बिभ्राणां स्रजमतुलकल्हारकलिताम् ।
परं पारं नेतुं भवजलनिधेः संश्रितजनं
गृहीतात्युत्कण्ठां भज हृदय कन्याकृतिमुमाम् ।

Colophon :

प्रज्ञालहरीस्तोत्रम् सम्पूर्णम् ।

Author :

Remarks—The work comprises 102 quartrains. The last verse refers to the goddess at Kanyā-kumāri.

## ॥ बालासहस्रनामस्तोत्रम् ॥

## No. 1106 A. BĀLĀSAHASRANĀMASTOTRAM.

C. O. L. No. 2511 A.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—17. 6 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—230.

Owner—Brahmaśrī Kāśi Vādhyar Avl., Mahādānapuram.

Subject—A panegyric of Bālā.

Beginning:

ओं श्रीरस्तु । श्रीविघ्नगणपतये नमः ।

बालासर्वेश्वरीसहस्रनामप्रारम्भः ।

पुरा कैलासशिखरे नानारत्नोपशोभिते ।
देवदेवं महादेवं समासीनं जगद्गुरुम् ॥

प्रणम्य शिरसा नाथं पार्वती वाक्यमब्रवीत् ।
बाला या त्रिपुरा देवी भुक्तिमुक्तिप्रदायिनी ॥

तस्या नामसहस्रं मे कथयस्व महेश्वर! ।

श्रीमहादेव उवाच—

इतीदं परमं गुह्यं भुक्तिमुक्तिफलप्रदम् ।
सर्वानन्दकरं पुण्यं सर्वसम्पत्तिदायकम् ॥

तव प्रीत्या महादेवि! कथयामि न संशयः ।

End :

किमन्यैर्बहुभिर्वाच्यैः पठनैर्गिरिनन्दिनि! ।
जन्मकोटिसहस्रेण लभन्ते ख्यातुमीश्वरी ॥

एतस्य पठनादेहे धारणाद्वा विशेषतः ।
सत्यश्च साधकस्सत्यं साक्षाद्देवस्सदाशिवः ॥

Colophon :

इति श्रीमहेश्वरपार्वतीसंवादे बालात्रिपुरसुन्दरीदिव्यसहस्रनाम-स्तोत्रं सम्पूर्णम् ।

हरिः । शुभमस्तु । बालात्रिपुरसुन्दर्यै नमः ।

Author :

Remarks :

---

## ॥ बालाखड्गमाला ॥

No. 1106 B. BĀLĀKHAḌGAMĀLĀ.

C. O. L. No. 2511 B.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—5. 6 lines per page and 34 letters per line. Script—Grantha. No. of Granthas—65.

Owner—Same as No. 1106 A.

Subject—Invocation of Devi.

Beginning :

श्रीपार्वत्युवाच—

ओंकारे कुण्डलीवक्त्रे कुण्डल्यापि महाकुले ।
लीयमाना प्रकर्तव्या वर्णोच्चारेण शङ्कर! ॥

श्रीशिव उवाच—

लीयमाना विजानीहि निरालम्बा महापदे ।
अप्रमेया विरूपाक्षा हकारे कुण्डलीं कुरु ॥

आदिक्षान्तं समुत्थाय प्रणवं चान्तरं न्यसेत् ।
एवं विन्यस्य बीजानि रक्ष रक्षेति शूलिनि! ॥

वक्तव्यं साधकेन्द्रेण त्रैलोक्यानन्ददायिनि! ।
रक्ष मां त्रिपुरे! देवि! अस्मदीयमिदं वपुः ॥

End :

करवश्यं नरेन्द्राणां नरनारीवशङ्करम् ।
अणिमादिगुणैश्वर्यं रञ्जनं पापभञ्जनम् ॥

तत्तथा परवस्थायी देवता ब्राह्ममुत्तमम् ।
मालामन्त्रमिदं गुह्यं परमात्मप्रकीर्तितम् ॥

त्रिपुराख्या महादेवी भुक्तिमुक्तिफलप्रदा ।
दर्शकेषु समस्तेषु पाषण्डेषु विशेषतः ॥

दिव्यरूपा महादेवि! सर्वत्र परमेश्वरी ।

Colophon :

इति श्रीरुद्रयामले गौरीश्वरसंवादे श्रीबालाखड्गमाला सम्पूर्णा ।
हरिः । ओम् ।

Author :

Remarks :

---

## ॥ बालात्रिपुरसुन्दरीहृदयम् ॥

No. 1106 C. BĀLĀTRIPURASUNDARĪHṚDAYAM.

C. O. L. No. 2511 C.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—2½. 6 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—35.

Owner—Same as No. 1106 A.

Subject—Worship of Bālā.

Beginning :

श्रीगणेशाय नमः ।

अस्य श्रीबालाहृदयस्तोत्रमहामन्त्रस्य दक्षिणामूर्त्तिः ऋषिः, पङ्क्तिच्छन्दः । श्रीबालापरमेश्वरी देवता । ऐं बीजम् । क्लीं शक्तिः । सौं कीलकम् । श्रीबालापरमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

बालाया हृदयेनैव त्रिकालं सप्तमन्त्रितम् ।
पयः पिबति या वन्ध्या सैव पुत्रवती भवेत् ॥

कृत्यमक्षयरोगी च नानाहवसमुद्भवः ।
त्रिपदं मन्त्रितं तोयं सद्यो निर्माल्यमाप्नुयात् (?) ।

नित्यमष्टोत्तरशतं बालाया हृदयं जपेत् ।
चिन्तितश्च भवेद् देवि! नात्र कार्या विचारणा ॥

Colophon :

इति श्रीज्ञानार्णवे बालात्रिपुरसुन्दरीहृदयं सम्पूर्णम् । हरिः ओम् ।

Author :

Remarks :

## ॥ बालात्रिपुरसुन्दरीकवचम् ॥

No. 1106 D. BĀLĀTRIPURASUNDARĪKAVACAM.

C. O. L. No. 2511 D.

Substance—Palm leaf. Size—10″ × 1½″. Loaves—1½. 6 lines per por page and 36 letters per line. Script—Grantha. No. of Granthas—20.

Owner—Same as No. 1106 A.

Subject—Worship of Bālā.

Beginning :

श्रीगणेशाय नमः ।

बालात्रिपुरसुन्दर्यै नमः ।

श्रीदेव्युवाच—

कवचेन महादेव! बालादेवी प्रसीदति ।
कथयस्व महादेव! कवचं सर्वसिद्धिदम् ॥

ईश्वर उवाच—

श्रृणु देवि! प्रवक्ष्यामि कवचं परमाद्भुतम् ।
यच्छ्रुत्वा मन्त्रवत् सम्यक् फलमाप्नोति पूजनैः ॥

कवचस्य ऋषिर्देवि! दक्षिणामूर्त्तिरव्ययः ।
छन्दः पङ्क्तिस्समुद्दिष्टो श्रीबाला देवता स्मृता ॥

धर्मार्थकाममोक्षाणां विनियोगस्तु साधने ।
कथितं परमेशानि! शंभुना प्रभविष्णुना ॥

End :

मन्त्रसिद्धिकरं पुंसां भूतप्रेतनिवारणम् ।
नरनारीवशकरं सर्वशत्रुविनाशनम् ॥

बालाप्रीतिकरं देवि! कवचं परमाद्भुतम् ।
इदं कवचमज्ञात्वा बालां यो जपते नरः ॥

न तस्य मन्त्रसिद्धिः स्याद् जपेद्वर्षशतैरपि ।

Colophon :

इति श्रीविश्वसारतन्त्रे ईश्वरसंवादे बालात्रिपुरसुन्दरीकवचं सम्पूर्णम् ।

Author :

Remarks :

## ॥ श्रीबालास्तवराजः ॥

## No. 1106 E. SRĪBĀLĀSTAVARĀJA.

C. O. L. No. 2511 E.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—6 lines per page and 35 letters per Script—Grantha. No. of Granthas—50.

Owner—Same as No. 1106 A.

Subject—Invocation of Bālā.

Beginning:

श्रीगणेशाय नमः । श्रीबालास्तवराजप्रारम्भः ।

श्रीगुरुभ्यो नमः ।

स्तुत्यानया त्वां त्रिपुरे! स्तोष्येऽभीष्टफलाप्तये ।
यया व्रजन्ति तां लक्ष्मीं मनुजाः सुरपूजिताम् ॥

ब्रह्मादयः श्रुतिपथैरपि सूक्ष्मरूपां
जानन्ति नैव जगदादिमनादिमूर्त्तिम् ।
तस्माद्वयं कुचनतां नवकुङ्कुमाढ्यां
स्थूलां नुमस्सकलवाङ्मयमात्रभूताम् ॥

End:

शब्दार्थभावभुवनं सृजतीन्दुरूपा
या तद् बिभर्त्ति पुनरर्कतनुः स्वशक्त्या ॥
वह्न्यात्मिका हरति तत् सकलं युगान्ते
तां शारदां सदसि जातु न विस्मरामि ॥

ये स्तुवन्ति जगन्मातः श्लोकैद्वादशभिः क्रमात् ।
त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते परां गतिम् ॥

Colophon :

इति बालास्तवराजं सम्पूर्णम् । हरिः । ओम् ।
श्रीबालात्रिपुरसुन्दर्यै नमः ।

Author :

Remarks :

---

॥ बालात्रिपुरसुन्दरीस्तवराजः ॥

No. 1103 F. BĀLĀTRIPURASUNDARĪ-STAVARĀJA.

C. O. L. No. 2511 F.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—2. 6—7 lines per page and 36 letters per line. Script—Dravidian. No. of Granthas—30.

Owner—Same as No. 1106 A.

Subject—Stuti.

Beginning :

श्रीगणेशाय नमः । श्रीबालास्तवराजम् ।

सुधासागरमध्ये तु कल्पवृक्षे वनान्तरे ।
मणिद्वीपे महासौख्ये चिन्तामणिगृहान्तरे ॥

इन्द्रादिलोकपालैश्च परिवारैश्च सेविताम् ।
सरस्वत्या च लक्ष्म्या च सिंहासनपरिस्थिते ॥

बीजमध्ये महादेवीं कौमारीं च शुभप्रदाम् ।
सुप्रसन्नां भजेद् बालां वरदाभीष्टदायिनीम् ॥

End :

अनङ्गवेगिनी रेखा अनङ्गमदनातुरा ।
अनङ्गशतनामाख्या तल्पश्चानङ्गमालिनी ॥

बहिरष्टदले स्थित्वा पूजनीयं यथाक्रमात् ।
इन्द्रादिलोकपालैश्च पूजयेद् भूपुरेषु च ॥

एवं क्रमेण पूजान्ते देवीं बालां च सर्वदा ।
नित्यनैमित्तिकांस्त्यक्त्वा सद्भक्त्या नात्र संशयः ॥

Colophon :

इति श्रीरुद्रयामले बालात्रिपुरसुन्दरीस्तवराजं सम्पूर्णम् ।

Author :

Remarks :

---

## ॥ बालाष्टोत्तरम् ॥

No. 1106 G. BĀLĀṢṬOTTARAM.

C. O. L. No. 2511 G.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—3.

8 lines per page and 24 letters per line. Script—Grantha. No. of Granthas—36.

Owner—Same as No. 1106 A.

Subject—Stuti.

Beginning :

उमायै नमः ।
सम्मोहिन्यै नमः ।
देव्यै नमः ।
सुन्दर्यै नमः ।
भुवनेश्वर्यै नमः ।
एकाक्षर्यै नमः ।
महामायायै नमः ।
एणाङ्कायै नमः ।
एकनायकायै नमः ।
एकरूपायै नमः ।
महारूपायै नमः ।

End :

परमेश्वर्यै नमः ।
त्रैलोक्यजनन्यै नमः ।
देव्यै नमः ।
परदेवतायै नमः ।

Colophon :

Author :

Remarks :

## ॥ बालास्तोत्रम् ॥

## No. 1106 H. BĀLĀSTOTRAM.

C. O. L. No. 2511 H.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—2. 6—7 lines per page and 65 letters per line. Script—Grantha. No. of Granthas—30.

Owner—Same as No. 1106 A.

Subject—Stuti.

Beginning :

श्रीगुरुभ्यो नमः । गणपतये नमः ।

ऐं आनन्दवल्ली अमृतकरतली आदिशक्तिः परायी
माया मायास्वरूपी स्फटिकमणिमयी मामतङ्गी षडङ्गी ।
ज्ञानी ज्ञानार्थभोगी सहजसुखकरी नादहुंकारमात्री
योगी भोगार्थतन्वी भुवनवशकरी सुन्दरी ऐं नमस्ते ॥

क्लीं कामकलाविलासकुशला कल्याणरूपासिता
कामार्ता तरुणी विशालनयना पाशाङ्कुशौ धारिणी ।
माहेश्वर्यक... ...मदिनयना श्रीकल्पवल्लीलता
सान्निध्यं कुरु सर्वदा ह्यनुदिनं क्लींकारिणी भास्वरा ॥

End :

आधारे तरुणार्कबिम्बरुचिरं हेमप्रभावोद्भवं
बीजं मान्मथमिन्द्रगोपसदृशं हृत्पङ्कजे संस्थितम् ।
रन्ध्रे ब्रह्मपथस्य? शाक्तमपरं सोमप्रभाभासुरं
ये ध्यायन्ति पदत्रयं तव शिवे! ते यान्ति सौख्यं पदम् ॥

इत्थं हि बालास्तुतिबद्धमन्त्रं
श्लोकाष्टकं यः पठतीह भक्त्या ।
तस्मै ददात्यन्नसमृद्धि बाला
श्रियश्च वाणीञ्च यशश्च मुक्तिम् ॥

Colophon :

इति श्रीरुद्रयामले बालास्तोत्रं सम्पूर्णम् । शुभमस्तु ।

Author :

Remarks :

## ॥ भक्तिसंवर्द्धनशतकम् ॥

No. 1107. BHAKTISAMVARDHANAŚATAKAM.

C. O. L. No. 601.

Substance—Paper. Size—11½″ × 8½″. Pages—26. 17 lines per page and 17 letters per line. Script—Devanāgarī. No. of Granthas—235.

Owner—C. O.

Subject—A panegyric of Viṣṇu.

Beginning :

जातं जातं खलु जगदहो चित्रमेतत् समस्तं
क्षीणं क्षीणं मुहुरपि परं दृश्यते यत्प्रभावात् ।
तस्मै साक्षात् स्वरसपरमानन्दवीचीमयाय
ब्रह्माख्याय त्रिभुवनपते! देव! तुभ्यं नमोऽस्तु ॥

जीवात्मा यद् भ्रमति बहुशोऽप्यत्र संसारचक्रे
तत्त्वं मायाविलसितमतः प्राञ्जलिः प्रार्थयेऽहम् ।
मा नामा हं जनुपि भगवन्! जन्म सम्पत्स्यते चेत्
धर्माभ्यर्हं भवतु भुवनाधीश! मानुष्यमेव ॥

End :

मत्यज्ञानं मुहुरपि महायोगिभिश्चिन्त्यमानं
पूर्णानन्दामृतलहरिकाजालमाद्यं तुरीयम् ।
ओङ्कारार्थं परममसृतं त्वंनिषेधावशेषं
ब्रह्माद्वैतं परमपुरुषं स्वात्मबोधं स्मरामि ॥

स्तोत्रं विष्णोरिति मृदुपदैः सुप्रसन्नैः शतेन
श्लोकैरेभिर्विरचितमिदं भक्तिसंवर्द्धनाख्यम् ।
भक्त्या युक्तः पठति खलु यः प्रातरुद्धाय नित्यं
प्राणापाये व्रजति स हरेर्धाम निर्वाणनाम ॥

Colophon :

इति भक्तिसंवर्धनशतके उत्तरभागः ।

भक्तिसंवर्धनं नाम श्लोकानां शतकं मया ।
ब्रह्मदत्ताभिधानेन स्तोत्रं विष्णोर्विनिर्मितम् ॥

Author—Brahmadatta.

Remarks:

---

## ॥ भारतसावित्री ॥

### No. 1108 A. BHĀRATASĀVITRĪ.

O. L. No. 1678 A.

Substance—Palm leaf. Size—14" × 1⅜". Leaf—1. 22 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—36. Incomplete.

Owner—Śrī Kumāran Mūttatu Avl., Kadutturitti.

Subject—A Compendium of Bhārata.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

धृतराष्ट्र उवाच—

ब्रूहि सञ्जय! यद्वृत्तं युद्धे तेषां महात्मनाम् ।
पाण्डवानां कुरूणां च सम्प्रवृत्ते महाक्षये ॥

केचिदत्र महायोधाः केचिदत्र महारथाः ।
महाबलास्तु के तत्र कथं ते विनिपातिताः ॥

भीष्मद्रोणौ कथं भग्नौ कर्णशल्यौ कथं हतौ ।
पुत्रस्तु मम मन्दात्मा न श्रृणोति सुदुर्मतिः ॥

सञ्जय उवाच—

शृणु राजन्! यथावृत्तं सर्वं [illegible] ।
अर्जुनः सात्यकिश्चैव धृष्टद्युम्नो घटोत्कचः ॥

शिखण्डिश्चाभिमन्युश्च [illegible] च ।
विराटश्चोत्तरश्चैव द्रुपदश्च महारथाः ॥

नकुलः सहदेवश्च धर्मराजो युधिष्ठिरः ।
युधिष्ठिरपुरोगाश्च त्रयोदश महारथाः ॥

पाण्डवानां कुले योधाः सर्वे विष्णुपराक्रमाः ।
कौरवाणां कुले योधाः सर्वे [illegible]प्रभाः ॥

End :

दिनानि दश भीष्मेण भारद्वाजेन पञ्च च ।
दिनद्वयं तु कर्णेन शल्येनार्धदिनं तथा ॥

दिनार्धन्तु गदायुद्धमेतद्भारतमुच्यते ।
सर्वक्षत्रक्षयकरे कुरुक्षेत्रे महात्मनः ॥

पार्थो आरोहयन् स्वर्गं राजपुत्रान् यशस्विनः ।
रणसंज्ञेन यज्ञेन दीक्षितोऽयं युधिष्ठिरः ॥

वेदिं कृत्वा कुरुक्षेत्रं यूपं कृत्वा जनार्दनम् ।
दुर्योधनं पशुं कृत्वा कर्णं कृत्वा महाहविम् ॥

पाञ्चालीमरणिं कृत्वा वह्निं कृत्वा वृकोदरम् ।
होतारमर्जुनं चैवं यजमानो युधिष्ठिरः ॥

गाण्डीवेन सुवेणैवं दूयमानेन राजसु ।
अयाचितमपि द्रव्यमभुक्त्वा द्रव्यवार्जितम् ॥

इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
न भयं विद्यते किञ्चित्कार्यसिद्धिर्भविष्यति ॥

... ... ...समेषु विषमेषु च ।
अहोरात्रकृतं पापं श्रूयमाणस्य नश्यति ॥

संवत्सरकृतं पापं पठ्यमानस्य नश्यति ।
यत्फलं गोसहस्रस्य स्वर्णेनालंकृतस्य च ॥

... ... ... .... ... ... ।

Colophon :

Author :

Remarks :

---

## ॥ युधिष्ठिरविजयव्याख्या ॥

## No. 1108 B. YUDHIṢṬHIRAVIJAYA-VYĀKHYĀ.

C. O. L. No. 1678 B.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—87. 9—11 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2175. Incomplete.

Owner—Same as No. 1108 A.

Subject—Exposition of Yudhiṣṭhiravijaya.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सपितामहेत्यादि —ततः सुयोधनः सपितामहतातेन महता तेन स्वजनेन अर्थितोऽपि तेभ्यो राज्यदानवाञ्छां न तु कृतवान् । सपितामहतातेन पितामहो भीष्मः, तातः पिता तत्सहितेन महता स्वजनेन द्रोणकृपादिना अर्थितः प्रार्थितोऽपि तेभ्यः पार्थेभ्यः राज्यदानवाञ्छां न कृतवान् । शान्तेभ्यः शक्तौ सत्यामपि प्रशान्तचित्तेभ्यः इत्यर्थः । गुरुवचनातिक्रमेणास्याविवेकित्वं व्यज्यते ।

End :

सुखेत्यादि—सः भारतः नागसाह्वये पुरे सुखेन अवसत् । पुरा पुरूरवाः इव गां ररक्ष । सः गोविन्दोपबृंहितमहाप्रभावशाली यथाविधि अश्वमेधं विधाय दक्षिणादिभिः ऋत्विजः प्रसाद्य वासुदेवानुमत्या सपत्नीको भेरीमृदङ्गपणवादिमहावाद्यघोषितदिक्चक्रवालः अलङ्कृतास्थानमण्डपो भूत्वा सुखेन नागसाह्वये आह्वयेन सह वर्तमानं साह्वयं नागेन साह्वयं यस्य सः । हस्तिनापुरे । भारतः भरतगोत्रापत्यतां प्राप्तः सत्सभारतः सतां सज्जनानां सभायां रतः पुरूरवसो निर्विशेषं भूमिं रक्षितवान् ।

Colophon :

इति श्रीकण्ठदासविरचिते पदार्थविचिन्तननाम्नि व्याख्याने अष्टम आश्वासः ।

अलिकेक्षण...शिशोषितकुसुमाशुगवपुषं
गिरिजामुखसरसीरुहमधुरासवमधुपम् ।
मधुजिद्विधिमकुटारुणमणिभासुरचरणं
गिरिशं हृदि कलये पुरुभूगमन्दिरवसतिम् ।।

नमः शिवाय ।

Author :

Remarks—The work covers the portion from the 73rd verse of the 6th Āśvāsa to the 8th Āśvāsa.

---

## ।। रघुवंशप्रकाशिका ।।

No. 1108 C. RAGHUVAMŚAPRAKĀŚIKA.

C. O. L. No. 1678 C.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—86. 9—11 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—2350. Incomplete.

Owner—Same as No. 1108 A.

Subject—Explanation of Raghuvaṃśa.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नेन परिसमाप्तिरस्तु ।

नमस्तस्मै गणेशाय यत्प्रसादान्महीयसाम् ।
आरम्भाः फलपर्यन्ताः परानुग्रहहेतवः ।।

नमामि निखिलातङ्कनिर्वापणमहौषधिम् ।
मातरं जगतामेकां चन्द्रशेखरवल्लभाम् ॥

कृतिर्या कालिदासस्य सर्वार्थिसुरपादपः ।
तस्यास्य रघुवंशस्य बहुमार्गावगाहिनः ॥

अरुणाचलनाथेन द्विजपादाब्जसेविना ।
शिवदासापराख्येन मया टीका वितन्यते ॥

आलोक्य पूर्वटीकां च लक्षणानि च धीमताम् ।
विनिर्मिता मया सेयं सोपयोगा भविष्यति ॥

न चेह पूर्वटीकाभिः कैमर्थक्यं प्रतीयताम् ।
यतो विद्वन्मता? सर्वो न सर्वं पश्यतीति वाक् ॥

सर्वविद्यासमत्वानामादर्शं चात्र लक्ष्यते ।
प्रबन्धेऽस्य कवीन्द्रस्य सर्वलोकातिशायिता ॥

शतं प्रकरणानां यत् साशि? कृतवान्मुनिः ।
विष्णुगुप्तोऽर्थशास्त्राब्धेस्तत्प्रायोऽत्र निदर्शितम् ॥

चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत् ।
इत्युक्तवान् भामहो हि सर्गबन्धस्य लक्षणे ॥

रसानुगुणशब्दार्थव्यवहारे नियामिका ।
भारतीया स्थितिश्चात्र सम्यक् सर्वा समर्पिता ॥

कामसूत्रार्थतत्त्वं च कलाशास्त्रविनिश्चयः ।
देवतापारमार्थ्यं च धर्मशास्त्रगतिस्तथा ॥

इतिहासप्रमेयाणि मोक्षशास्त्रविधिस्तथा ।
स्थितिः परापि तन्मत्रैं कवीन्द्रेणात्र दर्शितम् ॥

अभिप्रायेण चैतेन धीरोदात्तादिभेदिनाम् ।
अनेकेषां नरेन्द्राणां वृत्तं वर्ण्यतयाश्रितम् ॥

तादृशोऽस्य प्रबन्धाब्धेः कस्तलं गन्तुमर्हति ।
यथामति विचारे च कस्य वा नास्ति योग्यता ॥

वाक्यार्थतत्त्वावगमो नालङ्कारगतिं विना ।
ततो मयार्थालङ्कारा बाहुल्येनात्र दर्शिताः ॥

आलस्यादपरिज्ञानादतिविस्तारभीतितः ।
अनुल्लेखितया चात्र कश्चित्केचिन्न वर्णिताः ॥

क्रियते च प्रदेशेषु यथाभावनिरूपणम् ।
यतो निर्जीवतां याति काव्यं तेन विना कृतम् ॥

अनुप्रासादिरूपश्च क्वचित्किञ्चिन्निरूप्यते ।
यतः शब्दविशेषाणां लोके सिद्धा रसाङ्गता ॥

गुणानां देशतां? व्याप्ता वाणी यद्यपि सत्कवेः ।
तथापि दुष्करे तत्र प्रनिपत्प्रतिपादने ॥

तादृगन्यच्च काव्याङ्गं स्वयमूह्यं मनीषिभिः ।
को वा सर्वविशेषाणामुन्मेषं कर्तुमर्हति ॥

तत्प्रसन्नेन मनसा गुणलेशेऽपि सादराः ।
सन्तः शृण्वन्त्विमां टीकां रघुवंशप्रकाशिकाम् ॥

ननु रघुवंशशब्दे कस्समासः । तत्पुरुषः रघोर्वंश इति । (तत्र रघुवंशः इति?) तत्र रघुवंशः प्रबन्ध इति कथं सामानाधिकरण्यमर्थपरत्वात्। तर्हि बहुव्रीहिः रघोर्वंशोऽस्मिन्निति । ननु तत्रापि कथं रघुवंशः काव्यमिति । तर्हि पुनरस्तु तत्पुरुषः । तत्रोक्तो दोष इति चेन्नैतत्। अभिधेयेनाभिधायकमपि व्यपदिशन्ति कवयः । यथा जानकीहरणं प्रबन्धः शिशुपालवधः काव्यमिति । इह खलु शिष्टाचारमनुसरन्

"आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" ।

इति प्रबन्धमुखलक्षणास्थितिं चानुविदधानः प्रारिप्सितप्रबन्धाविघ्नपरिसमाप्त्यादिसिद्धये कविरिष्टदेवतानमस्कारं करोति—वागर्थाविति ।

End :

अभिभूयेति । आर्तवीमृतूत्थाम्? मधुगन्धयोर्दिव्यत्वलक्षणेनातिशयेन। मधु मकरन्दः वीरुधां लतानाम् उरश्छदः कञ्चुलिका। तस्य कोटिष्वाश्रिषु । तास्तु शिल्पिभिश्चारुत्वाय विरच्यन्ते ।

क्षणेति—मात्रशब्दोऽवधारणे। सखिशब्देन संश्लेषो लक्ष्यते । प्रयोजनं चानुरूपत्वम् । अवलोकयेति । आ सुरपुष्पदर्शनादिति दर्शनस्य शापावधित्वेन वक्ष्यमाणत्वात् । विह्वला परवशा । निमिमलितेति मरणं लक्ष्यते । निमीलनं नेत्रादन्यत्रारोपेण वर्त... ...दः नैघण्टुकास्तु—'अथ मरणे स्यान्निमलि.... ... ..."

Colophon :

इति समाप्तः सर्गः ।

Author—Aruṇācalanātha (commentator).

Remarks—The work breaks off at the 37th verse in the 8th Sarga. The commentator is also known as Śivadāsa.

---

## ॥ मार्यष्टकम् ॥

### No. 1109 A. MĀRYAṢṬAKAM.

C. O. L. No. 1680 A.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—3. 9 lines per page and 20 letters per line. Script — Malayāḷam. No. of Granthas — 34. Complete.

Owner — Viṣṇu Nambūrī Avl., Eṭṭikkādu Illom, Vaikom.

Subject—Eulogy on the goddess Kāḷi.

Beginning :

बद्ध्वा खट्वाङ्गकोटौ कपिलमुरुजटामण्डलं पद्मयोनेः
कृत्वा दैत्योत्तमाङ्गैः स्रजमुरसि शिरःशेखरं तार्क्ष्यपक्षैः ।
पूर्णं रक्तासवौघैर्यममहिषमहाश्रृङ्गमादाय पाणौ
पायाद्वो वन्द्यमानः प्रलयमुदितया शङ्करः काळराञ्या ॥

तैलाभ्यक्तैकवेणी त्रपुमयविलसत्कुण्डलाक्रान्तकर्णा
लोहेनैकेन कृत्वा चरणनिगळनेनात्मनः पादशोभाम् ।
दिग्वासा रासभेन भ्रमति जगदिदं या जपाकर्णपूरा-
मार्जन्यध्वप्रवृद्धध्वजविधृतभुजा वेत्सि देवि! त्वमेव ॥

End :

ब्राह्मी ब्रह्मनमस्कृता भवहिता माहेश्वरी मान्याना
कौमारी सुकुमारमूर्तिरचला चक्रायुधा वैष्णवी ।
वाराही वरघोणझर्झरमुखी ऐन्द्री सुरैरर्चिता
चामुण्डी गणनाथरुद्रसहिता रक्षन्तु मां मातरः ॥

मारिद्रोहमसूरिकाभयहरं बालग्रहापहं
चोरव्याघ्रमहोरगादिविषमक्षुद्रज्वरोत्सादनम् ।
श्रीसौभाग्यसुखावहं सुखमुखोदर्कं सुरक्षाप्रदं
तन्मार्याष्टकमेतदिष्टफलदं स्तोत्रं त्रिसन्ध्यं जपेत् ॥

Colophon :

इति मार्यष्टकं समाप्तम् ।
हरिः । श्रीकृष्णाय नमः । हरिः ।

Author :

Remarks—The panegyric on the goddess Kāḷi forms the subject matter of the Ms. Other topics are also dwelt upon here.

---

## ॥ वरमङ्गलाष्टकम् ॥

No. 1109 B. VĀRAMAṄGAḶĀṢṬAKAM.

C. O. L. No. 1680 B.

Substance—Palm leaf. Size—10½" × 1½". Leaves—2.

9 lines per page and 22 letters per line. Script — Malayāḷam. No. of Granthas — 25. Complete.

Owner—Same as No. 1109 A.

Subject—Panegyrics of Harihara, Brahma etc.

Beginning:

श्रीमत्पद्मजविष्टरौ हरिहरौ वायुर्महेन्द्रोऽनल-
श्चन्द्रो भास्करवित्तपालवरुणप्रेताधिपा दिग्गजाः ।
प्रद्युम्नो नळकूबरः सुरगुरुश्चिन्तामणिः कौस्तुभः
स्वामी शक्तिधरो गदाङ्कुशधरः कुर्वन्तु मे मङ्गलम् ॥

गौरी श्रीरदितिश्च कद्रुविनते भूतिः सुपर्णी उषा
सावित्री च सरस्वती च सुरभिः सत्यव्रतारुन्धती ।
स्वाहा जाम्बवती च रुक्मिभगिनी दुःस्वप्नविध्वंसिनी
वेलाश्चाम्बुनिधेः समीनमकराः कुर्वन्तु मे मङ्गलम् ॥

End :

सिद्धार्थौ यदि भारतं सुरुचिरं पूर्णं च कुम्भं जलैः
शङ्खो वारिजपुष्पशुक्तिरजतौ गो... ...श्रीफलम् ।
विप्रा वेदविदः प्रभातसमये गौः काञ्चनं व्रीहयो
दौर्वाग्रास्तिलतण्डुलाः प्रतिदिनं कुर्वन्तु मे मङ्गलम् ॥

Colophon :

इत्येतद्वरमङ्गलाष्टकमिदं पापौघविध्वंसनं
पुण्यं सम्प्रति काळिदासकविना वृत्तप्रबन्धीकृतम् ।

यः प्रातः शृणुयात् पठेच्च नियतं निर्व्याजभक्त्या त्वसौ
गङ्गासागरसंगमे निवसतः प्राप्नोति सर्वं फलम् ॥

वरमङ्गलाष्टकस्तवमिदं समाप्तम् । हरिः ।

Author—Kāḷidāsa.

Remarks — Though this work is attributed to one Kāḷidāsa it is doubtful whether the author is identical with the famous Indian Shakespeare.

---

## ॥ नयसूत्रवाक्यम् ॥

No. 1109 C. NAYASŪTRAVĀKYAM.

C. O. L. No. 1680 C.

Substance—Palm leaf. Size—$7\frac{5}{8}'' \times 1\frac{1}{2}''$. Leaves—20. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 200. Complete.

Owner—Same as No. 1109 A.

Subject—Politics.

Beginning—Same as No. 1305, DCSMMPL.

End :

सर्वमनित्यमध्रुववच्च । स(र्वं?र्व)देशे देहिनां मतिर्महती । कृमिशकृन्मूत्रभाग्यं शरीरम् । अन्यपापमेव जन्महेतुः । जन्म मरणादपि दुःखम् । तपसा स्वर्गमवाप्नोति । क्षमायुक्तस्य तपो विवर्धते ।

Colophon:

इति (शा?चा)णक्याचार्यकृतं नयसूत्रवाक्यं समाप्तम् !

× × × × × +

Author—Cāṇakyācārya.

Remarks—The royal functions and the obligatory formalities between the Ruler and the ruled are set forth in this work. The text a lone is seen here.

---

## ॥ महाभाष्यप्रदीपविवरणम् ॥

## No. 1109 D. MAHĀBHĀṢYAPRADĪPA-VIVARAṆAM.

C. O. L. No. 1680 D.

Substance—Palm leaf. Size—$7\frac{5}{8}'' \times 1\frac{1}{2}''$. Leaves—36. 8—9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 612.

Owner—Same as No. 1109 A.

Subject—An elaborate exposition of Pradīpa, a commentary on the Mahābhāṣya.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । ओम् ।

भूवा— कुतोऽयामिति किंशब्दः क्षेपे । हेतौ च 'पञ्चम्यास्त-सिलि'ति। व्याचष्टे लक्षणभावमिति। साधुशब्दप्रयोगस्य लक्षणानुसा-

रेण प्रवर्तनाल्लक्षणमित्युक्तम् । उच्यते । तच्च वकारस्योकारसहितस्य नास्तीति तत्प्रयोगसूत्रेणोपपद्यते इति भाष्यार्थः । संहिताशब्देन संहिताकार्यम् । लक्षणादेर्देशोऽपि वक्ष्यते । तस्य चोन्निवर्त्तनद्वारा निर्देशविशेषं प्रति करणत्वमित्याह यणादेशेनेति । अभ्युपगम्यवादस्य प्रयोजनमाह— तस्यां सर्वथेति ।

End :

यदि स्वरितत्वप्रतिज्ञानेन पूर्वो विधिः परं बाधते नित्यादिविधीनपि बाधेतेत्यत आह—तुल्यजातीयस्येति । भाष्ये अधिकारगतिस्त्वर्थेत्युक्तार्थसङ्ग्रहश्लोकः । विशेषायेति । साङ्काशकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यादिविशेषविषयेऽपि सिद्ध्यर्थमित्यर्थः ।

यद्वा—अविशेषाय गौणमुख्ययोरविशेषेण कार्यप्रवृत्त्यर्थमित्यर्थः।

Colophon :

इति नारायणीये श्रीमन्महाभाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ।

नमः श्रीमत्पाणिनिकात्यायनपतञ्जलिभ्योऽस्मद्गुरुभ्यो नमः।

हरिः ।

Author—Nārāyaṇa Bhaṭṭa.

Remarks—Kaiyaṭa's Pradīpa is exhaustively commented upon in this Ms. It covers only the 1st chapter of the 3rd pāda of the 1st Āhnika. The author of Prakriyāsarvaswom and this grammarian are supposed to be identical. (see O. C. page 441).

---

## ॥ मुकुन्दमाला (भाषाव्याख्योपेता) ॥

## No. 1110. MUKUNDAMĀLĀ
### with Malayāḷam commentary.

C. O. L. No. 68.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—21. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 250.

Owner—Udayamperūr Thekkeḍattu Nambūripād.

Subject—A panegyric of Mukunda.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

मुकुन्द! मूर्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम् ।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत्प्रसादात् ॥

हे मुकुन्द अहं भवन्तं मूर्ध्ना प्रणिपत्य इयन्तम् अर्थं याचे ।

എടോ മുകുന്ദനാമായിരിപ്പോവേ ഞാൻ ഭവാനെ മൂർദ്ധാവു കൊണ്ടു നമസ്കരിപ്പുതും ചെയ്തിട്ടു് ഈയർത്ഥത്തെ യാചിക്കുന്നേൻ. എങ്ങനെയിരിന്നൊന്നു് അർത്ഥം ഏകാന്തം-നിയതമായിരിന്നൊന്നു്. ത്വച്ചരണാരവിന്ദേ അവിസ്മൃതിഃ ഭവത്-പ്രസാദാത് ഭവേ ഭവേ അസ്തു-ഇനിക്കു് ത്വച്ചരണാരവിന്ദത്തിങ്കലെ അവിസ്മൃതി ഭവത്പ്രസാദംഹേതുവായിട്ടു് ഭവ-ത്തിങ്കൽ ഭവത്തിങ്കൽ ഭവിക്കവേണം.

End :

എടോ ലോകനാഥനായിരിക്കുന്നോയേ നിന്തിരുവടിയുടെ ഭൃത്യന്റെ ഭൃത്യനായിട്ടു് എന്നെ സ്മരിക്കണം.

यस्य प्रियौ श्रुतिधरौ रविलोकवीरौ
मित्रे द्विजन्मवरपारशवावभूताम् ।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण ॥

इयं कृतिः कुलशेखरेण राज्ञा कृता ।

ഈ കൃതി കുലശേഖരനായിരിക്കുന്ന രാജാവിനാൽ കൃതമായി. എങ്ങിനെ ഇരുന്നൊരുത്തൻ രാജാവു്, ശ്രുതിധരൗ പ്രിയൗ രവിലോകവീരൗ ദ്വിജന്മവരപാരശവൗ യസ്യ മിത്രേ അഭൂതാം- ശ്രുതിധരന്മാരായി പ്രിയന്മാരായി രവിലോകവീരന്മാരായിരിക്കുന്ന ദ്വിജന്മവരപാരശവന്മാർ യാവനൊരുത്തന്നു് മിത്രമായി ഭവിച്ചു, തേന-അവനാൽ, അംബുജാക്ഷചരണാംബുജഷട്പദേന-അംബുജാക്ഷന്റെ ചരണങ്ങളാകുന്ന അംബുജത്തിങ്കൽ ഷട്പദമായിരുന്നൊരുത്തൻ ഭഗവദ്ഭക്തനായിരുന്നൊരുത്തൻ.

मुकुन्दमालां जपतां सुराणा-
मशेषसौख्यं भवतीति किं तत् ।
समस्तपापक्षयमेत्य देही
प्राप्नोति विष्णोः परमं पदं तत् ॥

Colophon :

मुकुन्दमाला समाप्ता ।

Author—Kulaśekhara Rāja.

Remarks—The concluding verse bears out that the author was King Kulaśekhara. It is not certain whether the Malayāḷam commentary also was composed by him.

---

## ॥ रामायणसारस्तवः ॥

## No. 1111. RĀMĀYAṆASĀRASTAVA.

C. O. L. No. 407.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{3}{4}''$. Pages—7. 20 lines per page and 14 letters per line. Script—Devanāgarī. No. of Granthas—55.

Owner—C. O.

Subject—A panegyric of Śiva.

Beginning:

नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकं
धर्मो धर्मीति रूपद्वयमयति पृथग्भूयमायावशेन ।
धर्मस्तत्रानुभूतिः सकलविषयिणी सर्वकार्यानुकूला
शक्तिश्चेच्छादिरूपो भवति गुणगुणश्चाश्रयस्यैक एव ॥

वेदज्ञा धर्ममेतं प्रविततमखिलाधारमाकाशमाहुः
किञ्चानन्दं मनोवागविषयमधिकं धर्मिणो वर्णयन्ति ।

सत्तां स्फूर्तिं सुखञ्च त्रयमपि जगतां सङ्गिरन्ते तदंशं
प्राणाकाशादुपास्तिं कतिचिदपि तदालम्बनास्ते वदन्ति॥

End :

लङ्कां सुहृद्वनसुखानुभवादि सर्वं
त्यक्तं मयेति तु वचो न ततो विरल्या(?) ।
श्रीरामचन्द्रकरुणा ... कटाक्षलब्धे-
स्तत्रैव रागपिशुनो हि तदुक्तिशेषः ॥

प्राचेतसाय कवये प्रथमाय तस्मै
तत्काव्यहारतरलाय च राघवाय ।
विश्वात्मने तदुभयास्थिरभावलक्ष्य -
मुख्यास्पदाय विभवे च नमश्शिवाय ॥

Colophon :

इति श्रीमदप्पय्यदीक्षितेन्द्रविरचितः रामायणसारस्तवः समाप्तः ।

Author—Appayyadīkṣita.

Remarks :

---

## ॥ लघुस्तुतिव्याख्या ॥

### No. 1112. LAGHUSTUTIVYĀKHYĀ.

C. O. L. No. 399.

Substance—Paper. Size—14″ × 8½″. Pages—179. 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1610.

Owner—C. O.

Subject—A commentary on Laghustuti.

Beginning :

श्रीपरमेश्वराचार्यप्रणीता लघुबृंहणी ।

नमो निरङ्कुशैश्वर्यगुणायागण्यशक्तये ।
हेरम्बायाम्बिकेयाय विघ्नसङ्घातघातिने ॥

नमो गुर्वागमेभ्यश्च शक्त्यै चिन्मात्रदृग्जुषे ।
जगज्जन्मस्थितिध्वंसबन्धमोक्षैकहेतवे ॥

श्रीमन्महेश्वराचार्यपुत्रोऽहं परमेश्वरः ।
लघुस्तुतिमनोः श्लोकव्याख्यां कुर्वे यथामति ॥

प्रसन्नाः सन्तु सन्तो मे मन्दाः सन्तु यथा तथा ।
भक्तिमात्रपवित्रीयं व्याख्यास्तु लघुबृंहणी ॥

एषासौ त्रिपुरा वोऽघं छिन्द्यात्त्रिभ्यः पुरातनी ।
त्रयीपरा त्रयाणां वा पूरणी त्रिपुरेश्वरी ॥

End :

स्तोत्राकारस्ततोऽयं तु मन्त्रोऽप्रतिमशक्तिमान् ।
पद्च्छते लघुनाम ऋपिर्यस्यातिधृतिश्छन्द ईरिता (?) ॥

देवता त्रिपुरा साक्षाच्चतुर्वा ... गोकर्णभूभुजा ।
परमेश्वरनाम्नेयं गुरुभक्तिबलात् कृता ॥

व्यातद्वर्णसङ्ख्या ... अर्थवश्चापि नाम ते लघुबृंहणी ।

... ... ... ... ...

शतमाद्यस्य पद्यस्य श्लोकानामिह सङ्ख्यया ।
पञ्चाधिकं द्वितीयस्य तृतीयस्य नवाधिकम् ॥

त्रिंशत् षष्ठस्य चाशीतिर्व्याख्या स्याच्चतुरुत्तरा ।
त्रयोदशोत्तरः सप्तश...स्य तु दशमस्य तु ॥

... ...पद्यस्य व्याख्या स्यात् पञ्चविंशतिः ।
एकादशस्य श्लोक... ...त्तरापरस्य ॥

षट्परस्यापि ... षण्णां कृतिरितो भवेत् ।
व्याख्या .... ... सप्तदशस्य तु ॥

अष्टादशस्य पद्यस्य विंशतिस्त्रिंशदेकयुक् ।
ऊनविंशस्य विंशस्य ... खिलस्य च ॥

प्रशंसा पद्यजातस्य श्लोकानां नवकोन्मिता ।
एषादिका....रूनेति(?) साहस्री सह चैका च कारिका ॥

औपसंहारिकैरन्यो ...हस्री समासाद् द्वादशोत्तरा ।

Colophon :

इति श्रीमत्परमेश्वराचार्यविरचितायां द्वाविंशतिः पटलः।

Author—Parameśvarācārya.

Remarks—The original text has been printed in TSS. as No. 60. Another edition with a Malayāḷam commentary is also available in SMS. (No. 12.)

## ॥ ललितासहस्रनामव्याख्या (जयमङ्गला) ॥

## No. 1113. LAḶITĀSAHASRANĀMAVYĀKHYĀ JAYAMAṄGAḶĀ.

C. O. L. No. 93.

Substance—Paper. Size—13½″ × 8¾″. Pages — 254. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—2800. Complete.

Owner—C. O.

Subject—The synonyms of the Goddess Laḷita.

Beginning :

॥ श्रीः ॥

ललितासहस्रनामावलिः

जयमङ्गलाव्याख्यासमेता ।

श्रीमातः! करुणाकटाक्षसरणिं सम्प्राप्य ते पद्मभू-
ब्रह्माण्डानि करोति रक्षति हरिर्हन्तीश्वरो लीलया ।
श्रुत्यन्ते पुरुषः परात्पर इति ख्यातोऽपि संवित्कुले
सा काष्ठेति च सा परा गतिरिति त्वय्येव विश्राम्यति ॥

मातर्भारति! तावकीनवचसां वक्त्राण्यहो वैखरी
प्रालेयांशुकलेव कन्दलयति प्रीतिं सतां कामपि ।
क्षीराम्भोनिधिसाम्यमाकलयतः किञ्च प्रसन्नापि सा
मन्थानाचललीढमध्यतलमित्याक्षेप्तुमुज्जृम्भते ॥

प्रत्यर्थिवशकर्कशप्रति—भोक्षितिहेतुतूलचातूला ।
हयमुखहेषालीला ह...ध्वान्तं धुनोतु नोऽशेषम् ॥

चुकुलितजलधेर्महिमा वर्णितुमिह केन शक्यते जगति ।
यस्यानुग्रहतन्त्राद्रामोऽजयदखिलरक्षांसि ॥

परमाख्यशिवानन्दनाथश्रीमणिपादुकाम् ।
प्रपन्नो मनसा वाचा कायेन च निरन्तरम् ॥

अद्वैतविद्याकार्यश्रीवेङ्कटाद्रितनूभवः ।
नारायणोऽम्बिकागर्भशुक्तिमुक्तामणिस्सुधीः ॥

ललितादेशिकादेशाद्व्याख्यां नारायणः स्फुटम् ।
सहस्रस्य रहस्यस्य नाम्नां विरचयाम्यहम् ॥

उत्कृष्टानि निकृष्टानि सन्ति ज्योतींषि चन्द्रमाः ।
कुमुद्वतीं समुद्घाट्य दिशो घुमुघुमायति ॥

दिक्कालयोरनन्तत्वाद्विभुत्वाच्चाथ चेद्र्वेः ।
व्याख्यारहस्यं वेदस्य हृदयं पारदैवतम् ॥

बद्धानुरागः पद्मिन्यामधिपो मालतीमपि ।
दृष्ट्वा भवत्यभिनवरसास्वादनलम्पटः ॥

रत्नाकराद्रत्नराशिर्निःशेषं नोद्धृतोऽस्तु तत् ।
मुक्ताहारा निर्विशेषं नन्दयन्त्येव सुन्दरीम् ॥

श्रीमन्तोऽभीष्टसाधने प्रवर्तन्तोऽनिष्टसाधनाच्च निवर्तन्ते तदु-
भयभिन्नं तूपेक्षन्ते । इष्टत्वादितारतम्यात्प्रवृत्त्यादेरपि तारतम्यं

भवति । आत्मा श्रेष्ठतमः आत्मनः कामाय सर्वं प्रियं भवति । तदात्मलाभात्परं न विद्यते । भवन्ति चात्मलाभश्चिच्छक्तिरूपाय अताय(?) व्याकुर्महे ।

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुण्डसम्भूता देवकार्यसमुद्यता ॥

End:

श्रीललितेति । ततः कर्मकारवत् ।

"शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी ।
ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥"

इति । ललिता वा ।
"अनाचार्योपदिष्टं स्याल्ललितं रतिचेष्टितम् ।"

(इति) लक्षितं वा "सुकुमारः क्रमो ललितमि"ति निरुक्तं वा अस्या अस्तीति ललिता । अर्शआद्यच् । तत्तथोक्तमस्माभिः—

ललितेनोपयुक्तं (तव) किल दिव्यं बलानवं व्रतयः(?) ।
धनुरैक्षवमस्त्राण्यपि कुसुमानि तदखिलं ललितम् ॥

इति । मङ्गलात्मिकासौ ललिताम्बिका श्रीमातेति तथा । तथा च श्रूयते—

"श्रियं लक्ष्मीमौपलामम्बिकां गां
षष्ठीं च यामिन्द्रसेनेत्युदाहुः ।
तां विद्यां ब्रह्मयोनिं स्वरूपा-
मिहायुषे शरणमहं प्रपद्ये ॥"

इति सर्वं शिवमिति दशशती विवृता ।

त्रायस्व मां परिहराब्ज ... ...देवताली-
कोटीररत्नपरिचुम्बितपादपीठे ।
मातस्तवाङ्घ्रिसरसीरुहमन्तरेण
नान्यज्जगत्सु शरणं मम (वोभवीति) ॥

परित्यज्य सर्वधर्मान् त्वामेकामम्ब शरणमुपयातोऽहम् ।
...करोति शुचं? त्वं मां सर्वाधिभ्यो विमोचय श्रीमातः ॥

संविद्भट्टारिकाया अधरकिसलयः कालिदासावतंसो
गौडाचार्यः स्मितं शङ्करगुरुचरणः कटी? दृग्विलासः ।
नासामण्डमुत्पलस्वाम्यभिनवसकृतिस्तक्कचः(?) क्षेमराजो
मुक्तास्रक् सिंहराजः कुचयुगचरणं पादभूपोऽहमिष्टे ॥

Colophon :

इति श्रीभट्टनारायणेन विरचिता ललितासहस्रनामव्याख्या जलमङ्गलाख्या सम्पूर्णा ॥

Author—Com:—Bhaṭṭanārāyaṇa.

Remarks — The commentator attempts here an elaborate explanation of the text with copious illustrations from Kālidāsa, Kṣemarāja and other celebrated poets of the day.

---

## ॥ विष्णुभुजङ्गप्रयातस्तोत्रम् (सव्याख्यम्) ॥

No. 1114. VIṢṆUBHUJAṄGAPRAYĀTA-
STOTRAM (with commentary).

C. O. L. No. 61.

Substance — Paper. Size—14″ × 8½″. Pages—18.

16—17 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—150.

Owner—C. O.

Subject—Laudation on philosophic lines.

Beginning :

श्रीः । भुजङ्गप्रयातस्तोत्रम् ।

यस्मिन् भाति चराचरात्मकमिदं विश्वं चतुर्वक्त्र इ-
त्यम्भोजाक्ष इति त्रिणेत्र इति च त्रेधैव यो गीयते ।
विश्वोत्पादनपालनादनविधीन् कुर्वन् स्वयं मायया
तस्मै सत्सुखबोधमात्रवपुषे पुंसे परस्मै नमः ॥

"चतुर्भिः सहितः शिष्यैः शङ्करोऽवतरिष्यति" इति भविष्यत्पुराणोक्तरीत्या विश्वानुजिघृक्षया विश्वम्भरायामवतीर्य श्रीभगवत्पादनामा परमशिवः श्रीमच्छारीरिकमीमांसासूत्रभाष्यादिकं विरचय्य स्वशिष्येषु स्थापयित्वा चरितार्थः सन् प्राप्तकालायै जनन्यै तत्त्वं प्रकाशयन् भुजङ्गप्रयातं नाम यत् स्तोत्रामृतं तत्सान्निधावास्याम्भोरुहान्निस्सारयामास। तादिदं श्रीराघवानन्दनामा तद्यूथ्येष्वन्यतमो मुनिमुख्य आस्वादयितुं स्वशक्त्यनुरोधेनारभते । तच्च प्रसन्नगम्भीरत्वाद् विस्पष्टार्थमविस्पष्टार्थमल्पबुद्धीनां भवतीति कृत्वा व्याख्यायते। तत्रादौ श्लोकद्वयेन निर्गुणब्रह्मप्रणामः। इहाद्यश्लोकः तत्पदार्थप्रधानो द्वितीयः त्वंपदार्थप्रधानः । ततः श्लोकसप्तकेन सगुणब्रह्मप्रणामः। ततः श्लोकत्रयेण अज्ञस्य पुंसः सांसारिकदुःखवैवश्यप्रकाशनम् । तत एकेन श्लोकेन तत्परिहारोपायभूताया भक्तेः प्रार्थना। ततः (एकेन) श्लोकेन स्तोत्रस्य नाम फलं चोपदिष्टम्। एवं चतुर्दशश्लोकमितमिदं स्तोत्रामृतं भवति ।

चिदंशं विभुं निर्मलं निर्विकल्पं
निरीहं निराकारमोङ्कारगम्यम् ।
गुणातीतमव्यक्तमेकं तुरीयं
परं ब्रह्म यं वेद तस्मै नमस्ते ॥

End :

आत्मनः पशुत्वप्रापकस्य देहाद्यभिमानस्य हन्ता वा मुरारिः, तस्य संबोधनम् । तथा च यस्तु सगुणं निर्गुणं वा भवन्तं चित्ते निधायोक्तप्रकारेण ज्ञात्वा ध्यात्वा भुजङ्गप्रयातं भक्त्या स्नेहबहुमानाविश्वासात्मिकया सह पठेत् स गुरुत्प्रसादादाशु अचिरेण कालेनाच्युतं निश्चलं योगं भक्तिज्ञानलक्षणं समाश्रित्याक्लेशतः लब्ध्वा मोहमात्माविद्यां विहाय त्वत्तोऽन्यः स्वयमिति भ्रान्ति मूलभूतामविद्यां च हित्वा त्वां व्रजति त्वन्मयतां प्राप्नोति जीवन्नेव मुच्यते । "ब्रह्मविद् ब्रह्मैव भवति" इति श्रुतेः

Colophon :

इति श्रीराघवानन्दमुनिविरचिता भुजङ्गप्रयातव्याख्या समाप्ता ।

Author—Com:—Śrī Rāghavānanda.

Remarks—The origin of the text is that Śrī Bhagavatpādācārya once made a present of this work to his mother who in her turn extended it to her son's principal disciple Rāghavānanda for writing out the commentary.

## ॥ विष्णुसहस्रनामनिरुक्तिः [हरिभक्तिकामधेनुः]॥

## No. 1115. VIṢṆUSAHASRANĀMANIRUKTI
(Haribhaktikāmadhenu.)

C. O. L. No. 1514.

Substance—Palm leaf. Size—6″ × 1¾″. Leaves—66.
12 lines per page and 22 letters per line.
Script—Malayāḷam. No. of Granthas—1150.

Owner—Kṛṣṇaru Nārāyaṇaru, Muṭṭaviḷa Maṭhom.

Subject—Exposition of Viṣṇusahasranāma.

Beginning :

श्रीमहागणपतये नमः । अविघ्नमस्तु ।

नारायणं परिक्रम्य वेदानां प्रथमं मुनिम् ।
पाराशर्यं नमस्कृत्य किञ्चित् प्रस्तुमहे वयम् ॥

आद्यं पुरुषमद्धाय तस्य निब्रूमहे क्रमात् ।
नाम्नां सहस्रं गौणानां पद्यैस्तावद्विधैः स्फुटम् ॥

उपश्लोक्य यथाप्रज्ञं त्वदङ्घ्रिमधुविप्रुषः ।
वाचा विवविषे कृष्ण? तत् कटाक्षान् सकृत् क्षिप ॥

नमस्ते हार्द विश्वात्मन्! विष्णो! विज्ञापनामिमाम् ।
अवधारय दासस्य त्वदेकशरस्य मे ।

संसारगर्तपतितस्य हरे चिराय
मर्त्यस्य हन्त कथमप्यत उन्मिमक्षोः ।

धर्मस्त्वदीयहृदयं शरणं न चान्यद्
विद्या च कर्म च तथा द्वितयोऽस्य भेदः ॥

End :

एतन्न गुणवादेन प्रतिवक्तव्यमित्यपि ।
त्वदायत्तप्रवृत्तित्वं जगतां निरदीधरत् ॥
तपसा सर्वशास्त्राणां पारदृक्त्वभवत्तनुम् ।
पाराशर्यः स भगवानिति सर्वं समञ्जसम् ॥

तस्मात् प्रभो त्वदितरा न गतिर्ममाद्य
मय्यच्युतां कुरु कृपां शरणं प्रपन्ने ।
सोऽहं ततः सपदि संसृतिबन्धमुक्त-
स्त्वत्पादमूलमभयं भगवन्नुपेयाम् ॥

यथामति यथागमं तव निरुच्यमानं
ह्यशेषदुरिता क्षपयितॄणि लक्ष्मीपते! ।
नमक्षमविभक्तिकान्यपि कृतानि विष्णो! मया
क्षमस्व तदिहाद्य मे स्खलितमीश! तुभ्यं नमः ॥

Colophon :

अस्ति वृषाचलसंज्ञं केरलभूमेरकृत्रिमं तिलकम् ।
यत्र महः शशिचूडं घटयति भजताममर्त्यसाम्यम् ॥

तत्रास्ति रामवर्मा धरणीद्युमणिर्महान् हि राजमणिः ।
हृदयेन लाल्यते यः कविभिर्धनिभिः परैश्च विद्वद्भिः ॥

राज्ञस्तस्य नियोगतो मधुरिपोर्नाम्नां सहस्रं महद्
भारद्वाजकुलेन्दुरेष सुमतिः सोऽनन्तनारायणः ।

श्लोकैस्तन्निरवोचदेतदधुना सन्तोऽद्य निर्मत्सराः
संशोध्यैनदनेनमस्तदनुजानन्तु+ तेभ्यो नमः ॥

हरिचरणपद्मयुग्मे सहस्रकमलेव भासतां माला।
हरिभक्तिकामधेनुर्नाम्नां विष्णोर्निरुक्तिरियम् ॥

भारद्वाजकुलजलधिकौस्तुभेन श्रीमत्कौशिकगोत्रार्णव सुधांशुमातुलवरदराजशास्त्रिकरुणारसकन्दलितप्रज्ञापल्लवेन श्री हरिचरणपरिचरणप्रवणान्तःकरणेनानन्तनारायणशास्त्रिणा विरचितायां हरिभक्तिकामधेन्वां सहस्रनामनिरुक्तौ अधिकारिनिर्णयकथनम् ।

श्रीपद्मनाभो रक्षतु ॥

Author—Anantanārāyaṇaśāstrī of Kauśikagotra.

Remarks — The colophon reveals that the commentary was attempted at the command of Rāma Varma Rāja. The author owed his scholarship to his uncle Varada Rāja Śāstrī as evidenced by the closing portion of this Ms.

---

## ॥ विष्णुसहस्रनामभाष्यम् ॥

No. 1116. VIṢṆUSAHASRANĀMABHĀṢYAM.

C. O. L. No. 825.

Substance—Palm leaf. Size—11″ × 1¾″. Leaves—36. 9 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—650.

Owner—Kalladaikkuriccі Raṅgavādhyār.

Subject—Explanation of Viṣṇusahasranāma.

Beginning :

ईश्वरः—

शान्त्यध्यायं प्रवक्ष्यामि विष्णोर्नामसहस्रकैः ।
सर्वशान्तिकरं देवि! समाहितमनाः शिवे! ॥

शृणुष्व सर्वशान्त्यर्थं सर्वाभीष्टार्थमेव च ।
धर्मार्थकाममोक्षार्थं विष्णोः प्रीत्यर्थमेव च ॥

विष्णुभक्तिप्रसिद्ध्यर्थं मम तुष्ट्यर्थमेव च ।
राजचोराग्निरोगाधिशत्रुशान्त्यर्थमेव च ॥

विश्वं ब्रह्म विष्णुरस्मिन् जगदात्यभिधीयते ।
आदौ स्वयं जगत् सृष्ट्वा तत्र चानुप्रवेशनात् ॥

शान्तिं करोतु मे नित्यं विश्वरूपधरो हरिः ।
... ... ... ... ... ... ...
... ... ... ... ... ... ...
मन्त्रैर्यो युज्यते देवस्सर्वदेवमयः स्वयम् ॥

End :

अथापराजित इति तथा पदमनुत्तमम् ।
तेजोवृषश्चाष्टमे तु सर्ववि... ... ...स्वपि ॥

नवमे दशमे चैव नास्ति चैवैकयनामकम् ।
सनादित्यव्ययं नाम सना(तन) इतीरितम् ॥

सक्तो वै बहुवाक्येन स...नु...इतीरितम् ।
महाद्रिधृगिति प्रोक्तं त्रिलोकधृदितीरितम् ॥

असम्मित इति प्रोक्तमखण्डपरशुस्तथा ।
एवं व्या... ...क्य का... ....द्यर्चे... ...बुधैः ॥

अ... .... ...न सर्वेषां... ... ...कर्तव्यामित्यपि ।

Colophon :

शुभमस्तु ।

Author :

Remarks—The Ms. is much worn out

## ॥ विष्णुसहस्रनामलघुविवरणम् ॥

## No. 1117 A. VIṢṆUSAHASRANĀMALAGHU-VIVARAṆAM.

C. O. L. No. 661 A.

Substance—Palm leaf. Size—$12\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—85. 10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3150

Owner—Dāmodaran Parameśvaran Potti, Kārtikappaḷḷi.

Subject—Exposition of Sahasranāma.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । ओम्

गणेश्वरं च वाग्देवीं श्रीमदस्मद्गुरूनपि ।
विघ्नशान्तीष्टसिद्ध्यर्थं नमस्यामि कृपानिधीन् ॥

मुकुन्दं सच्चिदानन्दमिन्दिन्दिरसमद्युतिम् ।
वन्दारुजनमन्दारं तं नमामीन्दिरापतिम् ॥

कृष्णद्वैपायनं वन्दे यन्मुखेन्दुविनिःसृतम् ।
सहस्रनामपीयूषं पीयतेऽद्यापि मानुषैः ॥

सूतं विशंपजं भीष्मं शौनकं जनमेजयम् ।
धर्मजं च भजे वक्तॄन् श्रोतॄन् नामसहस्रके॥

सहस्रनामव्याख्यातॄन् भगवत्पादपूर्वकान् ।
नत्वा नामसहस्रस्य कुर्वे विवरणं लघु ॥

शङ्करभगवद्भाष्ये पद्यव्याख्याचतुष्कलघुवृत्योः ।
नाम्नामर्था गदिता नोक्ता शब्दस्वरूपनिर्णीतिः ॥

व्याख्यास्ताः प्रेक्ष्याथ क्रियते तन्निर्णयार्थमिह यत्नः ।
न स्यात पाठविशुद्धिर्नाम्नां खलु शब्दनिर्णयाभावे ॥

व्याख्यास्वनेकधा नाम्नां येषामर्थाः समीरिताः ।
तेषां भाष्योक्तरीत्यैव प्रायो व्युत्पत्तिरुच्यते ॥

अन्यव्याख्यापि हृद्या चेत् तद्रीत्यापि क्वचिद् ब्रुवे ।
व्युत्पत्तिमन्यासक्तार्थमुक्त्वा रीत्यास्य च क्वचिद् ॥

नानाव्याख्यासु चेन्नाम्नां शब्दरूपभिदा क्वचित् ।
तदाश्रितां च व्युत्पत्तिं वक्ष्ये नो चेदुदास्यते ॥

पृषोदराद्युणादीनां कृतां च बहुलत्वतः ।
व्युत्पाद्यशब्दा या व्याख्यास्तासूदासेऽन्यसम्भवे ॥

ब्रह्मेन्द्रोक्ताः पाठभेदा नाम्नां केषाश्चिदत्र ये ।
अप्रासिद्धत्वतस्तेषां व्युत्पत्तावपि नो यते ॥

... ... ... ... ... .. ...

... ... ... ... ... ... ...

पुरा किल भगवान् पाराशर्यमुनिः ऋग्यजुस्सामाथर्वभेदेन वेदं चतुर्धा विभज्य तदर्थोपबृंहणाय महाभारतसंज्ञं पञ्चमामितिहासात्मकं वेदं स्वशिष्यो वैशम्पायनः सर्पसत्रे जनमेजयाय कथयिष्यति ॥

End :

ये विश्वेश्वरं जगदीश्वरम् अजं जननरहितं देवं द्योतनादिशीलं जगतो लोकस्य प्रभवाप्ययं प्रभवन्त्यस्मादिति प्रभवः उत्पत्तिस्थानं अपियन्ति प्रलीयन्तेऽस्मिन्नित्यप्ययो विलयस्थानं प्रभवश्चाप्ययश्चेति प्रभवाप्ययः (तं) पुष्कराक्षं विष्णुं भजन्ति सेवन्ते; ते नराः पराभवं न यान्ति बाह्यैराभ्यन्तरैश्च शत्रुभिरजिताः सन्तः अमृतत्वमाप्नुवन्तीत्यर्थः । न ते यान्ति पराभवामिति पादस्य द्विरुक्तिरध्यायसमाप्तिं द्योतयति ।

Colophon :

इति सहस्रनामलघुविवरणं समाप्तम् ।

भारतभाष्यादिगिरां भावाज्ञानाच्च शब्दशास्त्रादौ ।
अपरिचितेरपि जातं स्खलितं करुणाकरो हरिः क्षमताम् ।

कूटल्लूरुपरिभागनामनि ग्रापुषा जननमात्मधामनि।
ब्रह्मदत्ततनयेन गुम्फिता शोध्यतां कृतिरियं बुधोत्तमैः ॥

Author—Nīlakaṇṭha, son of Brahmadatta.

Remarks—The author states at the outset that he is indebted to several commentaries for the composition of this work. His erudition as well as scholarship is quite evident.

## ॥ कामन्दकीयनीतिसारः ॥

## No. 1117 B. KĀMANDAKĪYANĪTISĀRA.

C. O. L. No. 661 B.

Substance—Palm leaf. Size—$12\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—48. 9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—1200.

Owner—Same as No. 1117 A.

Subject—Politics.

Colophon :

इति कामन्दकीये नीतिसारे राजोपदेशे गजाश्वरथपत्तिकर्मतद्-
भूमिदानादिकल्पानीकस्वरूपप्रकृतिव्यूहरचना विंशतिः सर्गः ।

Author—Kāmandaka.

Remarks—The Ms. is printed as No. 14 in TSS.

## ॥ विष्णुसहस्रनामलघुविवरणम् ॥

## No. 1118. VIṢṆUSAHASRANĀMALAGHU-VIVARAṆAM.

C. O. L. No. 938.

Substance—Palm leaf. Size—$12\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—125. 9—10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—300.

Owner—Śūran Kaṇdan Nambūrī, Vaikom.

Author—Son of Brahmadatta.

Remarks—A few verses occur in the wake of the colophon :

---

## ॥ विष्णुसहस्रनामलघुविवरणम् ॥

## No. 1119. VIṢṆUSAHASRANĀMALAGHU-VIVARAṆAM.

C. O. L. No. 1891.

Substance—Palm leaf. Size—$10'' \times 1\frac{3}{4}''$. Leaves—213. 10 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—3180.

Owner—Brahmadattan Nambūrī, Kūdallūr.

Subject—Same as No. 1117 A.

Beginning—Same as No. 1118 A.

End :

भक्तैरुपहृतं पत्रपुष्पादिकं प्रगृह्णातीति प्रग्रहः । प्रपूर्वात् ग्रहेरर्चयेद्वा । विषयारण्ये धावत इन्द्रियाश्वान् तत्प्रसादेन रश्मिनेव बध्नातीति भगवतः प्रग्रहतुल्यत्वात् प्रग्रहः । प्रग्रहे रश्मौ चेति यज्ञो वैकल्पिकत्वाकरणेऽपि प्रग्रहाय नमः ।

Colophon :

इति दशमं शतकं समाप्तम् ।

जज्ञे यज्ञेश्वरे प्रागुपनिलमधिपो यज्वनामाहिताग्नि-
स्तद्वंशो भूतनारायणबुधवरजाद्गोत्रजाद्धाधिसूनोः ।
नागश्रेण्याख्यदेशोद्भवभवनजुषो ब्रह्मदत्तद्विजेन्द्रा-
ज्जातो नाम्नां सहस्रं व्यवृणुत गुरुकारुण्यतो नीलकण्ठः ।

कूटल्लूरुपरिभागनामनि प्रापुषा जननमात्मधामनि ।
ब्रह्मदत्ततनयेन गुंफिता शोध्यतां कृतिरियं बुधोत्तमैः ॥

Author—Same as No. 1117 A.

Remarks—Several variants in reading are noticeable in this Ms.

---

## ॥ शिवपादादिकेशस्तवव्याख्या ॥

No. 1120. ŚIVAPĀDĀDIKEŚASTAVAVYĀKHYĀ.

C. O. L. No. 1913.

Substance—Palm leaf. Size—7″ × 1″. Leaves—29.

5 lines per page and 26—28 letters per line Script—Malayāḷam. No. of Granthas—230.

Owner — Nārāyaṇan Uṇṇi Nīlakaṇṭhan Uṇṇi. Āranmuḷa.

Subject—Glorification of Śiva.

Beginning :

उद्यदर्कवर्णप्रभं तत्पुरुषनिगदितं यत् तत्पुरुष इति नाम्ना निगदितं विद्वाद्भिः तत् पूर्वं प्राच्यां दिशि वर्तमानम् ईशानसंज्ञं यद्दिव्यम् ईशान इति संज्ञा यस्य तदीशानसंज्ञम् । दिव्यम् । अन्तरीक्षे भवं दिव्यम् । ईशानमुखे वर्णविशेषस्यानिर्देशात् तदनुक्तिः । शम्भोर्यत् सद्योजाताख्यं विमलवर्णं पश्चिममुखम् उदग्वृत्तिः वामदेवसंज्ञं यत् हेमवर्णञ्च जलदनिभमघोराह्वयं दक्षिणादिग्वृत्ति च, यत् बालार्कप्रभं तत्पुरुषनिगदितं प्राचीदिक्स्थं मुखं च, यत् दिव्यमीशानसंज्ञं च तत् तानि पञ्चमुखानि भवदभिलषितं दद्युरित्यर्थः ।

End :

केशादिपादस्तुतिरादरेण श्रीशङ्कराचार्यवरप्रणीता ।<br>
मयोपकाराय परं विपश्चिता क्षान्तिं भजन्त्वत्र सतां मनांसि ॥

एवं मया कृष्णपुरीतिनाम्ना सम्बिभ्रतादभ्रदयैकसिन्धोः ।<br>
श्रीचन्द्रमौलेश्चरणारविन्दसमर्चनायास्तु कृतिः कृतेयम् ॥

गुरोः पादरजः पातु संसारापारसागरात् ।<br>
तारणं नापरं किञ्चित् संसारजलधेरतः ॥

अनेन स्तुतिरत्नेन स्तुतो यासावुमापतिः ।
तं परम्परया भक्त्या नमस्कुर्मो महेश्वरम् ॥

परेशस्य परा शक्तिर्या निर्वाणसुखप्रदा ।
नमामि भवकान्तां तां भक्तानुग्रहलालसाम् ॥

दक्षिणामूर्त्तिरुद्रं तं परं गुरुमुपास्महे ।
यस्य प्रसादलेशेन व्याख्यातारो वयं सदा ॥

Colophon :

इति श्रीमाधवपुरीपूज्यपादशिष्येण श्रीकृष्णपुर्याख्येन यतिना कृता श्रीमत्केशादिपादव्याख्या समाप्ता ।

Author—Śrī Kṛṣṇayati.

Remarks—Though 55 and 95 are the opening and closing page numbers respectively only 29 leaves are extant herein.

---

## ॥ शिवसहस्रनामव्याख्या ॥

No. 1121. ŚIVASAHASRANĀMAVYĀKHYĀ.

C. O. L. No. 589.

Substance—Paper. Size—11⅞″ × 9″. Pages—105. 18 lines per page and 18—22 letters per line. Script—Devanāgarī. No. of Granthas—1200.

Owner—C. O.

Subject—A panegyric.

Beginning :

श्रीः । शिवसहस्रनामव्याख्या ।

करीन्द्रास्यषडास्याङ्कपरिरम्भधृतादरम् ।
नारीनरात्मकं ज्योतिर्वर्गेवर्तु पुरः सदा ॥

यत्संश्लिष्टमविद्ययाद्भुतमिदं विश्वं वितातन्यते
यन्मूर्तित्रयमुख्यदैवतगतं लोकैर्मुदोपास्यते ।
यत्साङ्गश्रवणश्रयाविशदिते चित्ते दृरीदृश्यते
सत्यानन्दचिदेकरूपममलं तद्ब्रह्म नित्यं श्रये ॥

+ + + + +
+ + + + +

भक्तिं प्रकाशयत्येषा सर्वात्मनि महेश्वरे ।
भक्तिप्रकाशिकेत्याख्यां व्याख्यां प्राप्य विजृम्भते ॥

पुरा खलु भगवता मयूखमालिना स्वसूनवे मनवे समुदीरितान् सकलपुरुषार्थहेतून् अर्थापयितुकामेन सत्यसुखसंविद्घने परमेश्वरे विततनित्यप्रत्ययेन सत्यवतीसुतेन सूतेन श्लोकैरुपनिबद्धे तस्मादेव पुनरुग्रश्रवसा रोमहर्षणसुतेन सादरमधीते महत्यादित्यपुराणे समुल्लसत्यष्टात्रिंशे अध्याये वर्णितमपर्णापतिनिर्मितेन चक्रेण लीलया कृतं जलन्धरस्य सुरद्विषः प्रशमं ततः सूततो निशम्य प्रमोदमानमानसैस्तादृशं सुदर्शनचक्रं कथंकारं गरुडध्वजो लब्धवानिति जिज्ञासमानैश्च मुनिभिरनुयुक्तः ऋषिजनसूतकृतप्रश्नोत्तरपरम्परामुखतोऽपि स सूतस्तेभ्यः तच्चक्रलाभप्रकारं निवेदयितुम् एकोनचत्वारिंशमध्यायं कथयिष्यन्नादौ तावत् तैः कृतप्रश्नमेकेन

श्लोकेन प्रदर्शयति—ऋषय ऊचुः—सुदर्शनाख्यमित्यादिना ।

End :

वपुः शरीरम् । 'अर्तिपृवपी'त्युसिन् प्रत्ययः । अमृतं वपुर्यस्य सोऽमृतवपुश्चन्द्रः । तद्रूपत्वादमृतवपुः । तथोक्तं--नक्षत्राणां चन्द्रमा इति । अथवा अमृतं निःश्रेयसं तद्वपुः स्वरूपं यस्य सः तथोक्तः ।

Colophon :

इति श्रीभूतनाथवंशाब्धिचन्द्रेण कलिकालरामचन्द्रेण चित्तयराममद्रेण कारितायां लक्ष्मणदीक्षितात्मजेन श्रीमदलङ्कारदीक्षितेन कृतायां शक्तिप्रकाशिकाख्यायाम् आदित्यपुराणोक्तशिवसहस्रनाम्नां व्याख्यायां द्वितीयं शतकम् ।

Author—Alaṅkāra Dīkṣita.

Remarks—Only 213 synonyms are explained in this Ms.

---

## ॥ शूलिनीस्तोत्रम् ॥

## No. 1122. ŚŪLINĪSTOTRAM.

C. O. L. No. 105.

Substance—Paper. Size—11″ × 9″. Pages — 284. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—2840.

Owner—C. O.

Subject—Rites of propitiating Devī.

Beginning :

यन्त्रस्यादौ प्राणबीजं शक्तिबीजं नेत्रबीजं श्रोत्रबीजं जिह्वाबीजं महावाक्यं मन्त्रगायत्रयिन्त्रगायत्रीसाध्यम् अकारादिपञ्चाशद्वर्णं... ... .... ... ...

... ... ....स्थापनमेव च ।
भूतदिक्पालबीजानि यन्त्रस्याङ्गानि वै दश ॥

End :

एवंप्रकारेण सर्वदोषहरं स्यात् । जपमन्त्रमाह—

ओं खें खट् फट् प्राणगृहासि प्राणगृहासि हुंफट् सर्वशत्रुसंहारकारणाय शरभसालुवाय पक्षिराजाय हुंफट् स्वाहा । ओं ऐं श्रीं ह्रीं क्लीं क्षूं फट् ज्वल स्वाहा । शूलिनी ज्वल हुं दुष्टग्रह ओं ऐं क्षूं ऐं श्रीं ह्रीं क्लीं क्षूं इति सर्वशान्तिकरं पठेत् ।

Colophon :

शूलिनीस्तोत्रं समाप्तं भूयात् ।

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसालुवपक्षिराजकल्पे एकोनत्रिंशोऽध्यायः ।

Author—Śaṅkara.

Remarks—The arrangement of chapters in this Ms. is not in order.

॥ शैवकर्णामृतम् ॥

No. 1123. SAIVAKARṆĀMṚTAM.

C. O. L. No. 100.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{3}{4}''$. Pages—35. 18 lines per page and 14 letters per line. Script—Devanāgarī. No. of Granthas—280.

Owner—C. O.

Subject—A panegyric of Śiva.

Beginning :

यस्मै नमो भवति धन्यगुणाः समग्राः
नारायणोपनिषदा यदुपासनोक्ता ।
यो नः प्रचोदयति बुद्धिमधिक्रतौ य-
स्तं त्वामनन्यगतिरीश्वरसं श्रयामि ॥

वेदेषु वा तदनुयायिषु वा विचार्य
तन्त्रेषु वाक्यमखिलं प्रतिपादकं ते ।
तात्पर्यसंग्रहमहं विदधे महेश
मान्यं प्रसीद नय मामृजुना पथा त्वम् ॥

End :

स्तोत्रमेतदवधार्य गृह्णता-
मर्थमस्य निखिलेऽपि जानताम् ।
ग्राह्यमन्यदपि नावशिष्यते
ज्ञेयमन्यदपि नैव किञ्चन ॥

पञ्चाशदुत्तरशतश्रुतिसूक्तिमाला
भोगावली भुजगराजमनोहरा ते ।
वेदेषु सा... ...मपरागमवैदिकेषु
तन्त्रेषु भक्तिमतुलां त्वयि च प्रभूते ॥

मिथ्याकल्पितभोगमोक्षदवचःसन्तानसन्त्यापन-
व्यग्राणामचिरप्रभावविबुधप्रेम्णा महेशद्विषाम् ।
मूर्धस्वेव दुरात्मनां विरचिता निर्घातपाताः परै-
र्विद्वद्भिः परमेश्वरश्रुतिकथातात्पर्यसंग्राहकैः ॥

Colophon :

Author :

Remarks :

---

॥ शोणाचलस्तोत्रम् ॥

No. 1124. ŚOṆĀCALASTOTRAM.

C. O. L. No. 2303.

Substance—Palm leaf. Size—10¾″ × 1½″. Leaves—212. 5—7 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1900. Complete.

Owner—Śaṅkaran Tantri, Ceṅgannūr.

Subject—A panegyric of Śiva.

Beginning :

श्रीगणपतये नमः ।

सत्यं ज्ञानमनन्तमद्वयमहःपुंनिर्विशेषं परं
विद्येयं परमार्थदर्शनपरा वेद्यानवद्यापि यत् ।
विद्वांसः सविशेषका धृतधियः सर्वेऽपि विद्याश्रिया
श्रीशोणाचलनामधाम्नि लसते तस्मै नमो ब्रह्मणे ॥

आम्नायागमघोषभूषिततनुस्सत्सेवनीयः सदा
यं नित्यं प्रणमन्त्यधःकृतनिजावासाश्च वृन्दारकाः ।
आपातालनिविष्टमूलशिखरः पम्पातटे पावने
शैलेन्द्रो जगति स्फुटं विजयते शोणाभिधानो महान् ॥

लोकानामियमुत्तमा वसुमती द्वीपोऽयमत्रोत्तमः
प्रत्येकं नवखण्डमण्डितगिरिश्रेष्ठे ततो भारते ।
मुख्यं भार्गवभूतलं सुमहितो देशस्ततो दाक्षिणात्
सोऽस्मिन् शोणगिरिर्विभाति भगवत्सान्निध्यपूरद्भुतः ॥

अस्मिन् शोणगिरौ स्वयं समुदितो लिङ्गात्मना शङ्करः
साक्षाद्भक्तजनावनाय कृपया कल्पद्रुकल्पो विभुः ।
अस्मिन् ब्रह्मणि शङ्करे सुलभतां प्राप्ते जगद्भाग्यतः
किञ्चिन्नान्यदिहास्ति सेव्यममृते लब्धे तु किं भोजनैः ॥

प्राच्यां चित्रसमाह्वयेन महता तीर्थेन चापाश्मना
याम्यायां सरसा सरोजवनिना श्रीपादतीर्थेन च ।
प्रत्यग्द्वारि जडाभिधेन सहितश्शक्त्याह्वयेनोत्तरे
सोमाख्येन च मध्यतोऽरुणगिरिर्विश्वं पुनात्यन्वहम् ॥

End :

शोणाचलेश! पदपङ्कजयुग्मकं ते
जङ्घे च जानुयुगलञ्च तवोरुयुग्मम् ।
नाभिं तवोदरमुरो वदनं किरीट-
कोटीलसच्छशिकलामवलोकयेऽहम् ॥

स्वामिन्! प्रसीद परमेश्वर! साम्बमूर्ते!
साक्षादिदं तु भवतेऽस्तु नमः परस्मै ।
विश्वस्य सौख्यमुदियादपि विश्वनाथ!
शोणाचलालयपते! भवदर्पणश्रीः ॥

नामत्रयोज्ज्वलमिदं निगमोपगीतं
स्तोत्रं च मत्कृतभवन्महिमोदयार्चिः ।
साहस्रिकेति पुनरष्टकमालिकेति
स्यात् पारमेश्वरमिदं पठतां सुखाय ॥

Colophon :

शुभमस्तु । शोणाचलेशाय नमः । नमशिवाय ।

Author :

Remarks—The leaves are not arranged in order. The script is not legible. The codex comprises the Sāhasrika and Aṣṭaka only.

## ॥ श्रीरामपञ्चशतीस्तोत्रम् ॥

## No. 1125. ŚRĪRĀMAPAÑCAŚATĪSTOTRAM.

C. O. L. No. 996.

Substance—Paper. Size—12¼″ × 9⅓″. Pages—103. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1158.

Owner—C. O.

Subject—A panegyric of Śrī Rāma.

Beginning:

हरिः । श्रीगणपतये नमः । श्रीरामपञ्चशतीप्रारम्भः ।

आनन्दोदयहेतुरिन्दुदृषदामिन्दुर्मुनीनां धिया-
मावृन्दारकमापिपीलिकमिह स्वक्षत्रनीत्या स्थितः ।
श्रीवत्साद्भुतकौस्तुभोज्ज्वलवपुः श्रीवासुदेवः स्वयं
श्रीमत्सङ्गममन्दिरे विहरते श्रेयःप्रदायी नृणाम् ॥

शृण्वन् यद्गुणमुद्गृणन् यतमना यं चिन्तयन् सन्ततं
तन्वन्नर्चनवन्दने भजति यो यस्यैव दास्यं गतः ।
धन्योऽसौ मनुजः कदापि न पुनः स्तन्यं जनन्याः पिबे-
त्तं नाथं जगतां नमामि शिरसा श्रीसङ्गमेशं हरिम् ॥

End:

प्रत्यक्षे प्रतिबिम्बवद्गत बहिर्मात्रेऽस्य गात्रस्य मे
हृद्यक्षेमपदत्वविभ्रमभृतो वृद्धिक्षयावेक्षिणः ।
अध्यक्षो हि भवानवैति विभवं नाहं मया तादृशा
यद्यत्क्षुद्रमुदीरितं नुतिधिया तत्तत्क्षमेथाः स्वयम् ॥

शीतं नातिसहे नचोष्णमतिच श्रीसङ्गमाधीश्वर!
स्वातन्त्र्ये चकितस्तदस्मि सुखितस्त्वत्पारतन्त्र्ये स्मृते।
देहे धातुषु चेन्द्रियेषु शिरसि स्वान्ते तथान्तर्बहिः
सर्वाङ्गेष्वपि मे तवैव करुणा पीयूषधारायताम्॥

Colophon :

इति पञ्चाशत्तमदशकम्।

श्रीरामपञ्चशती समाप्ता।

Author—Rāma.

Remarks—The Ms. consists of 50 Daśakās. The deity glorified herein may perhaps be identified with Saṅgameśvara of Kūḍalmāṇikkam temple. A short gloss by Punnaśśeri Nīlakaṇṭha Śarma is also seen at the close. The 10th verse in the 49th Daśaka reveals the name of the author. Thus the title is applicable both to the author and his work.

---

॥ श्रीरामस्तवराजः ॥

No. 1126 A. ŚRĪRĀMASTAVARĀJA.

C. O. L. No. 2213 A.

Substance—Palm leaf. Size—19″ × 2″. Leaves—3.

8 lines per page and 49 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Nīlakaṇṭhan Jayantan Nambūrī, Kovattillom, Moṇippaḷḷi.

Subject—A panegyric of Rāma.

Beginning—Same as No. 1210, DCSMMPL.

End :

इमं प्रियं नाथ! वरं प्रयच्छ पुनःपुनस्त्वामिदमेव याचे ॥

इत्येवमीरितो रामः प्रादात्तस्मै वरान्तरम् ।
अन्तर्धानं जगामाशु पुरतस्तस्य राघवः ॥

इति

श्रीरामरघुनाथस्य स्तवराजमनुत्तमम् ।
सर्वसौभाग्यदं भक्तिदायकं मुक्तिदं शुभम् ॥

ब्रह्मपुत्रेण कलितं वेदानां सारमुत्तमम् ।
गुह्याद् गुह्यतरं राजन् तव स्नेहात् प्रकीर्तितम् ॥

यः पठेत्पूजयेद्वापि त्रिसन्ध्यं श्रद्धयान्वितः ।
ब्रह्महत्यादिपापानि तत्समानि बहूनि च ॥

स्वर्णस्तेयसुरापानगुरुतल्पयुतानि वा ।
कायिकं वाचिकं पापं कर्मणा समुपार्जितम् ॥

श्रीरामस्मरणेनैव व्यपोहति न संशयः ।

श्रीरामचन्द्र! रघुपुङ्गव! राजवर्य!
राजेन्द्रराज! रघुनायक! रामभद्र! ।
राजाधिराज! रघुनन्दन! रामचन्द्र!
दासोऽहमद्य भवतश्शरणं गतोऽस्मि ॥

Colophon :

श्रीरामस्तवराजस्समाप्तः ।

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

शुभमस्तु ।

Author :

Remarks—Most of the leaves are worn out.

---

## ॥ युधिष्ठिरविजयव्याख्या ॥

### No. 1126 B. YUDHIṢṬHIRAVIJAYAVYĀKHYĀ.

C. O. L. No. 2213 B.

Substance—Palm leaf. Size—16″ × 2½″. Leaves—70. 11—13 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—2700.

Owner—Same as No. 1126 A.

Subject—Exposition of the Yudhiṣṭhiravijaya.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथेत्यादि । अथ पाण्डोः तनये राज्यं वि... ... वति सः नृपः निर्वेदम् अयात् खेदमयात् स्खलितात् कृत्यतः इव । अथ परम-प्रकृतानुसारेण द्यूते पराजयानन्तरं पाण्डोः कुन्तीपतेः । 'पाण्डुः कुन्तीपतौ सिते' इति विश्वः । तनये धर्मजे । तनय इत्यनेनार्धरा-ज्याधिकारित्वमुक्तम् । राज्यं राज्यगतं महदैश्वर्यं विहाय उपेक्ष्य गतवति सति वनं गते सति सः राजपदवीं संस्थितः नृपः धृतराष्ट्रः निर्वेदं खेदम् । 'निर्वेदस्तु पुमान् खेदे खेदहीने तु सत्रिणी'ति केशवः ।

End :

तत्रेत्यादि। तत्र स चापत्यजनेन नृपस्य अपत्यजने भीते वसति सति भीष्मः राज्ञामयुतमनिशं हर्तुं प्रतिजज्ञे । तत्र च कर्णे सचापत्यजने । चापस्यत्यजनं चापत्यजननं चापत्यजनेन सह वर्तमानः सचापत्य-जनः तथाभूते त्यक्तचाप इत्यर्थः । नृपस्य धृतराष्ट्रस्य अपत्यजने दुर्योधनादिसमूहे भीते च सति भीष्मः राज्ञामयुतं दशसहस्राणि अनिशं दिनेदिने हन्तुं प्रतिजज्ञे प्रतिज्ञातवान् । तत्र हे ... मतिमा-निति मतिमान् सम्प्रहारकुशल इत्यर्थः ।

एकदशशतलक्षप्रयुतकोटयः क्रमशः ।
अर्बुदमब्जं खर्वमहापद्मशङ्कवस्तस्मात् ॥

जलधिश्चान्त्यमध्यें पराध्यमिति दशगुणोत्तरे संज्ञाः ।

कीदृशम्। अतिमानयुतम् अत्यन्ताभिमानयुक्तं तुच्छराजनिग्रहोऽपि तथा कीर्तनं स्यादिति एवमुक्तम् । बलद्वयीत्यादि । तदा बलद्वयी संयुगाजिरे पदश्चकार । बलद्वयी पाण्डवदुर्योधनसंबन्धिनोः बलयोः द्वयी द्वयमित्यर्थः । संयुगाजिरे युद्धाङ्गणे पदम् ।

Author—Śrīkaṇṭhadāsa.

Remarks—The Ms. comprises the commentary on a few ślokas in the 4th Āśvāsa and on the whole of the 6th.

---

## ॥ सम्पत्करीसंवित्स्तुतिचर्चा ॥

No. 1127 A. SAMPATKARĪSAMVITSTUTICARCĀ.

C. O. L. No. 1881 A.

Substance—Palm leaf. Size—13½" × 1½". Leaves—38. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—750.

Owner—Nārāyaṇaru Govindaru, Caṅganāśśeri.

Subject—Explanation of Sampatkarīsamvitstuti.

Beginning:

... ... ... ... ताशेषचिचेत्यात्मान्तरभेदतः क्षिप्ताशेषग्राहकग्राह्या सती अहमिति भाति । सततं स्वात्म...यासा- .... देवतानां ... ... संज्ञा । भगवती समग्रैश्वर्यसम्पन्ना

सरस्वती सर्वसंवित्स्रोतस्समुद्यभूमिर्वाग्देवता शक्तिपातवशोन्मिष-त्परमप्रकाशविमर्शात्मकवरभैरवसङ्घट्टसमावेशाभिलापाणां तदुपाय-भूतश्रीसम्पत्करीसंविन्माहात्म्यानुसन्धानरूपैतत्स्तोत्रचर्चार्थावधार-णेप्सूनां शुश्रूषूणां भवतां मुदे परमनैरपेक्ष्यलक्षणपरमानन्दा-त्मकस्वानुभवरूपपरमनिःश्रेयसावाप्तमतत्त्वाय मन्तोपाय अस्त-हृदये अविच्छिन्नानुसन्धितया वर्ततामिति ।

End :

अथ स्तोत्रविरचनाप्रगल्भरूपां निजामहंकृतिं शमयन् स्तुति-विषयभूतां देवतां क्षमोप....विधोपदेशविधये बद्धोद्यमानां गिराम-ज्ञातोभयसन्मनामपि गिरश्राम्यतद्यापने (?) । तस्यास्ते सकलाति-शायिमहसो धाम्नः कृतो पञ्चाशदासन् । ग्रन्थार्थैषामक्षरेभ्यो गृही-तास्सल्लहाश्लूर्णशेषाश्च (?) जाताः ।

Colophon :

इति सम्पत्करीसंवित्स्तोत्रचर्चोद्यदात्मनाम् ।
श्लोकानामयमुद्द्योतः कृतोऽन्वयदिशा शिवम् ॥

हौं सौं र ओन्नमश्शिवाय ।

ओन्नमो नारायणाय । हरिः । शिवमस्तु ।

Author :

Remarks—The front Fol. is missing.

## ॥ पर्यन्तपञ्चाशिका ॥

## No. 1127 B. PARYANTAPAÑCĀŚIKĀ.

C. O. L. No. 1881 B.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—8. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—150.

Owner—Same as No. 1127 A.

Subject—The significance of *mantric* signs.

Beginning :

हरिः । श्रीगणपतये नमः ।

परं परस्थं गहनादनादि-
मेकं निविष्टं बहुधा... ।
.... ... ...
... ... ... ॥

गर्भाधिवास(क?)पूर्वकमरणान्तिकदुःखचक्रविभ्रान्तः ।
आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थम् ॥

आधारकारि .... .... .... .... ।
कथयत्यभिनवगुप्तः शिवशासनदृष्टियोगेन ॥

निजशक्तिवैभवभराद्ण्डचतुष्टयामिदं विभागेन ।
शक्तिर्माया प्रकृतिः पृथ्वी चेति प्रभाषितं प्रभुणा ॥

End :

इति वाग्व्याप्तिविद्वांसमेतद्वर्गाधिदैवतम् ।
माहेश्वरीमुखा देव्यो जागरेऽपि न भुञ्जते ॥

उपायेनाग्रहः कार्य उपेया भैरवीस्थितिः ।
यासौ स्वसंवित् तामेनां सर्वोपायां समाविशेत् ॥

आद्यन्तान्तर्गतानन्तवाच्यवाचकनिर्भरम् ।
रहस्यं मन्त्रमुद्राणां प्रपद्येऽनुत्तरं महः ॥

शम्भोरभिन्नहृदया जयन्ति गुरवः पुरा ।
निर्व्युत्थानसमाधानप्राप्तपर्यन्तसंविदः ॥

Colophon :

परिपूर्णा कृतिरियं श्रीमदाचार्याभिनवगुप्तनाथस्य पर्यन्तपञ्चाशिका नाम । नमश्शिवाय ।

Author—Abhinavaguptācārya.

Remarks—The Ms. is very much damaged.

---

## ॥ कैवल्यसिद्ध्युदयविमर्शस्तोत्रम् ॥

## No. 1127 C. KAIVALYASIDDHYUDAYA-VIMARŚASTOTRAM.

C. O. L. No. 1881 C.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—$6\frac{1}{2}$. 7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—135.

Owner—Same as No. 1127 A.

Subject—A review on the possibility of attaining salvation.

Beginning :

हरिः । श्रीगणपतये नमः ।

षष्ट्युत्तरत्रिशतसम्मितशासनांशु-
... संस्थितिसतत्त्वपडङ्घ्रिकाय ।
तस्मै नमः शशिदिनेशकलेन्धनाय
पुंशक्तिशम्भुतनवेऽस्तु तनूनपाते ॥

भार्यां खगा गगनसीम्नि तुलाधिरूढा
वायौ स्थिरा हुतवहे कलनात्त्वमाप्ता ।
तारा जले क्षितिपतित्वमवाप्य जैत्रा
शम्भोर्दशा दिननिशातनवो जयन्ति ॥

यैरात्मनो नवनमद्वयचित्स्वभाव-
स्याचार्य तेऽहमिति शाश्वतिकं प्रकृष्टम् ।
शम्भोर्जयन्ति त इमे प्रणवत्त्वमाप्ता-
स्तारास्तरन्ति यदुदीरणतो भवाब्धिम् ॥

सानन्दचिद्गुणितवृद्ध्युपयातवाञ्छा-
शक्तीन्दुभास्करकृशानुकलैक्यतत्त्वम् ।
तत्सर्ववाङ्मयसमुद्भवसद्म शम्भोः
शब्दाम्बुधेर्जयति वाग्भवनाम धाम ॥

अम्बाहिमूर्त्यलिकवर्णकलास्वरूपं
प्राणात्मनेदमखिलं जगदश्नुवानम् ।
सर्वोत्तरस्य सकलैतदहं विमृष्टेः
शम्भोर्महः सकलशक्तिमयं नतोऽस्मि ॥

विद्यामहस्स्वरचतुर्थकलात्रयात्म-
व्याप्त्या स्वया विशदयन्निखिलेन विश्वम् ।
श्रेयोनिधेर्भगवतश्शिवचित्रभानो-
...मद्वपुःप्रणवमस्मि नतस्तृतीयम् ॥

क्ष्वेलान्तकस्सह्परस्सहरावनाग-
संसारपद्धतिहरः प्रणवस्तुरीयः ।
स्पन्दः परो जयति शम्भुचिदम्बुराशेः
स्वां निष्कलां प्रणिदधाति दशां स येन ॥

End :

श्रीमन्मतेश्वरमहाह्रदहृत्सरोज-
सञ्जातचिन्मधुसुशीलनषट्पदाय ।
शिष्टं तदर्घ्यममृतं शिरसि स्थिताय
श्रीशम्भवेऽथ गुरवे विनिवेदयामि ॥

तत्पीतदत्तसकलाघनिरासर्व-
साम्यानुभूतिदतदर्घ्यनिषेवणेन ।
तां चिन्मयीमनुभवामि दशां नवत्व-
सन्धानमिर्वृतिरसायनसिद्धिरूपाम् ॥

कैवल्यसिद्ध्युदय इत्युचिताभिधाना
कैवल्यसंविदुदयक्रमचर्चनात्मा ।
उक्तावधूतमुनिना स्तुतिरेवमेषा
कैवल्यसिद्धिमनयानुभवन्तु सन्तः ॥

तत्त्वं शाम्भवमात्मसात्कृतमहस्त्रैविध्यमात्मीकृतं
साक्षत्त्वं सततं समेति सदृशश्शम्भुर्नवोऽहं दृशा ।
आम्नायार्थविलासदेशिकपदाम्भोजन्मरोचिःकणा
मौलौ जाग्रति विशदष्ट च परं किं प्राप्यमस्तीह नः ॥

Colophon :

कैवल्यसिद्ध्युदयविमर्शस्तोत्रे चतुर्थो विमर्शः ।

यस्सप्ततिः ।

Author—Avadhūta Muni.

Remarks—This Ms. comprises four Vimarśas only.

---

## ॥ श्रीशाम्भवोदयादर्शः ॥

No. 1127 D. ŚRĪŚĀMBHAVODAYĀDARŚA.

C. O. L. No. 1881 D.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—10. 7 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas — 200.

Owner—Same as No. 1127 A.

Subject—Exposition of the doctrine of Śāmbhava.

Beginning :

पृथ्व्यप्त्वग्न्यनिलव्योममर्माणि व्याप्नुवन् परम् ।
प्रपद्ये शाम्भवं तत्त्वं पञ्चवर्गफलाप्तये ॥

प्रातरुत्थाय शयनात् प्रत्यगाशामुखस्थितः ।
सव्यङ्गन्यासकरणं हेरम्बस्मृतिमाचरेत् ॥

आदौ विघ्ननिरोधार्थं हेरम्बाणुगङ्कुर्धरा(?) ।
जर्जरां गमम्यखलैस्ते.... ...रसैर्गुणाङ्ककम् ॥

सिते... ...जाननो मूपे परशुदन्ताधशूलभृत् ।
लक्ष्मीकाद्विघ्नसंघातं हरतीतीशजं वचः ॥

रसैर्गुणाङ्ककं यत्तत्प्रोक्तं तस्यायमाशयः ।
श्रीशासने त्रयस्सान्ति मन्त्रास्ते समुदीरिताः ॥

End :

अथ वक्ष्ये चण्डपूजां गुरुमण्डलवामतः ।
मण्डले चतुरश्रे तु पद्मं कुर्याच्चतुर्दलम् ॥

तन्मध्ये ललितं श्यामं त्रिभङ्गं त्रिफणं सुधीः ।
बिभ्राणं दक्षिणे खड्गं वामे नीलोत्पलं तथा ॥

कुळचण्डं हृदा ध्यात्वा तन्मन्त्रेण समर्चयेत् ।
ततः समस्तं निर्माल्यमर्पयेच्चण्डभागतः ॥

मुद्रादर्शनपर्यन्ते तस्याकाशे लयो भवेत् ।
श्रीदेशिकाय तत्पश्चादर्घ्यं यागावशेषितम् ॥

निवेद्य स्वात्मने भूयात्साधकः पार्थिवश्शिवम् ।
निष्कलङ्कमसारेऽस्मिन् क्रियामात्रपरायणे ॥

Colophon :

श्रीशाम्भवोदयादर्शे चतुर्थोऽयं समुद्गमः ।

Author :

Remarks—The Ms. comprises four Samudgamas.

---

## ॥ आह्निकम् ॥

### No. 1127 E. ĀHNIKAM.

C. O. L. No. 1881 E.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—$8\frac{1}{2}$. 7 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 160. Incomplete.

Owner—Same as No. 1127 A.

Subject—Elucidation of religious customs.

Beginning :

स्वस्ति श्रीमन्माहाम्नायतात्पर्यार्थो महेश्वरः ।
मङ्गलोदयमन्त्राम्भःपूर्णकुम्भो विजृम्भताम् ॥

प्रणौमि देवपार्णिं तं यदपाङ्गपथं स्पृशन् ।
तादृङ्क्वचत्तटस्थोऽपि मुक्तात्मा सिद्धिमश्नुते ॥

नमो निखिलमालिन्यविलापनपटीयसे ।
महाप्रकाशपादाब्जपरागप्रसरमाणवे ॥

प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः ।
आचरेदाह्निकं मन्त्री गुरुनाथमनुस्मरन् ॥

श्रीम(तिं?तीं) पादुकामस्य सम्पदामुपपादुकाम् ।
सर्वचिन्मन्त्रमाणिक्यमञ्जूषामनुचिन्तयेत् ॥

End:

अब्बापादमहावमनपिबन(?)वीर्यशब्दभैरवतेजोवभासकनाथपाद-महावमनपिबनवीर्यशब्द? भैरवितेजोवभासकि अब्बापाद महाकृतं सत्यं परं ब्रह्म चिदाकाशभैरवतेजोवभासकनाथपाद ह्रीं स्त्रीं महा-कृतं सत्यं परं ब्रह्म चिदाकाशभैरवितेजोवभासकि अब्बापाद ।

इति भैरवचिन्नाथान्मौलौ सप्तदशार्चयेत् ।
भैरव्योऽपि च तावत्यः पूज्यास्तत्तदनन्तरम् ।

अत्रापि स्थितिवत्कुर्यान्नवाक्षर्या... .... ... ॥

Colophon:

Author:

Remarks:

---

## ॥ श्रीनिष्कलक्रमचर्या ॥

No. 1127 F. ŚRĪNIṢKALAKRAMACARYĀ.

C. O. L. No. 1881 F.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—11.

7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—200.

Owner—Same as No. 1127 A.

Subject—The rites of worship according to *Śaiva-mata.*

Beginning :

हरिः ।

श्रीशिवान(न्द)पौत्रेण श्रीचिदानन्दसूनुना ।
श्रीकण्ठानन्दमुनिना... .... .... .... ॥
... ... ... ... ...

ह्रि ह्रि ग्लैं ह्रि ह्रि ग्लौं ह्रि ह्रि ग्लः इति कनिष्ठादितलान्तं करन्यासम् ए··· ··· ··· ···
.... .... ....मवक्त्राय नमः । उत्तरवक्त्राय नमः । दक्षिणवक्त्राय नमः । पूर्वद.... .... .... .... .... ....
.... .... ....क्तैर्वक्त्रन्यासञ्च कृत्वा सितो गजाननमूषे....

End :

शिरसि मिथुनाष्टकमङ्गलानि च मिथुने देवीं देवे देवं सायुधं सप्रेतं हृदये योजयित्वा मण्डलान्युद्वास्य देहदेवतास्तत्र तत्र देहप्रदेशे च लयं नीत्वा दक्षभागे दिव्यगुरुमण्डलोत्तरतश्चण्डपूजार्थं चतुर्दलसहितं चतुरश्रमण्डलं विधाय, 'श्रीं कुलचण्डाय श्रीम्' इत्यनेन मन्त्रेण श्रीकुलचण्डं श्यामवर्णं त्रिफणं भुजङ्गरूपं ललितकृतिं खड्गोत्पलधारिकरयुगं ध्यात्वा त्रिवारमभ्यर्च्य निर्माल्यजातं तस्मै निवेद्य योनिनमस्कारमुद्रादर्शनान्ते श्रीनवेश्वरहृदये योजयित्वा देवदेवी-

विद्याभ्यां श्रीपादुकया च श्रीसाधितमर्घ्यव्यञ्जनं निवेद्य तत्प्रस....
सात् क.... र

Colophon :

श्री।निष्कलक्रमचर्यायां चतुर्थ उल्लासः ।

Author—Śrīkaṇṭhānandamuni, son of Śrīcidānanda and grandson of Śrīśivānanda.

Remarks—The Ms. is much damaged.

---

## ॥ शाम्भवम् ॥

### No. 1127 G. ŚĀMBHAVAM.

C. O. L. No. 1881 G.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—9. 7—10 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas — 200. Incomplete.

Owner—Same as No. 1127 A.

Subject—Exposition of the *Āhnikas* relating to *Śaivamata.*

Beginning :

हरिः । श्रीगणपतये नमः ।

ब्राह्मे मुहूर्ते उत्थाय श्रीचरणं तद्विक्षेपात्मकं विश्वं चानुमन्द्-
ध्यात् । तद्यथा—

निष्प्रपञ्चं निराभासं निर्विकल्पं निरामयम् ।
कार्यकारणनिर्मुक्तं हेतुलक्षणवर्जितम् ॥

प्रकाशानन्दसामरस्यात्मकं स्वप्रकाशशिवशक्तिपञ्चकारणपञ्चवक्त्रषडध्वादिसमस्तकल्पनारहितं भावाभावशब्दाभिधानशून्यं स्वयमशून्यं परमार्थसत्तास्वलक्षणपरिपूर्णानन्दविग्रहं महाप्रकाशस्वभावं स्त्रीपुंनपुंसकाद्यभिधानहं स्वेच्छानिर्मितसमस्तप्रपञ्चसृष्टिस्थितिसंहारतिरोभावानुग्रहाख्यकार्यपञ्चकस्वर्गापवर्गादिनिर्वाहकतया तेषु तेषु व्याप्याधारतया ॐ च चरणं न तूणादात्मकतया परस्य वस्तुनः संज्ञेयमुच्यते । तस्मिन्नेवंविधे चरणे आत्मनः सहसिद्धमैक्यममलं वाभ्यङ्गप्रक्षालनार्थं 'अहंसः सोहमि'त्यनुसन्दध्यात् । पुनस्तदेव स्वेच्छावशेन वाक्परिमितभूतप.... ....कताद्विभूतिसमुद्भवेष्वात्मवर्गेषु च नियन्तृतया प्रविष्टं चतुर्धानुसन्धेयम् ।

End :

सोमसूर्यपदे हित्वा परशम्भुपदे वसेत् ।
तस्मिन् परावरे धाम्नि प्रलीनशशिभास्करे ॥

विभाति सक... ... ...दरं यथा ।
ततः स्खलित(च?चित्त)श्चेज्जीवन्मुक्तो भवेदिह ॥

तस्मिन् प्रलीन(च?चित्त)स्तु सद्य एव विमुच्यते ।
इत्येतच्छाम्भवं ज्ञा... ... ... ... ॥

शम्भुभावसमावेशाद्विवशेन गिरीन्द्रजे! ।
तदहं नाभिजानामि इतोऽन्यद्वक्तुमम्बिके! ॥

गोपायैतन्महाभा.... .... .... .... ।

Colophon :

Author :

Remarks :

॥ कामकलाविलासः ॥

No. 1127 H. KĀMAKALĀVILĀSA.

C. O. L. No. 1881 H.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Leaves—4. 5 - 8 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Same as No. 1130 A.

Subject—Description of *Kāmakala* in accordance with *Śāktamata.*

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सकलभुवनो.... .... .... ....

.... .... .... .... ....मात्रतनुः ।

सा जयति शक्तिराद्या निजसुखमयनित्यनिरुपमाकारा

भाविचराचरबीजं शिव.... .... .... ॥

.... .... ....गमबीजाङ्कुररूपिणी पराशक्तिः ।

अणुतररूपानुत्तरविमर्शलिपिलक्ष्यविग्रहा भाति ॥

परशिव.... .... .... .... ....विश्दे ।
प्रतिरुचिरुचिते कुड्ये चित्तमयेऽभिविशते महाविष्णुः ॥

चित्तमयोऽहङ्कारस्य.... .... .... .... ।
.... ....मिथुनपिण्डः कवलीकृतभुवनमण्डलो लसति ॥

सितशोणाबिन्दुयुगलं विविक्तशि.... .... ।
.... ....ष्टिहेतुः परस्परानुप्रविष्टसुस्पष्टम् ॥

End :

चित्प्राणविषयरूपांस्त्रितादियुगादिकारणांस्त्रिगुरून् ।
बीजत्रितयाधिपतीन् परीक्ष्य विद्यां प्रकाशयामास ॥

एतैरोलित्रितयं समनुगृह्णीतं(?)गुरुक्रमोऽभिहितः ।
उदितः पुण्य।नन्दादिति कामकलाङ्गनाविलासोऽयम् ॥

पराशिवभुजङ्गभावाकर्षी हर्षाय कल्पतां नित्यम् ।
चिन्तातरङ्गतरलस्तृष्णासलिलः प्रपञ्चवाराशिः ॥

यदनुग्रहेण तीर्णस्तस्मै श्रीनाथनात्रिकाय नमः ।

Colophon :

इति श्रीमत्पुण्यानन्दयोगीन्द्रविरचितः कामकला(विलास?)विलासः सम्पूर्णः ।

शिवशिव शिवाय नमः । शिवायै नमः ।

Author—Śrīmat Puṇyānandayogīndra.

Remarks—The leaves are much damaged.

## ॥ सौभाग्यसुधोदयः ॥

No. 1127 I. SAUBHĀGYASUDHODAYA.

C. O. L. No. 1881. I.

Substance—Palm leaf. Size—13½″ × 1½″. Leaves—11. 6—7 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—175.

Owner—Same as No. 1130 A.

Subject—A panegyric of Devī.

Beginning :

हरिः । श्रीगणपतये नमः ।

जयति ज्योतिरनुत्तरामिदमखिलं यस्य भासते भासा ।
सा जयति यत्र भानुर्न शीतभानुः कुतो बृहद्भानुः ॥

सा भाविकी सरूपा विमर्शत्रपुरस्य विद्यते शक्तिः ।
सैव चराचरमखिलं जनयति जगदेतदपि च संहरति ॥

तस्य निरुपाधिमूर्त्तेर्निखिलातीतस्य नित्यतृप्तस्य ।
संसारमोक्षसम्भ्रमसङ्गतिरनयैव सन्ततं भवति ॥

सेयं तदैकरस्यात्परा परामर्शरूपिणी शक्तिः ।
स्वस्वातन्त्र्येणोल्लासस्पन्दादेकाप्यनेकधा वितता ॥

प्रथमं पश्यन्त्यादिप्रकारभेदप्रपाञ्चिताकाराः ।
उत्तीर्णानाहत.... ....तनामवती सैव मातृका जाता ॥

End:

एतत्त्रितयसमष्टिश्रीगुरुनाथस्य पादुकात्रितयम् ।
सितशोणमिश्ररूपं तुर्यं वागादिमत्तथावेद्यम् ॥

सुभगत्वसुधारसोदयाय
स्वगुरूपायविशेषशेषभाजः ।
निजमानस(गृ?म)न्दरादम(स्त्रा?श्रा)-
(द)मृतानन्दसुधीरयुग्मसिन्धुम् ॥

Colophon:

इति श्रीमत्पुण्यानन्दशिष्यामृतानन्दयोगिप्रवरविरचिते सौभाग्यसुधोदये षष्ठः प्रपञ्चः ।

Author—Śrīmat Amṛtānandayogi, disciple of Śrīmat Puṇyānanda.

Remarks—The concluding three leaves are also devoted to certain panegyrics.

---

## ॥ दीक्षापद्धतिः ॥

## No. 1127 J. DĪKṢĀPADDHATI.

C. O. L. No. 1881 J.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—7. 7—10 lines per page and 56 letters per line. Script — Malayāḷam. No. of Granthas—225. Complete.

Owner—Same as No. 1127 A.

Subject — Description of Dīkṣā relating to *Śrī-vidyopāsana.*

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ विद्याया दीक्षाप्रकारो लिख्यते । अत्रायं सिद्धान्तः—षट्त्रिंशत्तत्त्वानि। विश्वं शरीरं कञ्चुकितं शिवे। जीवः निष्कञ्चुकः। परमशिवस्वविमर्शः पुरुषार्थः। वर्णात्मिका नित्या अचिन्त्यशक्तिका। शाक्तमन्त्राणामत्यन्तासक्तितासम्प्रदायविश्वासाभ्यासात्सर्वसिद्धिः। विश्वासे भूयिष्ठं प्रामाण्यम् । गुरुमन्त्रदेवतामनःपवनानामैक्यविभावनादन्तरात्मविमृष्टिरानन्दं ब्रह्मणो रूपम् । तच्च देहे व्यवस्थितम् । तस्याभिव्यञ्जकाः पञ्चमकारास्तैरर्चनं गुप्त्यप्राकट्यान्निरयो भावनादार्ढ्यात्सर्वज्ञतासिद्धिस्सर्वदर्शनानिन्दनं, न गणनं न कस्यापि। सच्छिष्ये रहस्यकथनम् । सदा विद्यानुसंवित्तिः। सततं शिवतासमावेशः। कामक्रोधलोभमोहमदमात्सर्याविहितहिंसास्तेयलोके(?) विरुद्धस्त्रीविद्वेषवर्जनम्। एकगुरूपास्तिरसंशयः। सर्वत्र निष्परिग्रहता। फलं त्यक्त्वा कर्मकरणम् । नित्यकर्मालोपो मपञ्चकालाभेऽपि नित्यकर्मप्रत्यवमृष्टिर्निर्भयता सर्वतास्सर्वं वेद्यम् । हविरिन्द्रियाणि । स्रुचश्शक्तय ऊर्ज्व-(स्व)लाः। स्वात्मनि शिवः पावकः। स्वयमेव होता। निर्विषयचिद्विमृष्टिः फलम्। आत्मलाभान्न परं विद्यते। सैषा शाम्भवी(लीलिनी?) वेश्येव । वेदादिविद्याः प्रकटाः। सर्वेषु दर्शनेषु गुप्तेयं विद्या। तत्र सर्वथा मतिमान् दीक्षेत ।

इति श्रीपञ्चक्रमतन्त्रे सिद्धान्तकथनम् ।

ओम् ।

वन्दे वासान्तमध्ये करिवरवदनं पुष्टिदेव्या सनाथं
हृत्पद्मे चित्प्रकाशं विमर्श?सहितं दक्षिणेशं महेशम् ।
श्रीविद्यानन्दनाथं दशशतदलसंवेष्टिते बीजकोशे
श्रीसिद्धाम्बासमेतं त्रिविधमलदहं सोमबालार्कभासम् ॥

आज्ञया गुरुनाथस्य सच्छिष्याणामपेक्षया ।
श्रीहंसानन्दनाथेन योगिना तेन सम्प्रति ॥

सर्वागमान् समालोक्य नातिसंक्षेपविस्तरम् ।
ऊर्ध्वस्रोतःप्रवेशार्थं दीक्षापद्धतिरुच्यते ॥

निरन्तरमहो व्याधिपीडोद्विग्नं च कामुकम् ।
अलसं कुत्सितं भीतिवर्जितं वर्जयेद् गुरुः ॥

आस्तिकं विमलं धीरमत्यलुब्धमनातुरम् ।
जन्ममृत्युजरादुःखभीतं वा भक्तिशालिनम् ॥

सम्यक् परीक्ष्य सद्भक्तमचिरेण चिरेण वा ।
निश्चित्य तद्गुणंर्लाभख्यातिलोभविवर्जितम् ॥

End :

यः प्रकाशोदयैः सिद्धैः क्रमस्सम्यङ्ङ् निरूपितः ।
तं कुर्यात्सिद्धयोगीन्द्रपादुकामात्रमाश्रितः ॥

सर्वं तेन कृतं कर्म सर्वं तप्तं तपो महत् ।
दृश्यते पादुकातत्त्वं स्वप्रकाशे परं महः ॥

Colophon :

साधकाचार्यसिद्धाख्यदीक्षाचारः प्रकीर्तितः ।
तृतीयेऽस्मिन् परिच्छेदे श्रीहंसानन्दयोगिना-॥

दीक्षापद्धतिरित्युक्ता परिच्छेदत्रयान्विता ।
अनया परितुष्टोऽस्तु सिद्धानन्दमहेश्वरः ॥

श्रीविद्यापूर्णदीक्षाप्रायश्चित्ताभिषेकादिकाः सम्पूर्णाः ।

Author—Śrīhaṃsānandanātha.

Remarks—The leaves are much worn out. The closing two leaves contain the invocatory rites.

## ॥ तत्त्वविमर्शिनी ॥

## No. 1127 K. TATTVAVIMARŚINĪ.

C. O. L. No. 1881 K.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Leaves—$8\frac{1}{2}$. 8 lines per page and 44 letters per line. Script — Malayāḷam. No. of Granthas—150. Complete.

Owner—Same as No. 1127 A.

Subject—Obsequies.

Beginning:

इष्टिस्तत्त्वानि मे जन्तोरन्त्योष्टिस्साधुनोच्यते ।
ज्ञानिनां कर्मिणां चैव सर्वथान्त्येष्टिरुच्यते ॥

कर्मणोन्मीलने ज्ञानं ज्ञानेन शिवतां व्रजेत् ।
शिवैक्यमेव मुक्तिः स्यादतः कर्म समाचरेत् ॥

परव्याप्तगतो यस्य देशिको ज्येष्ठ एव वा ।
कनिष्ठो वा स्वयं तस्य देशिकत्वं गतैनसः ॥

आत्मना वापि तेनैवान्त्येष्टिं यत्नेन कारयेत् ।
यस्तु ज्ञानक्रियातीव्राभ्यासादचिरजीवनः ॥

मृत्युं ज्ञात्वात्मनो विद्वान् तत्पूर्वं सप्तमं दिनम् ।
पञ्चमं वा तृतीयं वा प्रथमं वा स्वशक्तितः ॥

आरभ्य प्रत्यहं चक्रपूजामामरणान्तिकम् ।
कुर्वीत मृत्युदिवसे गोत्रीभिर्यज्वनां गणैः ।

योगिनीभिश्च तन्मध्ये मध्यासीनं गुरुं परम् ।
सर्वोपचारैः सम्पूज्य योगिनीद्रव्यपूर्वकैः ॥

प्रणिपत्य क्षमस्वेह मामनाचारिणं प्रभो ।
मया कृतं यद्दुष्कर्म प्रणीतं सुकृतं तथा ॥

विज्ञाप्यैवं गुरुं शिष्यः स्वार्जितानि धनानि च ।
भृत्यपूर्वकलत्रादिशरीरञ्चात्मना सह ॥

एतत्सर्वं गृहाणेति विज्ञाप्य गुरवे ददेत् ।

End :

संवत्सरे समापूर्णे बाह्याभ्यन्तरपूजनम् ॥
कृत्वाखिलप्रक्रमाणां तत्त्वातीते परात्परे ।

निराभासे समे शान्ते शिवे कुर्वीत योजनम् ॥
ततः प्रत्यब्दमेवं हि कुर्याद्दक्षेऽथवा तिथौ ।

कुलज्ञानविहीनो यः संसारभयमास्थितः ।
मरणात्पूर्वमभ्येत्य गुरुं ज्येष्ठमथापि वा ॥

स्वगोत्रजान् गुरून् शान्तान् प्रणम्यातिप्रयत्नतः ।
सन्तोष्य धनधान्याद्यैः सादरं विहिताञ्जलिः ॥

अनुगृह्य ममान्त्येष्टिं कृत्वा संरक्ष मां प्रभो ।
मम प्रसन्न मन्नाथेत्येवं विज्ञापयेद् बुधः ॥

रोगादज्ञे मृते तस्य पुत्राद्या वा स्वगोत्रजाः ।
स्वशक्त्यानुगुणं वित्तं दत्त्वान्त्येष्टिञ्च कारयेत् ॥

शवसंहारमारभ्य सर्वं संवत्सरावधि ।
साधारणन्तु सर्वेषां कर्म ह्यन्त्येष्टिके मतम् ॥

Colophon :

इति तत्त्वविमर्शिन्यामन्त्येष्टिः ।

श्रीगुरुभ्यो नमः ।

Author :

Remarks—After the completion of this work one Fol. contains the closing portion of Prathamonmeṣa in Saundaryamañjarī. The next 4 leaves deal with *Pūjāvidhi*. Tho last 4 leaves deal with certain Nyāsās.

## ॥ श्रीपञ्चार्थक्रमः ॥

No. 1127 L. ŚRĪPAÑCĀRTHAKRAMA.

C. O. L. No. 1881 L.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—4. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—125.

Owner—Same as No. 1127 A.

Subject—Details of worship relating to *Śakti.*

Beginning :

गणपतये नमः । अविघ्नमस्तु ।

श्रीपञ्चार्थक्रमो लिख्यते ।

योगनिद्रानुष्ठानं स... ... ... पूर्वं मूलकर्तुः प्रकटनाममुच्चार्य तन्मा... ... नादुत्थाय तत्रैव पूर्वाभिमुखो वा भूत्वा सुखासने समुपविश्य निश्चयमुद्रां बद्ध्वा ... ... ... णादिश्रीचरणस्मरणपूर्वकं श्रीमूलविद्यां मनसोच्चार्य शिरसि स्वस्त्यादि ह्रीं श्रीं स्वस्तिश्रीपरमशिवशक्तिनाथाद्यशेषगुरुपारम्पर्यक्रमेण स्वगुरुनाथपादाम्बुजं यावत्तावत् प्रणौमि । गुरुपादुकया...भिवन्द्य भूयोऽपि श्रीमूलविद्यां मनसोच्चार्य परामृतेनाप्लाव्य दंष्ट्रिण्यादिमुद्रात्रयं सन्दर्श्य निश्चयमुद्रां बद्ध्वा निजपुटितविद्यां सकृत् सञ्जप्य श्रीत्रिदशेश्वरीमेकवारं सञ्जप्य ह्रां हृदयाय नमः इत्यादि षडङ्गानि विन्यस्य स्वपादुकां स्वमूलाधारे विन्यस्य स्तोत्रादि पठित्वोत्थाय भूमौ पञ्चाङ्गैः प्रणमयेत् । प्रातर्गुरुस्मृतिरिति ।

End:

ततः पुरस्तान्महामुद्रां प्रदर्श्य महारव...........र्यदिव्यदिक्चर्य-
युक्तजलेन चतुरश्रं मण्डलमुपलिप्य ह्रीं श्रीं हूं महा ओड्याणपीठपाद
इति गन्धपुष्पाक्षतैरभ्यर्च्य करक्षाळनं कृत्वा ई...........क्षभागे
नवयोनिवृत्तचतुरश्रं मण्डलं विलिख्य ईशानाद्यष्टाश्रिषु मध्ये च
त्रिमूलविद्याक्षरैर्वामावर्तेनालिख्य पुनरपि मध्या .... .... ...
.... ..... .... .... ....

Colophon:

Author:

Remarks—The Ms. is very old and injured.

## ॥ शिवबोधज्ञानदीपिका ॥

No. 1127 M. ŚIVABODHAJÑĀNADĪPIKĀ.

C. O. L. No. 1881 M.

Substance—Palm leaf. Size—13½″ × 1½″. Leaves—1½. 5—11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—38. Complete.

Owner—Same as No. 1127 A.

Subject—Elucidation of the knowledge of *Śiva-bodha*.

Beginning:

हरिः ।

विश्वातीतं परं व्योम श्मशानस्थानमुज्ज्वलम् ।
अखण्डपूर्णपरचित्प्रकाशो वृक्ष ईश्वरः ॥

परसंवित्प्रभावल्ली परानन्दो मठो महान् ।
इहापरमकर्तुं च पूर्णबोधः स्वतन्त्रतः ॥

पूर्णाहन्ता परा सत्ता पराशक्तिश्च पीठिका ।
अच्छिन्नसच्चिदानन्दशिवरूपस्वरूपतः ॥

विश्वोत्तीर्णा विश्वमयी व्याप्तिमुद्रा तु खेचरी ।
अवस्थान्तस्वानुभवभरिता भैरवी परा ॥

अनुत्तरशिवाकारसंवित्संज्ञा सदोदिता ।
निराश्रया निराकारा शिवचिद्ध्यानमात्मनि ॥

End :

एतौ विबन्धमोक्षौ च परमेशस्वरूपतः ।
न भिद्यते न भेद्यश्च तनुमः परमेश्वरः? ॥

इत्थमिच्छाक्रियाज्ञानशक्तिशूलाम्बुजाश्रितम् ।
भैरवं सर्वभूतानां स्वभावं परिशून्यताम् ॥

सुकुमारमतीन् शिष्यान् प्रबोधयितुमञ्जसा ।

Colophon :

इति नवगुप्तानन्दनाथविरचिता शिवबोधज्ञानदीपिका ।

शुभम् ।

Author—Navaguptānandanātha.

Remarks—The Ms. is well preserved. The script is legible.

## ॥ सम्पत्करीसंवित्स्तोत्रचर्चोद्द्योतः ॥

## No. 1128. SAMPATKARĪSAMVITSTOTRA-CARCODYOTA.

C. O. L. No. 679.

Substance—Paper. Size—$11\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—51. 51 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—750.

Owner—C. O.

Subject—A panegyric of Sampatakarī.

Beginning :

... ... ... ... ...

.... मधुनोद्योतः कथ्यतेऽन्वयवर्त्मना ।
या कामत्वकवित्वानिर्वृतिमत ... ...
... ... ... ... ...

यातविनोदकौ.......वतीधाम्नः कुलाचाकुलात्
भात्यन्तः कृत... ... ... ...
शेषचिन्वेत्यसास्तु ... ... ... ...
सरस्वती भगवती सम्पत्करी वो .... ....

.... ....

End:

सकलमहोतिशायिमहसो धाम्नः संविद्रूपस्य विश्रान्तिस्थानस्य ते भवत्याः स्तोत्रे .... .... ... न कर्माणि मौग्ध्यवशात: इतिकर्तव्यताज्ञया कृतो मदीयो भरः आग्रहस्ते वात्सल्यनिघ्नहृदयायाः परं क्षन्तव्योऽस्तु मदीयमपराधं क्षमस्वेति शिवम् ।

Colophon:

इति सम्पत्करीसंवित्स्तोत्रचर्चोद्द्योते पञ्चम उदयः ।
इति पञ्चम उदयः ।

Author:

Remarks—A few leaves are missing in the beginning. The manuscript extends up to the fifth *udaya*.

---

## ॥ सारस्वतस्तवः ॥

### No 1129 A. SĀRASVATASTAVA.

C. O. L. No. 1917 A.

Substance—Palm leaf. Size—12¾" × 1⅝". Leaves—4. 7 lines per page and 40 letters per lien Script—Malayāḷam. No. of Granthas—75.

Owner—Valia Rāja Avl., Eṇṇakkāṭṭu Koṭṭāram.

Subject—A panegyric of Sarasvatī.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

बाष्कल उवाच ।

वागीश्वरो महाबुद्धिः केन जप्येन सुव्रतः ।
जितवान्नीतिपः शुक्रं तन्मे ब्रूहि द्विजोत्तम ॥

आश्वलायन उवाच —

गुह्यमेतन्मया विप्र श्रुतं सर्वमजाच्छुभम् ।
दशश्लोकीति विख्याता निगमार्थविचारिणी ॥

बाष्कल उवाच —

श्रोतुमिच्छामि विप्रर्षे दशश्लोकीं तवोत्तमाम् ।
श्रोतव्यं यदि ते विप्र कारुण्यं यदि चेन्मयि ॥

आश्वलायन उवाच —

शृणु वत्स स्तवं दिव्यं सर्वाज्ञानविनाशनम् ।
सर्ववेदमयं दिव्यं सर्वमन्त्रमयं तथा ॥

भुक्तिदं मुक्तिदं चैव अर्थकामप्रसाधनम् ।
जातिस्मृतिप्रदं दिव्यं हृदयग्रन्थिभेदनम् ॥

अत्र किं बहुनोक्तेन सर्वार्थैकप्रसाधनम् ।
ध्यानयुक्तमिदं वक्ष्ये स्तवराजमनुत्तमम् ॥

शृणुष्वावहितो भूत्वा सर्वमेतद्वदामि ते ।

End :

वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे
भक्तेभ्यो वरदानपेशलकरां कर्पूरकुन्दोज्ज्वलाम् ।

उज्जृम्भाम्बुजपत्रकान्तिनयनस्निग्धप्रभालोकिनीं
ये त्वामम्ब न शीलयन्ति मनसा तेषां कवित्वं कुतः ॥

ऐन्द्रस्येव ।
वृन्दारण्ये विलसितशरच्चन्द्रिकायां निशायां
गोपस्त्रीभिः कलमुरलिकानादसम्मोहिताभिः ।
रासक्रीडामधिकमधुरामादधानं युवानं
वन्दे कृष्णं वलभिदुपलश्यामलाङ्गं मुकुन्दम् ॥

Colophon :

Author :

Remarks—The Ms. contains Daśaśloki and Sarasvatīpañcaka. Towards the end is seen a verse in praise of Mukunda. The work is composed in the form of a dialogue between Bāṣkala and Āśvalāyana.

---

## ॥ आश्चर्यचूडामणिः ॥

## No. 1129 B. ĀŚCARYACŪḌĀMAṆI.

C. O. L. No. 1917 B.

Substance—Palm leaf. Size—12¼″ × 1¾″. Leaves—45. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas — 900. Complete.

Owner—Same as No. 1129 A.

Subject—The story of Rāma.

Beginning :

हरिः श्रीगणपतये नमः ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

वीचीस्थाने सहस्रं मरतकपरिघस्पर्धि बिभ्रद् भुजाना-
मुत्फेनो हारजालैररुणरुचिरनन्ताहिरत्नप्रभाभिः ।
बिभ्राणः शङ्खमन्तश्चरमचरमनिर्वापणीयश्च तेजः
पायाद्वः शार्ङ्गधन्वा शयित इव समुद्रैकदेशे समुद्रः ॥

End :

रामः—

पूर्वं राक्षसीविप्रलब्धस्य मे देव्याः प्रत्ययकारणमासीदाश्चर्य-चूडामणिः ।

नार—

भद्रमुख देवाननुगच्छामि । किं ते भूयः प्रियमुपहरामि ।

रामः—

सिद्धार्थोऽहम् । किमतः परमहमिच्छामि । तथाप्येतावदस्तु ।

मन्त्रैरावर्ज्यमानं हविरमरपतेरस्तु कल्याणवृष्ट्यै
धन्वी सङ्कल्पजन्मा सरभसमपथे सायकान् संहरेत ।
राजानो राजधर्मप्रणिहितमनसो मौलिभारं वहन्तां
प्रज्ञा यातु प्रसादं प्रतिदिनमवधूयान्तरावद्धमौनम् ॥

(निष्क्रान्ताः सर्वे)

Colophon :

श्रीमच्छक्तिभद्रविरचितचूडामणिनाटके सप्तमोऽङ्कः ।

Author—Saktibhadra.

Remarks—The leaves are much damaged. The work is available in print. The three leaves following the colophon contain certain verses from Pratimānāṭaka.

---

॥ धर्मसंहिता ॥

## No. 1129 C. DHARMASAṂHITĀ.

C. O. L. No. 1917 C.

Substance—Palm leaf. Size—12¼″ × 1⅜″. Leaves—56. 6—9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—950. Incomplete.

Owner—Same as No. 1129 A.

Subject—A disquisition on *Dharma*.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सच्चिदानन्दरूपाय विष्णवे परमात्मने ।
नमः सर्वान्तरज्ञाय सदसद्व्यक्तिहेतवे ॥

शुद्धस्फटिकसङ्काशां सर्वाभरणभूषिताम् ।
वन्दे सरस्वतीं वाक्स्थां वाञ्छितार्थोपलब्धये ॥

महर्षेस्सर्वलोकेषु पूजितस्य महात्मनः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥

कृत्वाथावभृथस्नानं सरस्वत्यां तपस्विनः ।
शौनकाद्याः सशिष्यास्ते जग्मुर्व्यासाश्रमं परम् ॥

व्यासः समागतान् सर्वान् सशिष्यान् संशितव्रतान् ।
अर्घ्यपाद्यादिभिः सम्यक् पूजयामास बुद्धिमान् ॥

तेन सम्भाविताास्सर्वे कृतकृत्यास्तपोधनाः ।
तेष्वासनेषूपविष्टाः पश्यन्तश्च परस्परम् ॥

उपविष्टेषु सर्वेषु विद्वत्सु च तपस्विषु ।
शौनकः प्रणिपत्योर्व्यां व्यासं सत्यवतीसुतम् ॥

तेषां मध्ये समासीनमृषिं सर्वार्थपारगम् ।
विनयावनतो भूत्वा सर्वज्ञं प(र्य?रि)पृच्छति ॥

भगवन्! सर्वधर्मज्ञ! सर्वशास्त्रविशारद! ।
परं रहस्यं त्वं वेत्सि यन्न विन्दन्ति मादृशाः ॥

कैवल्यं निष्कलं शान्तं शाश्वतं त्वयि तिष्ठति ।
त्वं विष्णुस्सर्वभूतात्मा सच्चिदानन्दविग्रहः ॥

त्वां तु पृच्छाम्यहं ब्रह्मन् संशयो हृदि वर्तते ।
केचिद्ध्यानं प्रशंसन्ति केचिद्योगं विचक्षणाः ॥

केचिद्वेदान् पठन्ति स्म केचित्सांख्यं परं विदुः ।
केचिद्दानं प्रशंसन्ति केचित्तीर्थं परं विदुः ॥

केचिद्धर्मं परं प्राहुः केचिदर्थं परं मुने ।
एतन्मे संशयं तात च्छेत्तुमर्हस्यशेषतः ॥

End :

श्रीधरं वामनं मात्स्यं वाराहं गरुडं तथा ।
वासुदेवमुपेन्द्रञ्च कौर्मं दामोदरं शुभम् ॥

लक्ष्मीनारायणं मुख्यं गृहस्थानाञ्च पुष्टिदम् ।
प्रद्युम्नमनिरुद्धञ्च कृष्णं सङ्कर्षणं शुभम् ॥

(तथा)गृहस्थैरर्चनीयमर्थपुत्रादिकाङ्क्षिभिः ।
हिरण्यगर्भं परमं पवित्रं भुवि दुर्लभम् ॥

अन्तर्ध्वनिसमायुक्तं कृष्णवर्णं सुवृत्तकम् ।
नानालक्षणसंयुक्तं हैरण्यं लक्षणं विदुः ॥

सकलैश्वर्यदं ज्ञेयं सर्वमूर्त्तिषु भास्वरम् ।
साळ... .... ... .... .... ॥

Colophon :

इति धर्मसंहितायां पञ्चदशोऽध्यायः ।

Author :

Remarks—The Ms. contains the first 15 chapters and a fragment of the 16th.

## ॥ हरिलीला ॥

## No. 1129 D. HARILĪLĀ.

C. O. L. No 1917 D.

Substance—Palm leaf. Size—$12\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—12 7 lines per page and 32 letters per line Script—Malayāḷam. No. of Granthas — 175 Incomplete.

Owner—Same as No. 1129 A.

Subject—Description of the sports of Viṣṇu.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नमः कृष्णाय नित्यैकसच्चिदानन्दरूपिणे ।
जगत्सर्गविसर्गाय साक्षिणेऽचिन्त्यशक्तये ॥

जयन्ति बोप्पदेवस्य वाचो विबुधसत्कृताः ।
घनसारोज्ज्वलाभासाः क्षीरोदस्येव वीचयः ॥

श्रीमद्भागवतस्यानुक्रमणे तद्विनिर्मिता ।
हरिलीलाभिधानेयं यथाशक्ति विचिन्त्यते ॥

इह कश्चिद् गुरुप्रसादाधिगतसमस्तशास्त्रार्थतत्त्वो द्विजाग्रणीर्बोप्प-
देवनामा भागवतार्थं विवरिषुः प्रतिजानीते—

श्रीमद्भागवतस्कन्धाध्यायार्थादि निरूप्यते ।
विदुषा बोप्पदेवेन मन्त्रिहेमाद्रितुष्टये ॥

भागवतं च तस्य स्कन्धाश्च अध्यायाश्च तेषामर्थः । स आदि-
र्यस्य तत् तथा । आदिशब्दान्महाप्रकरणावान्तरप्रकरणार्थोपपत्तयः ।

End:

जन्म पद्मजशब्दोक्तिरादौ पद्मं महाद्भुतम् ।

ततो ब्रह्मेति क्रमविवक्षया पद्मजेन स्तुतिस्तस्य तस्य सृष्यत्कस्य
सर्गाः कालोक्तयेदेशमहादह?न्तन्मात्रेन्द्रियवैकारिकतामसस्थावर-
तिर्यगर्वाक्स्रोतोदे(?) भेदात् दशत्वम । ते च कालनिरूपणाय कालां-
शाः परमाण्वाद्याः अंशाः अवयवाः ।

Colophon:

इति प्रथमस्कन्धः ।

Author—Boppadeva.

Remarks—The Ms. covers the first *skándha* and a fragment of the 2nd.

---

## ॥ शिवरात्रिमाहात्म्यम् ॥

No. 1129 E. ŚIVARĀTRIMĀHĀTMYAM.

C. O. L. No. 1917 E.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—16

6—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 225. Complete.

Owner—Same as No. 1129 A.

Subject—Description of the merits of *Śivarātri Vrata*.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

पुरा कैलासशिखरे मेरौ शिवनिकेतने ।
कल्पवृक्षसमाकीर्णे चामीकरतरूज्ज्वले ॥

दीप्यमानार्कसङ्काशे मणिधात्वाद्यलङ्कृते ।
हेमाम्बुरुहवृन्दाढ्यैस्तटाकैरुपशोभिते ॥

सिंहर्क्षशरभाकीर्णे नागनादैश्च नादिते ।
मयूरहंसकारण्डचक्रवाकोपशोभिते ॥

पुंस्कोकिलकपोतालिवृन्दैः कूजद्भिराकुले ।
नृत्यद्भिरप्सरोभिश्च चारणैश्च समन्ततः ॥

किन्नरीभिरनेकाभिस्सङ्कीर्णे सुरवाकुले ।
वीणावेणुरवैश्चैव नानावाद्यरवैस्तथा ॥

प्रकीर्णकुसुमामोदमत्तालिकुलकूजिते ।
रागद्वेषभयक्रोधमदमात्सर्यवर्जितैः ॥

अनेकप्राणिजालैश्च नानाविध्वकराननैः ।
प्रज्ज्वलद्वह्निसङ्काशैर्मुनिभिश्च तपोधनैः ॥

नानाश्चर्यगुणाधारैर्गणैश्च परिवारितैः ।
दिव्योद्याने च रम्ये च स्फाटिके मण्डपे शुभे ॥

मुक्तादामवितानैश्च पूर्णचन्द्रसमप्रभैः ।
अलंकृतैर्द्विजश्रेष्ठैर्बहुमङ्गलकैर्युते ॥

अद्भुतं रूपमास्थाय उमया क्रीडने हरः ।
क्रीडमाने महादेवे कालकण्ठे महेश्वरे ॥

चन्द्रार्धमौलौ विप्रेर्षे कालो बहुतरो गतः ।

End :

तस्मात्सर्वप्रयत्नेन कर्तव्यं तच्छ्रिया(ज्ञ?ज्ञ)या ।
शिवरात्रिव्रतं विप्र कीर्तयेत्तच्छृणोति वा ॥

सर्वपापविनिर्मुक्तः शिवलोके महीयते ।
पठ्यमानमिदं पुण्यं यमुद्दिश्य तु पठ्यते ॥

न तस्य रोगा बाधन्ते वातपित्तकफोद्भवाः ।
नाकाले मरणं तस्य न सर्पश्चापि दश्यते ॥

न विषं क्रमते देहे न जळान्धत्वमूकता ।
न चोत्पातभयं तस्य नोपसर्गभयं भवेत् ॥

नाभिचारकृतैर्दोषो लिप्यते न कदाचन ।
यत्रेदं लिखितं विप्र स्थापितं पूजितं यदि ।

न तस्य शोको दौरात्म्यं कदाचिदपि जायते ।

Colophon :

इति स्कान्दपुराणे शिवरात्रिमाहात्म्यं समाप्तम् ।

Author :

Remarks—The two additional verses given below occur after the colophon:

दण्डश्शूलादुपरि परितः प्राणनाथानिमित्तं
सीताहेतोर्मरणमगमद्रावणो रामबाणैः ।
प्राप्ताहल्यः सुरपतिरभूदात्तशापो मुनीन्द्रात्
को वा लोके विषयनिरतो दीनतां नोपयाति ॥

आरुह्यन्ते कुसुमतरवश्छिद्यते सारवृक्षो
वित्तक्षीणैरुपचितधनः पीड्यते बन्धुभिश्च ।
आलिङ्ग्यन्ते वरयुवतयः खन्यते भूस्सतोया
प्रायो लोके वरमगुणता गुण्यता खल्वनर्थः ॥

## ॥ सूर्यशतकं (सव्याख्यम्) ॥

### No. 1130. SŪRYAŚATAKAM
### with commentary.

C. O. L. No. 1339.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—84. 7—9 lines per page and 23—28 letters per line. Script—Grantha. No. of Granthas—1000.

Owner —R. Śaṅkara Vādhyār.

Subject—A panegyric of *Sūrya.*

Beginning :

जम्भारातीभकुम्भोद्भवमिव दधतस्सान्द्रसिन्दूररेणुं
रक्ताः सिक्ता इवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या(?)तुल्यकालं कमलवनरुचो वारुणो वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥

मयूरककवेः काव्यं सवितुश्शतकं मया ।
व्याख्यायते नमस्कृत्य गुरुभ्यस्तत्प्रसादतः ॥

तत्रादौ तावत् सम्बन्धाभिधेयप्रयोजानि वक्तव्यानि श्रोतृजनप्रवृत्त्यंशत्वात् । सम्बन्धाभिधेयप्रयोजनविकले हि ग्रन्थे प्रेक्षापूर्वकारिणां प्रवृत्तिर्न भविष्यति । निस्संबन्धे दशदाडिमानि षडपूपानीत्येवमादौ वाक्ये न प्रवर्तन्ते । तथा निरभिधेये शब्दसन्तानमात्रे कचटतप इत्येवमादौ निष्प्रयोजने काकदन्तपरीक्षासंदृक्षे च न प्रवर्तन्ते । तस्मादत्र सम्बन्धाभिधेयप्रयोजनानि कथ्यन्ते ।

End :

एवमुक्तलक्षणो भगवान् पुण्डरीकाक्षः सर्वेषामतः आत्मा हिरण्यपुरुषः युष्मभ्यं बन्धमोक्षज्ञानद्वतात्विति(?)—

Colophon :

.... .... .... ...भूत्यै-
शतमिति रचिता श्रीमयूरेण भक्त्या ।

... ... ... ... ..

... ... ... ... ... ||

Author—Mayurakavi.

Remarks—The leaves are much injured. The script is not discernible towards the end.

|| सूर्यशतकटीका ||

No. 1131. SŪRYAŚATAKAṬĪKĀ.

C. O. L. No. 232.

Substance—Paper. Size—14″ × 8½″ Pages—118. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1500. Complete.

Owner—C. O.

Subject—Same as No. 1130.

Beginning:

चराचरस्य जगतः सृष्टिस्थित्यन्तहेतवे ।
नमो विश्वप्रदीपाय सूर्यायार्यनुताङ्घ्रये ॥

मयूरकविना प्रोक्तं सावित्रशतकं मुदा ।
व्याख्यायते नमस्कृत्य गुरुभ्यस्तत्प्रसादतः ॥

पूर्वमेव कृता यस्य सद्भिर्व्याख्यानपद्धतिः ।
तस्मादभ्यर्थमादाय व्याख्या तस्य प्रवक्ष्यते ॥

तत्र प्रथमं तावत् कविस्त्रिचत्वारिंशद्वृत्तैः सूर्यरश्मीनभिष्टौति । षड्भिः सप्तीन्, अरुणं पुनर्द्वादशभिः, स्यन्दनमेकादशभिः, मण्डलमष्टभिः, सूर्याख्यां परां देवतां विंशत्या ।

End :

एवं यो न निश्रीयते यो जगतां सर्वदा सर्वतः सर्वथा सर्वेण प्रकारेण पालनादिना सर्वाकारेण बान्धवाद्युपगमनेन सर्वदा उपकारी अनुग्रहात्मकः एवंभूतोऽसौ दशशताभीशुः सहस्रकिरणः वो युष्माकमभ्यर्थितमभिलषितं दिशतु ददातु ।

शतकं समाप्तम् ।

श्लोका लोकस्य भूत्यै शतमिति रचिताः श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद्यः सकृदपि पुरुषः सर्वपापैः प्रमुक्तः ।
आरोग्यं सत्कवित्वं श्रियममितबलं कान्तिमायुःप्रकर्षं
विद्यामैश्वर्यमर्थं सुखमपि लभते सोऽत्र सूर्यप्रसादात् ॥

चात्वारिंशत् प्रभायास्त्रिभिरधिकमथो वाजिनां षट्कमेकं
पश्चान्नेतुर्द्विषट्कं पुनरपि च दश स्यन्दनस्यैकयुक्तम् ।
भूयोऽष्टौ मण्डलस्य स्तुतिरपि च रवेर्विंशतिः श्रीमयूरा-
दित्थं जातं पठेद्यः शतकमनुदिनं सूर्यसायुज्यमेति ॥

Colophon :

सूर्यशतकस्य टीका श्रीनारसिंहस्य पुत्रेण गोपालेन कृताभवत्

शुभं भूयात् ।

Author—Gopāla.

Remarks — This commentary is elaborate and exhaustive.

## ॥ सूर्यशतकम् (सव्याख्यम्) ॥

## No. 1132. SŪRYAŚATAKAM with commentary.

C. O. L. No. 1643.

Substance—Palm leaf. Size—7″ × 2″. Leaves—94. 9 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1500. Complete.

Owner—Rāghava Menon, Talavaḍi.

Subject—Same as No. 1131.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

...इव ये कराः कमलवनोद्घाटनं कुर्वते कमलवनस्य विदारणं कुर्वन्ति, कालाकारान्धकाराननपतितजगत्साध्वसध्वंसकल्याः कालाकारस्य नीलरूपस्य । कालः अन्तकः तदाकारस्य तत्सदृश इत्ययमप्यर्थो गम्यते । कालाकारस्यान्धकारस्यानने मुखे

पतितानां जगतां साध्वसस्य भयस्य ध्वंसने विनाशने कल्याः शक्ताः। कल्य इति शक्तिरुक्तः; उच्यते। 'रोगादुन्मुक्त उल्लाघः कल्यो वार्तश्च कथ्यते' इति। कालरूपतिमिरपटलनिमग्नत्वादन्धीकृतानां चोराद्यभिभवेन वेपमानानां जगतामालोकप्रदानेन भयविनाशने समर्थाः इत्यर्थः। यथा अन्तकस्यानने पतितानां नरकपातभीतानां जगतान्नरकपातहेतुभूतपापनिराकरणे साध्वसध्वंसकल्याः भवन्ति तद्वदिति भावः। किसलयरुचयः, प्राभातिकत्वात् पल्लवपाटलाः भास्करस्य कराः रश्मयः कल्याणं क्रियासुः। अत्र करा इत्यभिधानोपादानं हस्तस्फुरणात् कमलवनाल्लक्ष्म्याः आदाने भक्तजनप्रदाने च योग्यताप्रदर्शनार्थम्।

End—Same as No. 1131.

Author :

Remarks—The last 20 leaves contain the inflected forms of certain words. The opening verse is not commented upon in this Ms.

## ॥ सूर्यशतकम् (सव्याख्यम्) ॥

## No. 1133. SŪRYAŚATAKAM
with commentary.

C. O. L. No. 1653.

Substance—Palm leaf. Size—7″ × 2″. Leaves—118.

8 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Owner—Uttrṭṭādi Tirunāḷ Rāmavarma Tampurān, Pantaḷam Koccukoikkal.

Subject—Same as No. 1131.

Beginning:

ति तद्वत् अस्यापि भवति । इमं विशिष्टक्रममाश्रित्य स्तुवतः सूर्यशतके एव अभिप्रायो ज्ञायते । अथवा कश्चिदायान्तं राजानं दृष्ट्वा तं स्तोतुकामः तत्संबन्धीन् रथगजतुरगपदात्यादीन् वर्णयति । तद्वर्णनापि तस्य राज्ञः स्तुतिर्भवति । तस्मात् रश्म्यादिवर्णनमपि सूर्यस्य स्तुतिर्भवति । तस्माद् रश्म्यादीन् स्तुतवान् इत्यदोषभाक् ।

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रमिन्दूररेणुं
रक्ताः सिक्ता इवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥

End—Same as No. 1131.

Author—Text: Mayūrakavi.
Com: Gopāla, son of Śrī Narasimha.

Remarks—15 leaves at the outset are missing.

## ॥ सूर्यशतकव्याख्या ॥

## No. 1134. SŪRYAŚATAKAVYĀKHYĀ.

C. O. L. No. 1811.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—159. 7 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—1500. Complete.

Owner — Brahmadattan Nambūri, Vagilaśśeri, Paṭṭāmbi.

Subject etc.—Same as No. 1131.

Colophon:

मू—शतकं समाप्तम् ।
व्या—योऽभूत्सवर्णो वटपारिजातः
श्रीनारसिंहेति भुवि प्रसिद्धः ।
तत्सूनुना सूर्यशतस्य टीका
गोपाशिवेनेह कृता प्रयत्नात् ॥

इति सूर्यशतकटीका समाप्ता ।

Author—Gopaśiva.

Remarks—The colophon furnishes the name of the author.

## ॥ सौन्दर्यलहरी (भाषाव्याख्यायुता) ॥

## No. 1135. SAUNDARYALAHARĪ
with Bhāṣāvyākhyā.

C. O. L. No. 221.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—96. 8 lines per page and 19—22 letters per line. Script—Malayāḷam. No. of Granthas — 875. Incomplete.

Owner—Nārāyaṇa Bhaṭṭa.

Subject—A panegyric of Devī.

Beginning :

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
 न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
 प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥

परः शक्त्या युक्तः എന്നൊണ്ടൊരുപക്ഷം ।

हे शरण्येति चतुर्थश्लोकादि(हग्रा)ह्यम् । शिवः शक्त्या युक्तः भवति यदि तर्हि प्रभवितुं शक्तः भवति

ശിവൻ ശക്തിയായിരിക്കുന്ന നിന്നോട്ടു യുക്തനായിട്ടു് ഭവിക്കുന്നോനെന്നിരിക്കുന്നതാകിൽ പ്രഭവിപ്പാനായിക്കൊണ്ടു് പ്രഭാവവാനായിക്കൊണ്ടു് ശക്തനായി ഭവിക്കുന്നോൻ. ഏവം നചേൽ സ്പന്ദിതുമപി കുശലഃ ന ഖലു. ഈവണ്ണമല്ലെങ്കിൽ സ്പന്ദിപ്പാനായിക്കൊണ്ടുപോലും കുശലനായിട്ടു് ഭവിക്കോനല്ല. നിശ്ചയം, അതഃ, ഹരിഹരവിരിഞ്ചാദിഭിരപി ആരാദ്ധ്യാം ത്വാം പ്രണന്തും സ്തോതും അകൃതപുണ്യഃ കഥം പ്രഭവതി-ഇതു ഹേതുവായിട്ടു് ഹരിഹരവിരിഞ്ചാദികളാൽപ്പോലും ആരാദ്ധ്യയായിരിക്കുന്ന നിന്നെ പ്രണമനം ചെയ്‌വാനായിക്കൊണ്ടും സ്തുതിപ്പാനായിക്കൊണ്ടും അകൃതപുണ്യനായിരിക്കുന്നവൻ ഏങ്ങനെ പ്രഭവിക്കുന്നുവെന്നർത്ഥം.

End :

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया ।
करग्राह्यं शम्भोर्मुखमुकुरवृन्दं गिरिसुते
कथङ्कारं ब्रूमस्तव चिबुकमौपम्यरहितम् ॥

ഹേ ഗിരിസുതേ തവ ഔപമ്യരഹിതം ചിബുകം കഥങ്കാരം ബ്രൂമഃ ഏടോ ഗിരിസുതേ നിന്റെ ഔപമ്യരഹിതമായിരിക്കുന്ന ഉപമയോട്ടു കൂടാതെയിരിക്കുന്ന ചിബുകത്തെ താടിയെ ഏങ്ങനെ വചിപ്പോർ. ഗിരിശേന അധരപാനാകുലതയാ മുഹുഃ ഉദസ്തം ഗിരിശനാൽ അധരപാനാകുലം ഹേതുവായിട്ടു് പിന്നെയും പിന്നെയും ഉദസ്തമായിരിപ്പോന്നു് പൊക്കിപ്പൊക്കി ഇരിപ്പൊന്നെന്നു് പൊരുൾ. ശംഭോഃ കരഗ്രാഹ്യം മുഖമുകുരവൃന്ദം മുഖമാകുന്ന കണ്ണാടിയുടെ വൃന്ദമായിരിപ്പൊന്നതൊട്ടായിരിപ്പോന്ന-

Colophon :

Author :

Remarks—Durgāpañcaka brings this work to its close.

॥ सौन्दर्यलहरी (भाषाव्याख्यायुता) ॥

No. 1136. SAUNDARYALAHARĪ
with a commentary in Malayāḷam.

C. O. L. No. 790.

Substance—Paper. Size—11″ × 9″. Pages — 60. 20 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—900.

Owner—C. O.

Subject—A panegyric of Devī.

Beginning etc.—Same as No. 1135.

Colophon :

Author :

Remarks—This has been transcribed from a manuscript obtained from Rāman Rāman Nampūdiri

of Kāladi. The commentary in Malayāḷam is very elaborate. It extends to the 67th verse. The name of the commentator is quite unknown.

---

## ॥ सौन्दर्यलहरी (सव्याख्या) ॥

### No. 1137. SAUNDARYALAHARĪ
with commentary.

C. O. L. No. 2505.

Substance—Palm leaf. Size—16″ × 1½″. Leaves—79. 8 lines per page and 60 letters per line. Script—Dravida. No. of Granthas—2375.

Owner—Sthāṇu Subramoṇia Śāstrigal, Kannyākumārī.

Subject—Same as No. 1136.

Beginning:

श्रीमहागणपतये नमः ।

श्रीगुरुभ्यो नमः ।

वन्देमहि महीयांसमंसालम्बिजटाधरम् ।
यत्कङ्कणझण.... .... .... ....मनः ॥

शेषाशेषोक्तिभूपाक्षरचरण.....ग्रन्थसौगन्ध्यजिघ्रा
भ.... .... ....गुम्भगुम्भ.... .... ..क्तौ ।
.... .... .... पशुपतिमतनिर्वाहकास्साङ्ख्यसङ्ख्या
यस्य श्रीलोल्लक्ष्मीधरविबुधमणेर्भान्ति वाचां नि(गुम्फाः)॥

.... .... .... ....रः प्राह ॥

+ + समाहितस्वान्ताः सेवन्तां सन्ततं बुधाः ।
स्यादेवमल.... .... .... .... ....
.... .... ... .... .... .... ....
.... क्वचित् क्वचिदथापि न कापि शङ्का ॥

नैसर्गिकी खलु गुणीकरणप्रवीणा
शक्तिः दाह.... .... .... ....

इह खलु शङ्करभगवत्पूज्यपादास्समयतत्त्ववेदिनः समयाख्यां चन्द्रकलां श्लोकेन प्रस्तु...ये नमः ।

शिवश्शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
नचेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।

अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥

End :

"ब्रह्मणः पञ्चमशिरो नखाग्रेणाच्छिनद्धरः ।"

इति पुराणवचनम् । तस्मात् प्रथममथनादन्तकरिपोः सदाशिवस्य चतुर्णां शीर्षाणां शिरसां समं सकृदेवाभयहस्तार्पणधिया अभयहस्तान् ग्रहीतुकाम इत्यर्थः ।

Colophon :

Author—Com: Lakṣmīdhara.

Remarks—The Ms. contains the commentary up to the 69th verse. It is available in print.

---

## ॥ सौन्दर्यलहरीव्याख्या (सौभाग्यवर्धनी) ॥

No. 1138. SAUNDARYALAHARĪVYĀKHYĀ.
(Saubhāgyavardhanī).

C. O. L. No. 726.

Substance—Paper. Size—11½″ × 9″. Pages—117. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1450.

Owner—C. O.

Subject—Same as No. 1136.

Beginning:

शब्दायमानतिमिरावलिसेव्यमान-
निष्पन्दमानतिमिरोर्ध्वगसान्ध्य.... ।
विघ्नान्धकारतरणिं तरुणार्कशोणं
वन्देऽर्धनागनरयोरवियोगयोगम् ॥

....लितकुन्तलालीकर्तरिकाकृत्यमाननं (च?) भानोः ।
शकलमिव शोभमानं वन्दे सीमन्तरागमम्बायाः ॥

रमणीवामदेहाय रजताचलवासिने ।
रसाधरेन्द्रचापाय (रमा?गौरी)कान्ताय ते नमः ॥

वृश्चते दुश्चरित्राणां वृद्धिं भास्करीं भुवः ।
वृन्दावनविहाराय वृष्णीनां पतये नमः ॥

श्रीशङ्कराचार्यकृते स्तवेऽस्मिन्
टीकां चिकीर्षोर्मम मन्दबुद्धेः ।
विदूषकस्येव वचोऽस्तु युष्म-
द्धासाय सन्नोऽस्मि तथापि धन्यः ॥

भगवान् परमकारुणिकः शङ्करावतारः शङ्कराचार्यैः शिवशक्त्यो-रभेदं ज्ञापयितुं सकलप्रपञ्चसाक्षिण्या ब्रह्म .... ........त-च्चिच्छक्तेः स्तुतिद्वारा मातृकादिमन्त्रानुद्धरति—शिवः शक्त्येति ।

End :

.... ... तत्रैव मातृकाक्षरैः तत्रैव इयं स्तुतिः परा पश्यन्ती मध्यमा .... .... .... .... त्वयैवोल्लासिता वैखरीसमुज्जृम्भितत्वन्मयमातृकाक्षरैस्तवैव स्तुतिवि.... .... ... .... स्तुतौ कर्तृत्वैव? नास्ति । सामर्थ्यं नास्ति । त्वमेव सर्वत्रानुस्यूता चेतनारूपा प्रतिभासत इति भावः ।

एषा सौन्दर्यलहर्याष्टीका सौभाग्यवर्धनी नाम्ना ।
कैवल्याश्रमविरचिता विलसतु परदेवताप्रमोदकरी ॥

अत्रावद्यं कृतधियः सम्यगालोच्य तत्त्वतः ।
शोधयन्तु विशेषेण बद्धः सन्तोऽयमञ्जलिः ॥

किं विज्ञापनयानया यदि भवेदस्मत्कृतेऽनक्षरं
ग्रन्थे....स्वयमेव साधुपुरुषा...वकरिष्यन्ति तत् ।
सन्मार्गे पतितानि तानि कटकान्यालोक्य ....
.... कृत्य न यान्ति तानि पथिकाः कर्तुं परेषां त्विति ॥

Colophon :

इति श्रीगोविन्द.... .... ...ल्याश्रमविरचिता सौन्दर्यलहरीटीका सौभाग्यवर्धनी .... .... .... ....भवतु मङ्गलं भवतु ॥

Author—Kavalyāśrama.

Remarks—This commentary is written in lucid style.

## ॥ सौन्दर्यलहरीव्याख्या (सुधाविद्योतिनी) ॥

## No. 1139. SAUNDARYALAHARĪVYĀKHYĀ.

(Sudhāvidyotinī).

C. O. L. No. 735.

Substance—Paper. Size—11″ × 9″. Pages—239. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3000. Incomplete.

Owner—C. O.

Subject—Beginning—Same as No. 1138.

End :

अपिशब्दात् शिववर्ममन्त्रः । मानसी हि त्रिखण्डा प्रणामश्च मानसः। परमाशिवः परमात्मा । आनन्दनाथो गुरुः। आनन्दस्य मोक्षस्य सुखस्य वा ज्ञानस्य वा नाथ आनन्दनाथः। पादशब्दवाची पादुकेति विद्विविधौ देहः(?)... .... ... .... ... ... ... पादुकाप्रपापणसाधनं(?) श्रीपादुकापूजाप्राप्तिः श(क्त्य?क्तिर)म्बेति क्वचित् पठान्ति । शक्तिर्वेति योगिनीनां चतुष्षष्टेः पुरातनी काचियोगिनी परमगुरुर्गुरुरात्मगुरुश्च.... .... .... .... ।

Colophon :

अत्र शिवः शक्येत्यादितटिल्लेखेत्यन्तानां
पद्यानामेकविंशत्या व्याख्या विरचिता मया ।
अगाधस्यास्य नृपतेर्गिरां हि कुटिला गतिः ॥

अभिप्रायो नाभिगम्यो ब्रह्मादिभिरपि ध्रुवम् ।
तस्य प्रवरसेनस्य शासनामात्रतत्परः ॥

अभवं क्षन्तुमर्हन्ति सन्तोऽसन्तोऽपि मध्यमाः ।
विद्यासागरसारस्य मन्दरो मन्थरद्युतिः ॥

कीर्तिमात्रतनुर्भूतो जयत्याचन्द्रतारकम् ।
इति प्रवरसुतेनारिजिता विरचितायां सुधाविद्योतिन्यां तात्पर्यव्याख्यायां प्रथमः पादः ।

Author—Text: Pravarasena.
Com: Arijit.

Remarks—This Ms. elucidates the import of the verses of Saundaryalaharī. The commentator Arijit clearly states in the introductory portion that Pravarasena a Dravidian King was responsible for the original text. A short anecdote about the author is also furnished.

---

## ॥ हरिस्तुतिव्याख्या ॥

## No. 1140 A. HARISTUTIVYĀKHYĀ.

C. O. L. No. 1970 A.

Substance—Palm leaf. Size—14″ x 2″. Leaves—43. 12 lines per page and 52—60 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Owner—Parameśvaran Potti, Harippād.

Subject—A panegyric of Hari.

Beginning:

गणपतये नमः । अविघ्नमस्तु ।

शङ्करं शङ्कराचार्यं
केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे
भगवन्तौ पुनः पुनः ॥

सत्यज्ञानानन्तात्मकमद्वितीयं ब्रह्मैव शुद्धसत्त्वप्रधानमायोपाधिकं सदीश्वरभावं, मलिनसत्त्वप्रधानाविद्योपाधिकं सज्जीवभावञ्च जगाम । 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती'ति श्रुतेः । तत्र च मायाप्रतिबिम्ब ईश्वरस्तां मायां वशीकृत्य सर्वज्ञस्सर्वशक्तिश्च सन् जीवानामभ्युदयापवर्गार्थं सङ्कल्पमात्रेणैव लीलया जगतः सर्गस्थितिविलयानाचरति ।

End:

'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतेरिति ।

वाचा यया श्रुतिवचांसि च भेदवादि-
कौलेयकैर्मलिनितानि विशोधितानि ।
तस्यामशुद्धमिह दुर्वचनं मदीयं
सम्मिश्रशङ्करगुरोर्विबुधाः क्षमन्ताम् ॥

यस्याक्षिपातपदवीं सकृदप्यवाप्य
भूयो न संसृतिकुमार्गमवाप्नुवन्ति ।
लोकास्तमात्मसुखमग्नमनःप्रचारं
कैवल्ययोगिगुरुमाभजतां मनो मे ॥

इन्दीवरेन्द्रमणिसुन्दरमिन्दिरेशं
बन्दीकृतेन्द्ररिपुबृन्दममन्दवीर्यम् ।
मन्दस्मितप्रसरनन्दितलोकबृन्दं
वन्दे दिनेन्द्रकुलसम्भवरामचन्द्रम् ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीकैवल्ययोगीन्द्रपादकमल-भृङ्गायमाणस्वयम्प्रकाशाख्ययतिविरचिता श्रीशङ्करभगवत्पाद-हरिस्तुतिव्याख्या हरितत्त्वमुक्तावलीसमाख्या समाप्ता ।

श्रीगुरुभ्यो नमः ।

Author—Svayamprakāśayati.

Remarks—The work deals with a topic on philosophy.

---

## ॥ मानसोल्लासः ॥

## No. 1140 B. MĀNASOLLĀSA.

C. O. L. No. 1970 B.

Substance—Palm leaf. Size—14″ × 2″. Leaves—13. 10—15 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—575.

Owner—Same as No. 1140 A.

Subject—Vedānta.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

भगवत्पादपादाब्ज-
द्वन्द्वं द्वन्द्वनिबर्हणम् ।
सुरेश्वरादिसद्भृङ्गै-
रवलम्बितमाभजे ॥ ओम् ।

मङ्गलं दिशतु मे विनायको
मङ्गलं दिशतु मे सरस्वती ।
मङ्गलं दिशतु मे महेश्वरो
मङ्गलं दिशतु मे महेश्वरी ॥

आत्मलाभात्परो लाभो
नास्तीति मुनयो विदुः ।
तल्लाभार्थं कविः स्तौति
स्वात्मानं परमेश्वरम् ॥

स्वेच्छया सृष्टमाविश्य
विश्वं यो मनसि स्थितः ।
स्तोत्रेण स्तूयतेऽनेन
स एव परमेश्वरः ॥

अस्ति प्रकाशत इति
व्यवहारः प्रवर्तते ।
तस्यास्तित्वं प्रकाशत्वं
कस्मिन्नर्थे प्रतिष्ठितम् ॥

किं तेषु तेषु भावेषु
    किं वा सर्वात्मनीश्वरे ।
ईश्वरत्वञ्च जीवत्वं
    सर्वात्मत्वञ्च कीदृशम् ॥

End :

स्वर्गादिराज्यं साम्राज्यं
    मनुते नहि पण्डितः ।
तदेव तस्य साम्राज्यं
    यत्तु साम्राज्यमात्मनि ॥

सर्वात्मभावनावन्तं
    सेवन्ते सर्वसिद्धयः ।
तस्मादात्मनि साम्राज्यं
    कुर्यान्नियतमानसः ॥

यस्य देवे परा भक्ति-
    र्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः
    प्रकाशन्ते महात्मनः ॥

प्रकाशात्मिकया शक्त्या
    प्रकाशप्रभवाकरः ।
प्रकाशयति यो विश्वं
    प्रकाशोऽयं प्रकाश्यताम् ॥

Colophon :

इति दक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ।
प्रबन्धे मानसोल्लासे दशमोल्लाससंग्रहः॥ इति सुरेश्वराचार्य-
कृतौ मानसोल्लासः समाप्तः ।

Author :

Remarks :

---

॥ मानसोल्लासवृत्तान्तविलासः ॥

No. 1140 C. MĀNASOLLĀSAVṚTTĀNTA-VILĀSA.

C. O. L. No. 1970 C.

Substance—Palm leaf. Size—14″ × 2″. Leaves—51. 11—13 lines per page and 40—48 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Owner—Same as No. 1140 A.

Subject—Vedānta.

Beginning :

हरिः ।

प्रोद्यच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं
प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननम् ।
मुद्रां तर्कमयीं दधानमचलं कर्पूरगौरं शिवं
हृद्यन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्तिकम् ॥

नत्वाथ शङ्कराचार्यमुख्यान् सर्वान् गरीयसः ।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥

इह खलु भगवान् भाष्यकारः श्रीमच्छङ्कराचार्यनामा मन्दमतीन् तत्त्वजिज्ञासून् अनुग्रहीतुं दक्षिणामूर्त्तिस्तोत्रव्याजेन समस्तवेदार्थरहस्यमाविश्चकार दशभिः पद्यबन्धैः । तच्छिष्येण विश्वरूपाचार्येण सुरेश्वरापरनाम्ना तत्पद्यबन्धार्थतत्त्वं तात्पर्यतो मानसोल्लासनाम्ना वार्त्तिकात्मना ग्रन्थसन्दर्भेणाविष्कृतम् । तमिमं ग्रन्थं यथाशक्ति विवृणोमि ।

End :

'यस्य देव' इति श्रुतिरेवैषा । इदानीमशेषं स्तोत्रं तात्पर्यतो व्याख्याय ग्रन्थप्रचयाय विघ्नोपशान्तये शिष्टाचारसंरक्षणाय च मङ्गलं स्वेष्टदेवताप्रार्थनारूपमाचरति—प्रकाशात्मिकयेति । आदित्यादिप्रकाशानामपि प्रभाकर इत्यर्थः । स्वयमेव प्रकाश्यतामित्यर्थः। दशमश्लोकव्याख्योपसंहारश्लोकः—इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादक इति ।

इति श्रीमानसोल्लासप्रबन्धोऽयं यथामति ।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥

अनेन भगवान् श्रीमद्दक्षिणामूर्तिरीश्वरः ।
गुर्वात्मा प्रीयतान्नित्यं तत्त्वज्ञानप्रदः सताम् ॥

Colophon :

इति श्रीदक्षिणामूर्त्तिस्तोत्रार्थव्याख्याप्रबन्धो मानसोल्लासवृत्तान्तविलासः सम्पूर्णः ।

समासश्चायम् ।

श्रीवासुदेवमरविन्ददलायताक्षं
श्रीनारदादिमुनिसेवितमप्रमेयम् ।
श्रीशार्ङ्गिणं सकललोकनिवासपात्रं
श्रीकृष्णमच्युतमहं प्रणतोऽस्मि नित्यम् ॥

Author—Rāmatīrtha.

Remarks—The Ms. elucidates the panegyric of Dakṣiṇāmūrti.

---

॥ महावाक्यव्याख्या ॥

No. 1140 D. MAHĀVĀKYAVYĀKHYĀ.

C. O. L. No. 1970 D.

Substance—Palm leaf. Size—14″ × 2″. Leaves—2½. 11 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—100.

Owner—Same as No. 1140 A.

Subject—Vedānta.

Beginning :

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः ॥

मुमुक्षोर्मोक्षसाधनब्रह्मात्मैकत्वावगतिसिद्ध्ये प्रसिद्धानां चतुर्णां महावाक्यानामर्थं क्रमेण निरूपयन् परमकृपालुराचार्यः आदौ तावद् ऐतरेयारण्यगते 'प्रज्ञानं ब्रह्मे'ति महावाक्ये प्रज्ञानशब्दार्थमाह।

End :

वाक्यार्थमाह—तद् ब्रह्म स्वप्रकाशात्मरूपकमिति । उक्तलक्षणं ब्रह्म स्वप्रकाशात्मरूपकं स्वरूपं यस्य तत् स्वप्रकाशात्मरूपकं तदेवेत्यर्थः ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिङ्करेण श्रीकृष्णारण्यविदुषा विरचिता महावाक्यव्याख्या समाप्ता ।

Author—Śrīkṛṣṇāraṇya.

Remarks :

---

## ॥ हस्तामलकस्तोत्रम् ॥

## No. 1140 E. HASTĀMALAKASTOTRAM.

C. O. L. No. 1970 E.

Substance—Palm leaf. Size—14″ × 2″. Leaf—1. 7 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—25.

Owner—Same as No. 1140 A.

Subject—Vedānta.

Beginning:

निमित्तं मनश्चक्षुरादिप्रवृत्तौ
निरस्ताखिलोपाधिरानन्दकल्पः ।
रविर्लोकचेष्टानिमित्तं यथैकः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

End:

यथा वेददृष्ट्यैव ते सूतकादौ
यथा बुद्धिरुत्पद्यते सूतकीति ।
तथा वेदवेद्यं विशुद्धात्मतत्त्वं
स्वकीयं ग्रहीतुं विवादः कथं ते ॥

Colophon:

इति हस्तामलकस्तोत्रं समाप्तम् । शुभमस्तु ।

आत्मा कर्तृस्वरूपश्चेन्मा काङ्क्षीस्तर्हि मुक्तताम् ।
नहि स्वभावो भावानां व्यावर्त्येतौष्णवद्रवेः ॥

नारायणं पद्मभवं वसिष्ठं शक्तिञ्च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥

श्रीशङ्कराचार्यमथास्य पद्मपादञ्च हस्तामलकस्य शिष्यम् ।
तं तोटकं वार्त्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥

Author—Hastāmalakācarya.

Remarks—The Sādhanapañcaratna of Śaṅkarācarya and Viṣṇusthava occur at the close of the Ms.

## ॥ न्यासदीपिका ॥

## No. 1140 F. NYĀSADĪPIKĀ.

C. O. L. No. 1970 F.

Substance—Palm leaf. Size—14″ × 2″. Leaves—10. 9 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—150.

Owner—Same as No. 1140 A.

Subject—Vedānta.

Beginning :

हरिः । श्रीगणपतये नमः । ओम् ।

नत्वा नारायणं देवं
गुरूनपि गरीयसः ।
तत्समादिष्टरीत्याहं
तनोमि न्यासदीपिकाम् ॥

श्रुतिस्मृतिपुराणार्थ-
सदाचारार्थवित्तमः ।
गुरुराह यमाचारं
सोऽनया व्याज्यते स्फुटम् ॥

इह खलु मानुषो वर्णी ब्राह्मणः शुचिरुपनीतोऽधीतस्वाध्यायोऽस्मिन् जन्मनि जन्मान्तरे वानु... ... ...तैर्धर्मैर्विशुद्धचेता वान्तान्न इवास्तम्बब्रह्मान्तभोगेषु द्वि... ... ...मीक्षमाणस्तुरीयं पारमहंस्यमाश्रमं प्रतिपित्समानः स्वजनैरनुज्ञातो ब्रह्मविदं सदा-

चारपरमहंसपरिव्राजकं महनीयगुणं परं कृपालुं गुरुवरं प्रदीप्तशिरा इव शिशिरहृदयमुपगम्य सौशील्यपरिचर्यादिना प्रसाद्य तेन पृष्टः स्वमनोरथमभ्यर्थ्यानुज्ञातस्तदुपकरणानि... ... ....

... ... ... ... ... ... ...

... ... ... ... ... ... ...

यावच्छक्ति वा दत्त्वा प्राप्तयोग्यस्त्वासौ भवति ।

End :

तस्मै षट्प्रणामं कृत्वा प्रतिसन्ध्यं यथादिष्टमर्थमनुध्यायन् अस्मिन्नपरोक्षेऽप्यसम्भावनाविपरीतादिभावनादिव्युदासायाचार्योद्दिदान्तश्रवणमननं कुर्वाणः दीर्घकालनैरन्तर्येणादरोपेते यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिलक्षणाष्टाङ्गयोगे योगसहितो भवति । वासुदेवे गुरुपादपद्मयोश्च परां भक्तिमुद्वहन् वाक्यादेवाविर्भूतसाक्षात्कारो निवृत्ताविद्यातत्कार्योऽद्वयमाचित्प्रत्यगानन्दं ब्रह्म भवति । कृतकृत्यो भवति ।

श्रीमद्गुरुभ्यो नमः ।

Colophon :

Author :

Remarks—Certain mantras occur at the end.

---

## ॥ हरिस्तुतिव्याख्या ॥

### No. 1141. HARISTUTIVYĀKHYĀ.

C. O. L. No. 2245.

Substance—Palm leaf. Size—7⅛" × 13". Leaves—76.

9—11 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Owner — Maṇiyār Kṛṣṇan Bhaṭṭatiri, Budhannūr, Ceṅgannūr.

Subject—Elucidation of a panegyric of Viṣṇu.

Beginning etc.—Same as No. 1140 A.

Author—Svayamprakāśayati.

Remarks—A few sentences of a didactic nature occur in the course of the work. 33 verses praising Hari bring the work to its close.

---

## ॥ हस्तामलकस्तोत्रम् ॥

## No. 1142 A. HASTĀMALAKASTOTRAM.

C. O. L. No. 1707 A.

Substance—Palm leaf. Size—6″ × 2″. Leaves—2. 13 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 20.

Owner—Keśava Piṣāroḍi, Kailāsapuram, Vaikom.

Subject—Vedāntic maxims.

Beginning :

निमित्तं मनश्चक्षुरादिप्रवृत्तौ
निरस्ताखिलोपाधिराकाशकल्पः ।

रविर्लोकचेष्टानिमित्तं य(थैक):
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

यमग्न्युष्णवन्नित्यबोधस्वरूपं
मनश्चक्षुरादीत्यबोधात्मकानि ।
प्रवर्तन्त आश्रित्य त्रिष्णुं... ....कं
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

End :

यथा वेदद.... ....ते सूतकादौ
दृढा बुद्धिरुत्पद्यते सूतकीति ।
अथो वेदवेद्यं विशुद्धात्मतत्त्वं
स्वकीयं ग्रहीतुं विवादः कथा ते ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य-श्रीशङ्करभगवतः चरणसरोजसेविसद्भृङ्गप्रवरहस्तामलकाचार्य-कृतौ हस्तामलकं सम्पूर्णम् ।

Author—Hastāmalakācārya.

Remarks—After the close of this work occur a few verses in propitiation of Ācāryas.

## ॥ सनत्सुजातीयभाष्यम् ॥

No. 1142 B. SANATSUJĀTĪYABHĀṢYAM.

C. O. L. No. 1707 B.

Substance—Palm leaf. Size—6″ × 2″. Leaves—69.
9—12 lines per page and 18—24 letters per line.
Script—Malayāḷam. No. of Granthas—850.

Owner—Same as No. 1142 A.

Subject—Vedānta.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

अथेदानीं द्वितीयाध्याय आरभ्यते । अयं मानस्येत्यादिना मौनस्य माहात्म्यं प्रदर्शितम् ।

धृतराष्ट्रः—

कस्यैष मौनः कतरन्नु मौनं प्रब्रूहि विद्वन्निह मौनभावम् ।
मौनेन विद्वानुपयाति मौनं कथं मुने मौनमिहाचरन्ति ॥

कस्य कीदृशस्य पूर्वोक्तवागाद्युपरमलक्षणो मौनो भवति । कतरन्नु एतयोरसम्भाषणात्मस्वरूपावस्थानयोः मौनं ब्रूहि विद्वन्निह मौनभावं मौनस्वभावम् ।

End:

नित्यशुद्धबुद्धमुक्तबोधरूपमात्मना भावयन् षडिन्द्रियाणि सन्नियम्य निश्चलः अस्ति वस्तु चिद्घनं जगत्प्रसूतिकारणं

सनश्वरश्च तत्सदा जगत्तमोनुदश्चयत् तत्पदैकवाचकं सदामृतं निरञ्जनं वृत्तिदृग्यु(?)रवन्तदस्म्यहम् ।

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यशङ्करभगवत्पादकृतौ श्रीसत्सनत्सुजातीयभाष्ये चतुर्थोऽध्यायः ।

Author—Śrīmat Śaṅkara Bhagavatpāda.

Remarks :

---

## ॥ संसारतरणिः ॥

No. 1142 C. SAMSĀRATARAṆI.

C. O. L. No. 1707 C.

Substance—Palm leaf. Size—6″ x 2″. Leaves—18. 11 lines per page and 20 letters per line. Script—Malayālam. No. of Granthas—622.

Owner—Same as No. 1142 A.

Subject—Vedāntic maxims.

Beginning :

हरिः । ओम् । श्रीवसिष्ठः ।

तस्य दृश्यात्मतत्त्वस्य विस्मृत्यैवं स्थितिं गतम् ।
नान्यस्मादागतं राम जगद्रज्जुभुजङ्गवत् ॥

आदित्यव्यतिरेकेण यो भावयति राघव ।
रश्मिजालमिदं ह्येतत्तस्यान्यादिव भास्वतः ॥

कनकव्यतिरेकेण केयूरं येन भावितम् ।
केयूरमेव तत्तस्य न तस्य कनकं हि तत् ॥

End :

यद्युपादेयवाक्यो हि राजपेट्टिफलश्रमः ।
अनुपादेयवाक्यस्य वक्तुं पृष्टस्य लीलया ।
व्रजन्त्यफलतां वाचस्तमसीवाक्षसंविदः ॥

यथा बालः पितुर्वाक्यं मुक्तहेतूपपादकम् ।
आदत्ते हि तथैव त्वं गृहाणेदं वचो मम ॥

तं पाणिना पेषं(?) बोधयाञ्चकार सहोत्थस्थौ... ... ....

Colophon :

इति संसारतरणिनाम्निवासिष्ठविवरणे कचोपाख्यानन्नामाष्टात्रिंशः सर्गः ।

Author:

Remarks—The last few leaves contain the 3rd chapter in the 8th skandha of the Bhāgavata. Thence certain hymns are noted.

॥ तैत्तिरीयभाष्यम् ॥

No. 1142 D. TAITTIRIYABHĀṢYAM.

C. O. L. No. 1707 D.

Substance—Palm leaf. Size—6″ × 2″. Leaves—86. 10 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—860.

Owner—Same as No. 1142 A.

Subject—Vedānta.

Beginning :

हरिः ओं। संहितादिविषयाणि कर्मभिरविरुद्धान्युपासनान्युक्तानि। अनन्तरमन्तस्सोपाधिकात्मदर्शनमुक्तं व्याहृतिद्वारेण स्वाराज्यफलम्। नचैतावता अशेषतः संसारबीजस्योपमर्दनमस्तीत्यतोऽशेषोपद्रवबीजस्याज्ञानस्य निवृत्त्यर्थं विधूतसर्वोपाधिविशेषात्मदर्शनार्थमिदमारभ्यते—ब्रह्मविदाप्नोति परमित्यादि।

End :

इतीयं वल्लीद्वयाभिहितोपनिषत्परमात्मज्ञानं तामेतां उपनिषदं शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वा महदाश्याय य एवं वेद तस्येदं फलं यथोक्तं मोक्षमिति।

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य श्रीशङ्करभगवतः कृतौ तैत्तिरीयभाष्यं समाप्तम्।

Author—Śaṅkarācārya.

Remarks—The Ms. covers only the 2nd *praśna.*

# ॥ नीतयः छन्दांसि च ॥

## ॥ कामन्दकीयम् ॥

## No. 1143 A. KĀMANDAKĪYAM.

C. O. L. No. 2041 A.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—35. 11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—1350. Complete.

Owner—K. S. Venkiṭeśvara Iyer, Kariyamāṇikkapuram, Eḍalākkuḍi.

Subject—Politics.

Author—Kāmandaka.

Remarks—The Ms. embodies 21 Sargas. It has been publishes in TSS. as No. 14.

---

## ॥ जयमङ्गला ( कामन्दकीयव्याख्या ) ॥

## No. 1143 B. JAYAMAṄGALĀ.

Commentary on Kāmandakīya.

C. O. L. No. 2041 B.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—67.

11 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—2600. Complete.

Owner—Same as No. 1143 A.

Subject—Politics.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नमः शास्त्राय महते त्रिवर्गस्यैकयोनये ।
नमस्तस्य प्रणेत्रे च कौटल्याय महर्षये ॥

कामन्दकीये किल नीतिसारे
प्रायेण नास्मिन् सुगमाः पदार्थाः ।
तस्माद्विधास्ये जयमङ्गलाख्यां
तत्पञ्जिकां सर्वविदं प्रणम्य ॥

यस्य प्रभावादित्यादि । अस्य श्लोकस्यादावुपन्यासो विघ्नोपशमनार्थः, शास्त्रमारभ्यमाणं पूज्यपूजनपूर्वकमविघ्नितप्रसरं भवतीति। तत्र प्रजापालनार्थमिदं शास्त्रम्। तत्पालने च साक्षादधिकृतः स्थितिकर्ता जगतो विष्णुः। पालनशक्तिश्च तस्यैव। यथाहुः पौराणिकाः—

"स्थितिकर्तास्य जगतो विष्णुरेव जनार्दनः ।

इति ।

End :

युद्धकाल इत्युक्तम् । तदिदानीं प्रकाशयुद्धं सप्तभिः श्लोकैर्दर्शयति-पक्षादीनामित्यादि । अथैत्यनीक प्रकारणमस्तावार्थम् । एकानीकेन परं व्यूहं हत्वा शेषैरनीकैः प्रक्षिपेत् । उरसा च उरसे न कोटिभ्यां प्रपक्षकाभ्यां शरकोटिपरव्यूहस्य पक्षौ पक्षाभ्यामाक्रम्य जघनं ग्रोरस्यं परिग्रहं कोटिभ्यां भिन्द्यात् । परघातप्रतिषेधार्थं फल्गुबलं सारेण पीडयेदिति सम्बन्धः । महतदुर्भेद्यर्मिहवसामिक्तैः क्षान्तिपूर्वकं क्षासाधु(?) साध्वाधिष्ठितैः सलोहजालैरारणैर्लाहिस्थगितैः शस्त्रिभिर्वा सपादरक्षाः पादगोपाः प्रतियोद्धारः एकोऽपि कं पुनर्बहवः(?) गुणो विनयाधानो शेषाभिर्विजयो निबन्ध इति सेनाया हस्तिनः प्रधानमङ्गादीनि ॥

Colophon :

प्रकाशयुद्धं षट्त्रिंशप्रकरणम् । विंशतिः सर्गः । जयमङ्गला समाप्ता । श्रीरामाय नमः ।

श्रीकृष्णगुरुपादाब्जरेण्वलंकृतमस्तकः ।
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
मनसा चिन्तितं यन्मे वाचा यद् भाषितं पुनः ।
कायेन यत् कृतं कर्म तत्तद् ब्रह्मार्पणं भवेत् ॥

Author :

Remarks—The Ms. seems to have been entitled after the author.

---

## ॥ कौटलीयम् अर्थशास्त्रम् ॥

### 1144 A. KAUṬALĪYAM (Arthaśāstram).

C. O. L. No. 2537 A.

Substance—Palm leaf. Size—14″ × 2″. Leaves—138. 10 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—5500.

Owner—Kṛṣṇa Rāja Valia Rāja, Eḍappaḷḷy.

Subject—Politics.

Author—Kauṭalya.

Remarks—The Ms. is printed as Nos. 79, 80 and 82 in TSS. Only the text is embodied herein.

---

## ॥ चाणक्यसूत्रम् ॥

## No. 1144 B. CĀṆAKYASŪTRAM.

C. O. L. No. 2537 B.

Substance—Palm leaf. Size—14″ × 2″. Leaves—9. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—250.

Owner—Same as No. 1144 A.

Subject—Politics.

Beginning—Same as No. 1305, DCSMMPL.

End :

स्वशरीरं परकीयं मन्यते साधुः । सर्वत्र मान्यं भ्रंशयत्यसाधुः ।

मांसभक्षणमयुक्तं सर्वेषाम् । न संसारभयं ज्ञानवताम् । ज्ञानदीपेन संसारतिमिरं निवर्तयेत् । कर्मणामारम्भोपायः पुरुषद्रव्यसम्पत् । देशकालविभागज्ञानं विनिपातप्रतिघातज्ञानं कार्यसिद्धिश्च । सर्वमनित्यमध्रुवं च । देहिनां मतिर्विहनी । कृमिशकृन्मूत्रभाजनमेव शरीरम् । पुण्यपापमेव जन्महेतुः । जन्ममरणं दुःखम् । तपसा स्वर्गमवाप्यते । क्षमायुक्तस्य तपो वर्धते ।

Colophon :

चाणक्यसूत्रं समाप्तम् ।
श्रीगुरुभ्यो नमः ।

Author—Cāṇakya.

Remarks—The last two leaves contain an index to the contents of the Arthaśāstra.

## ॥ कौटलीयार्थशास्त्रव्याख्या (जयमङ्गला) ॥

## No. 1145. KAUṬALĪYĀRTHAŚĀSTRAVYĀKHYĀ (Jayamaṅgalā).

C. O. L. No. 702.

Substance—Paper. Size—13″ × 8½″. Pages—258.

24 lines per page and 24 letters per line. Script—Devanagari. No. of Granthas—4650. Incomplete.

Owner—C. O.

Subject — A commentary on the Arthaśāstra of Kauṭalya.

Beginning :

पूर्वमतानि यथेदं संगृह्यैकं चकार कौटल्यः ।
टीकान्तराणि दृष्ट्वा सद्व्याख्यानं समुद्धृत्य ॥

क्रियते तथा मयापि त्यक्त्वा च ग्रन्थविस्तरं पूर्णा ।
बालहिता टीकेयं दुर्ज्ञेयं यद्वितत्य सर्वमिदम् ॥

प्रेक्षावतां पूज्यपूजनात् सर्वारम्भा अविघ्नितप्रसरा भवन्तीति मन्यमान आह—नमः शुक्राबृहस्पतिभ्यामिति । पूज्याश्च वक्तृप्रयोक्तृत्वैश्वर्ययोगात् त्रिविधाः । तत्र ये शास्त्राणां वक्तारः ते तच्छास्त्रव्यवहारिभिः पूज्यन्ते । ये शास्त्रार्थानां प्रयोक्तारस्ते तन्त्रानुवर्तिभिः पूज्यन्ते ।

End :

उक्तोपकारमाह—दृष्टदोष इति । प्रागप्यर्यं कलहकारस्तस्माद्-

नेनैवायं कलहः कुत इति दृष्टदोपः । स्वयं यदास्य प्रतिपात्तिः पक्षपरपक्षयोः, वादिप्रतिवादिनोः, पक्षयोरनुपूर्वकः प्रश्नः आर्जवं वा यस्य सम्भावितं हेतुः पूर्वानुशये तस्मादनेनैवाह । सर्वाभावे शपथस्यार्थस्य मधोनिर्णयस्य निपूर्वं निबद्धस्योत्तरेण वचनेन व्याघाते साक्षिवक्तव्यस्यालादीयामुद्देशे चारहस्ताच्च निष्पाते आरक्षिभ्योपक्रमणे देहव्यः(?)पराजयः परिच्छेत्तव्यः एवं कारिणोऽङ्ग इति ।

Colophon :

इति प्रथमं प्रकरणं प्रथमश्चाध्यायः ।

समाप्तं च कौटिलीयार्थशास्त्रे सद्व्याख्यानटीकायां जयमङ्गलायां विनयाधिकारिकं प्रथममधिकरणम् ।

इति भिक्षुप्रभमतिकृतायां चाणक्यटीकायां चाध्यक्ष्ये दुर्गविधानं द्वितियं प्रकरणम् ।

तृतीयश्चाध्यायः ।

Author—Bhikṣuprabhamati.

Remarks—The work extends up to the first chapter in the third *prakaraṇa*. The colophon evincing the name of the author occurs only in one *prakaraṇa*.

## ॥ कौटलीयार्थशास्त्रव्याख्या (नयचन्द्रिका) ॥

## No. 1146. KAUṬALĪYĀRTHAŚĀSTRA-VYĀKHYĀ (Nayacandrikā).

C. O. L. No. 683.

Substance—Paper. Size—13″ × 8½″. Pages — 231. 24 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—4250.

Owner—C. O.

Subject—A commentary on Kauṭalya's Artha-śāstra.

Beginning:

अथ षाड्गुण्ये सप्तमोऽध्यायः ।

सूत्रम् । द्वैधीभाविकाः सन्धिविक्रमाः ।

तदेवं परिपणितादिभेदसन्धिमुक्त्वा सम्प्रति तेषामेव द्वैधीभाविताना समहीनांशलाभदैरपेक्षाभ्युपगमादिकारणप्रदर्शनार्थं सूत्रं—द्वैधीभाविकाः सन्धिविक्रमा इति। सन्धिविग्रहोपादानं हि द्वैधीभावः। तन्निविष्टाः सन्धिविग्रहभेदाः कारणादिभेदा उच्यन्त इत्यर्थः ।

End:

अनेनेति । पूर्ववदियता मूल्येन वा पूर्वतो गुणविशिष्टं वा भूयो देयमिति वदन्तः अमित्रक्रेतॄणां क्रीत्वादिवचनं स्वभाजन-

गृहीतप्रत्यर्पणेऽप्यनपराधार्थं मोढ्यव्यपदेशभंभवादिति। पक्षान्तरमाह एतान्येवेति । सुराक्षीरादीन्येव पण्यतया विक्रयं व्यवहरन्तो वैदेहकव्यञ्जना रसेनापचरेयुरित्यर्थः । विशुद्धस्थापना च बलस्येति प्रतिबलावकाशकान् दूष्यबलमन्तस्सञ्छाद्य आपत्त... ...

Colophon :

इति वादिकविचूडामणिमहोपाध्यायश्रीमन्माधवयज्वमिश्रविरचितायां कौटलीयटीकायां नयचन्द्रिकायाम् आबलीयसे द्वादशेऽधिकरणे तृतीयोऽध्यायः समाप्तः ।

Author—Mādhavayajvamiśra.

Remarks—It begins with the 7th chapter in the 7th prakaraṇa and extends to a portion of the 4th chapter in the 12th prakaraṇa. The work has been published.

---

## ॥ कौटलीयार्थशास्त्रव्याख्या (प्रतिपदपञ्चिका) ॥

## No. 1147. KAUṬALĪYĀRTHAŚĀSTRA-VYĀKHYĀ (Pratipadapañcikā.)

C. O. L. No. 682.

Substance—Paper. Size—13″ × 8½″. Pages—204. 24 lines per page and 22 letters per line.

Script--Devanāgarī. No. of Granthas—3350.
Incomplete.

Owner—C. O.

Subject—A commentary on Arthaśāstra.

Beginning :

अथाध्यक्षप्रचारे द्वितीयेऽधिकरणे अष्टमोऽध्यायः ।
सू-समुदयस्य युक्तापहृतस्य प्रत्यानयनम् ।

सिद्धानामित्यादि । सिद्धानां द्रव्याणाम् असाधनमनुत्पादनम्, उत्पन्नानां वा अनवतारणम् अनुपहस्तिकरणम् , उपहस्तिकृतानां च तेषामप्रवेशनमनुपनयनामित्ययं त्रिविधः प्रतिबन्धः । तत्रेति । प्रतिबन्धे। प्रतिबन्धद्रव्यदशबन्धो दशभागो दण्डः । प्रयोगमाह--- कोशद्रव्याणामिति ।

End :

कर्मणेति । हिरण्यदानासमर्थान् शूद्रांत... ... परिक्लेशैर्हिरण्येन हिरण्यग्रहणेनानुग्रहणे वाल्पापकारिणं प्रभूतोपकारिणमनुग्रहं कृत्वा वा एवं चतुर्विधं विशोधयेदिति । सर्वबन्धनमोक्षनिमित्तमाह-अपूर्वदेशाधिगमो विजिगीषोर्यातव्योच्छेदादिना देशान्तरप्राप्तिः । तथा युवराजाभिषेचने पुत्रस्य भ्रातुर्वा यौवराज्यप्रतिपादने। पुत्रजन्मनि वा राज्ञः पुत्रजनने। पुत्रग्रहणं पौत्रनप्त्रोरप्युपलक्षणार्थम् । वाशब्दादश्वमेधादिमहाक्रतुदीक्षासूल्कापातभूमिकम्पा-

दिमहोत्पातेषु राज्ञो जनपदस्य वा व्याधिदुर्भिक्षादिमहाभयेषु च सर्वेषामपि बन्धनागारस्थानां बन्धनस्य मोक्षोऽभिधीयते विशालाक्षप्रभृतिभिः पूर्वाचार्यैरिति । एतेषु निमित्तेषु महादोषानपि मुञ्चेदित्यर्थ इति ॥

Colophon :

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायाम् अध्यक्षप्रचारिके द्वितीयेऽधिकरणे षट्त्रिंशोऽध्यायः समाप्तः।

श्रीरस्तु ।

नागरिकप्रणिधिरादितः सप्तपञ्चाशोऽध्यायः ।

कौटल्यार्थशास्त्रस्याध्यक्षप्रचारिकं नाम द्वितीयमधिकरणं समाप्तम् ।

Author—Bhaṭṭasvāmi.

Remarks—The Ms. commences only on the 8th chapter of the 2nd Adhikaraṇa.

---

## ॥ कौटलीयार्थशास्त्रव्याख्या (भाषा) ॥

### No. 1148. KAUṬALĪYĀRTHAŚĀSTRA-VYĀKHYĀ (Bhāṣā).

C. O. L. No. 574.

Substance — Paper. Size—14″ × 9″. Pages—440. 24 lines per page and 24 letters per line.

Script—Draviḍa. No. of Granthas—8000.

Owner—C. O.

Subject—Social Service.

Beginning:

ஆசாரியன் சாணக்கியன் சொன்ன சாஸ்திரத்தின்னு என்று சம்பந்தமென்றால் தர்மார்த்தகாமங்களில் அர்த்தம் பிரதானமாயுள்ள புருஷார்த்தமாவிது. அர்க்கமில்லாக்கால் தர்மகாமங்களுமருதாகின்ற மயால் அவற்றின்னுமர்த்தமே காரணமாகின்றமையாலும் அர்த்தம் தேடுவானுள்ள உபாயமறியிப்பானுயி ஈ சாஸ்திரம் துடங்கிரது.

End:

एवमन्योन्यसञ्चारं षाड्गुण्यं योऽनुपश्यति ।
स बुद्धिनिगलैर्बद्धैरिष्टं क्रीडति पार्थिवैः ॥

இவ்வண்ணமிருந்த சாட்குண்ய பரஸ்பராரூபாமியிருன்னது யாவனொருத்தன் அறிவோன் அவன் புத்திஎன்னுநின்ற நிகலத்தில் பார்த்திவன்மாரை பந்திச்சு அவர்களோடுதான் வசிச்சவண்ணம் விளையாடும் என்றவாறு மித்ரராயும் பிருத்தியராயும் நிறுத்தும்.

Colophon:

மண்டலசரிதமககின்ற சூத்திரம் முடிஞ்சது. பதினெட்டாம் அத்தியாயமும் சாட்குண்யமதிகாரமும் முடிஞ்சது.

சுபமஸ்து

। श्री ।

Author:

Remarks — The commentary is in Tamil. The leaves are not arranged in order.

## ॥ चाक्षुषीयार्थशास्त्रम् ॥

## No. 1149. CĀKṢUṢĪYAŚĀSTRAM.

C. O. L. No. 912.

Substance — Paper. Size—12″ × 9″. Pages—16. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—200.

Owner—C. O.

Subject—A work on politics.

Beginning etc.—Same as No. 1285, DCSMMPL.

Author ;

Remarks—This consists of four paṭalas of which the last is incomplete. Some portions are left out here and there.

---

## ॥ नीतिशास्त्रव्याख्यानम् ॥

## No. 1150 A. NĪTIŚĀSTRAVYĀKHYĀNAM.

C. O. L. No. 190 A.

Substance—Paper. Size—11½″ × 9″. Pages—60,

20 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 750.

Owner—C. O.

Subject—Nītiśāstra and its commentary in Vernacular.

Beginning :

मातामहमहाशैलं महस्कृदापितामहम्(?) ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम्।

सभाकल्पतरुं वन्दे वेदशाखोपजीवितम् ।
शास्त्रपुष्पसमायुक्तं विद्वद्भ्रमरशोभितम् ॥

എൻറതു, വേദങ്ങളാകിറ കിളൈകളുള്ളതും ശാസ്ത്രങ്ങളാകിറ പുഷ്പങ്ങളോടു കൂടിനതും വിദ്വാൻകിളാകിറ വണ്ടുകളാൽ പ്രകാശം പെററതുമാന സഭൈ എങ്കിറ കല്പകവൃക്ഷത്തെ നമസ്കരിക്കിറേൻ എൻറവാറു. അതാവതു് വേദശാസ്ത്രാദിസമ്പന്നർകളാന ബ്രാഹ്മണർകളുടയ നമസ്കരിക്കിറേൻ എൻറവാറു.

प्रणम्य सर्वलोकेशं देवदेवेश्वरं हरिम् ।
नीतिशास्त्रं प्रवक्ष्यामि सर्वशास्त्रार्थसम्मतम् ॥

End :

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ॥

എൻറത്തു, കററ പെരിയോർകളുക്ക മനസ്സു നിനത്തതയേ വാക്കും ചൊല്ലികയും ചെയ്യും. ദുഷ്ടരുക്ക മനസ്സു ഒൻറൈ നിനൈത്തു വാക്കു മറെറാൻറൈ ചൊല്ലി കൈകൾ മറെറാൻറ ചെയ്യുമെൻറവാറു്.

प्राचीनग्रन्थमध्यस्थैर्वाक्यैस्तु समयोचितैः ।
नीतिशास्त्रमिदं प्रोक्तं जीयादाचन्द्रतारकम् ॥

പെരിയോർകൾ ചെയ്ത പഴമൊഴികളിൽ ഇരുന്തു് എടുത്തു ചേർത്ത ഇന്ത നീതിശാസ്ത്രമാനതു് ചന്ദ്രസൂര്യർകളുള്ളവരയിൽ സർവോത്കൃഷ്ടമാക ഇരുക്ക വേണ്ടും.

Colophon :

नीतिशास्त्रव्याख्यानं सम्पूर्णम् ।

Author :

Remarks :

---

## ॥ आशौचनिर्णयव्याख्यानम् ॥

## No. 1150 B. ĀŚAUCANIRṆAYAVYĀKHYĀNAM.

C. O. L. No. 190 B.

Substance—Paper. Size—$11\frac{1}{2}'' \times 9''$. Pages — 57.

20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—625.

Owner—C. O.

Subject—The rules of Āśauca.

Beginning :

श्रीरामानुजगुरवे धाराकारं नमो ममापि स्यात् ।
यदपाङ्गसङ्गमहिमा सदयः कृत्स्नं प्रकाशयेत् तत्त्वम् ॥

शेषाचार्यतनूजो रामानुजगुरुजवेङ्कटनिवासः ।
द्राविडसंस्कृतमिश्रां तनुते ह्याशौचनिर्णयव्याख्याम् ॥

ഹാരീതകുലതിലകരായ് വൈദികസാർവഭൗമരെങ്കിറ നാമധേയത്താലെ പ്രസിദ്ധരായ് വെങ്കടാചാര്യാപരനാമധേയരുമാന തോഴപ്പർ ഇഷ്ടശിഷ്ടാനുഗ്രഹാർത്ഥം ആശൗചശതകമെങ്കിറ ഗ്രന്ഥത്തെ നിർമ്മിക്കത്തുടങ്ങി അവിഘ്നപരിസമാപ്ത്യർത്ഥം ഇഷ്ടദേവതാനമസ്കാരപൂർവകമാക വക്ഷ്യമാണഗ്രന്ഥത്തിൻ നാമധേയത്തെ തെരുവിക്കറാർ.

सुरासुरशिरोरत्नं ब्रह्मरुद्रादिसेवितम् ।
प्रणम्य पुण्डरीकाक्षं वक्ष्याम्याशौचनिर्णयम् ॥

End :

एकत्र सुखबोधार्थं सुसमीक्ष्य बहुस्मृतीः ।
कृतोऽघनिर्णयः स्पष्टं गृह्यतां तद् बुभुत्सुभिः ॥

അനേകം സ്മൃതികളൈ നൻറാക പര്യാലോചനൈ പണ്ണി അന്തന്ത സ്മൃതികളിലെ വിശകലിതമാക കിടന്ത അർത്ഥങ്കളൈ എല്ലോരും എളിതാക അറിയുംപടി ഒരുവിടത്തിലെ തിരട്ടി സ്പഷ്ടമാക അശൌചനിർണ്ണയമെങ്കിറ ഗ്രന്ഥം പണ്ണപ്പെട്ടതു്. ആകയാൽ സൂതകാശൗചങ്കളൈ നിർവിശങ്കമാക അറിയവേണമെൻറു ഇച്ഛയുടയവർകളാലെ ഇന്ത ശതകം പ്രത്യേകം പരിഗ്രാഹ്യം.

हारीतो वेङ्कटाचार्यः
श्रुतिस्मृतिविचक्षणः ।
व्यक्तं श्लोकशतेनेत्थ-
मकरोदघनिर्णयम् ॥

ഹാരീതസന്താനജനിതരായി ശ്രുതിസ്മൃത്യർത്ഥപരീക്ഷാദക്ഷരാന വെങ്കടാചാര്യരാനവർ ഇപ്പടി ശ്ലോകശതകത്തിനാലെ നിസ്സംശയമാക അറിവിപ്പിക്കിറ അശൌചനിർണ്ണയാഖ്യഗ്രന്ഥത്തൈ നിർമ്മിത്താർ.

Colophon :

श्रीवेङ्कटनिवासार्यः
श्रीमदात्रेयगोत्रजः ।
आशौचनिर्णयव्याख्या-
मतनोल्ललितामिमाम् ॥

शुभं भूयात् ।

Author—Text—Veṅkaṭācārya.

Commentary—Veṅkaṭanivāsa, son of Śeṣācārya.

Remarks—This work is known by the different titles Aghanirṇaya and Āśaucanirṇaya.

---

॥ बार्हस्पत्यसूत्रम् ॥

## No. 1151. BĀRHASPATYASŪTRAM.

C. O. L. No. 386.

Substance—Paper. Size—$8\frac{1}{2}'' \times 7''$. Pages — 43. 11—18 lines per page and 8—10 letters per line. Script—Devanāgarī. No. of Granthas—175.

Owner—C. O.

Subject—Nīti.

Beginning:

श्रीः ।

अथ बार्हस्पत्यसूत्रम् । प्रथमाध्यायः प्रारभ्यते ।

बृहस्पतिराचार्य इन्द्राय नीतिसर्वस्वमुपदिशति आत्मवत् राजा

End:

एवं धर्ममूलं च विद्यामार्जयेत् । विद्यामूलं जगत् । विद्या पुनः

सर्वमित्याह गुरुः ।

Colophon :

इति बार्हस्पत्यसूत्रे षष्ठोऽध्यायः ।

Author :

Remarks :

---

## ॥ राजनीतिसमुच्चयः ॥

### No. 1152. RĀJANĪTISAMUCCAYA.

C. O. L. No. 557.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—24. 16 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—200.

Owner—C. O.

Subject—Duties assigned to a King.

Beginning :

नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ।
सर्वबीजमिदं शास्त्रं चाणक्यं सारसंग्रहम् ॥

मूलसूत्रं प्रवक्ष्यामि चाणक्येन यथोदितम् ।
येन विज्ञा(न?त)मात्रेण मूर्खो भवति पण्डितः ॥

दुष्टा भार्या शठं मित्र भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥

परदारान् परद्रव्यं परिवादं परस्परम् ।
परिहास्यं गुरुस्थाने चापल्यं च विवर्जयेत ॥

पयःपानं भुजङ्गानां केवलं विषवर्धनम् ।
उपदेशो हि मूर्खाणां प्राकोपाय न शान्तये ॥

End :

अग्निहोत्रफला वेदा न च व्रात्तिफलं श्रुतम् ।
रतिपुत्रफला नारी रत्नमुक्ताफलं धनम् ॥

कुलशीलगुणोपेतः सत्यधर्मपरायणः ।
प्रवीणः कुशलो दक्षो धनाध्यक्षो विधीयते ॥

पुत्रः पौत्रगुणोपेतः शास्त्रज्ञो... ...भि पाचकः(?) ।
शुचिश्च कठिनश्चैव स उपकार विधयिते(?) ॥

आयुर्वेदकृताभ्यासः सर्वेषां प्रियदर्शकः ।
कार्यशीलगुणोपेत एव वैद्यो विधीयते ॥

Colophon :

इति सत्पण्डितश्रीचाणक्येन विरचिते राजनीतिसमुच्चयशास्त्रे नवमोऽध्यायः ।

Author—Cāṇkya.

Remarks—This codex comprises 9 chapters.

---

## ॥ लघुचाणक्यम् ॥

### No. 1153. LAGHUCĀṆAKYAM.

C. O. L. No. 541.

Substance—Paper. Size—11″ × $8\frac{1}{2}$″. Pages—11 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas — 110.

Owner—C. O.

Subject—A treatise on polity.

Beginning:

श्रीः ।

लघुचाणक्यम् । प्रथमोऽध्यायः ।

प्रणम्य शङ्करं देवं ब्रह्माणं च जगद्गुरुम् ।
विष्णुं प्रणम्य शिरसा वक्ष्यामि शास्त्रमुत्तमम् ॥

चाणक्येन स्वयं प्रोक्तं नीतिशास्त्रसमुच्चयम् ।
तदहं सम्प्रवक्ष्यामि नराणां बुद्धिवर्धनम् ॥

अर्थार्थेऽपि कृते शास्त्रे कीर्तिर्लोके प्रजायते ।
कीर्तिमान् पूज्यते लोके परत्रेह च मानवः ॥

वलीपलितकायोऽपि कर्तव्यः शास्त्रसंग्रहः ।
न तत्र धनिनो यान्ति यत्र यान्ति बहुश्रुताः ॥

श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिम् ।
श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षं च गच्छति ॥

End :

पञ्चैतानीह सृज्यन्ते गर्भस्थस्यैव देहिनः ।
आयुः कर्म च वित्तं च विद्या निधनमेव च ॥

लिखिता चित्रगुप्तेन ललाटेऽक्षरमालिका ।
न सा मार्जयितुं शक्या पण्डितैस्त्रिदशैरपि ॥

भवितव्यं यथा येन न तद्भवति चान्यथा ।
नीयते तेन मार्गेण स्वयं वा तत्र गच्छति ॥

पुराकृतं तल्लभते मनुष्यः
किं कारणं दैवमलङ्घनयिम् ।
तस्मान्न शोचामि न विस्मयामि
तदस्मदीयं नहि तत्परेषाम् ॥

वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुराकृतानि ॥

Colophon :

इति श्रीलघुचाणक्ये राजनीतिशास्त्रे अष्टमोऽध्यायः ।

सम्पूर्णम् ।

Author :

Remarks—This codex comprises eight chapters and is complete.

॥ वृद्धचाणक्यम् ॥

No. 1154. VṚDDHACĀṆAKYAM.

C. O. L. No. 542.

Substance—Paper. Size—11″ × 8″. Pages — 21 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas — 200.

Owner—C. O

Subject—Same as No. 1156.

Beginning :

॥ श्रीः ॥

वृद्धचाणक्यम् ।

प्रणम्य शिरसा विष्णुं त्रैलोक्याधिपतिं प्रभुम् ।
नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ॥

अधीत्येदं तथा शास्त्रं नरो ज्ञास्यति तत्त्वतः ।
धर्मोपदेशविज्ञानं कार्याकार्यं शुभाशुभम् ॥

तदहं सम्प्रवक्ष्यामि नराणां हितकाम्यया ।
येन विज्ञातमात्रेण सर्वज्ञत्वं प्रजायते ॥

मूर्खशिष्योपदेशेन दुष्टस्त्रीधरणेन च ।
द्विषतां सम्प्रयोगेन पण्डितोऽप्यवसीदति ॥

End :

कान्तावियोगः स्वजनापमान-
मृणस्य शेषं कुजनस्य सेवा ।
दारिद्र्यभा(वे?वो) विमुखं च मित्रं
विनाग्निना षट्‌ सुदहन्ति देहम् ॥

रज्यमानं धनाढ्यं च विद्यावन्तं तपस्विनम् ।
रणे शूरं च दातारं कनिष्ठं ज्येष्ठमुच्यते(?) ॥

नास्ति वेदात्परो धर्मो नास्ति मातृसमो गुरुः ।
न च दानात्परं (क्लि?श्लि)ष्टमिहलोके परत्र च ॥

Colophon :

इति श्रीवृद्धचाणक्ये राजनीतिशास्त्रे अष्टमोऽध्यायः । सम्पूर्णम् ।

Author :

Remarks—This is a work similar to Laghucāṇakya and consists of eight chapters. But this is more elaborate and lucid.

## ॥ छन्दः ॥

## ॥ छन्दोविचितिः (जानाश्रयी) ॥

### No. 1155. CHANDOVICITI (Jānāśrayī.)

C. O. L. No. 170.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Pages—70. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—700.

Owner—Kṛṣṇan Tantri, Tazhamon Madom, Ceṅgannūr, Travancore.

Subject—Prosody.

Beginning:

स भूपतिरुदारधीर्जयति सम्पदेकाश्रयो
जनाश्रय इति श्रिया वहति नाम सार्थं विभुः ।
जिता विजितशत्रुणा जगति येन रुद्धाचरन् (?)
महैरुरुभिरद्भुतैर्मघवतो जयश्रीरपि ।

अथातः छन्दोवृत्तजातीनां तत्त्वजिज्ञासवे शिष्याय पौराणिकेषु पैङ्गलादिषु छन्दोविचितिषु यथासम्भवं न्यूनातिरेकं परीक्ष्य परिहृत्य तद्दोषपरिहृतामिमामप्रपञ्चामलनाकुलां जनाश्रयीछन्दोविचितिं गणस्वामिरचितव्याख्यां व्याख्यास्यामः । तत्र तावत् छन्दांसि षड्विंशतिः । अपदान्याश्रयतया छादयन्तीति छन्दांसि । तानि षड्विंशतिरिति ज्ञेयानि ।

End:

तत्र गायत्र्या अध्वयोगं दर्शयिष्यामः । अस्याः सर्वाणि

वृत्तानि द्विगुणीकृतानि त्रीण्यथः पञ्चापि पञ्चचत्वारि तत्त्वतः ।
चत्वारि त्रीणि चाप्येवं प्रमितान्यङ्गुलानि वै ।
अङ्गुलमष्टौ यद्वादशाङ्गुलानि वितास्तिः (हस्त)द्वौ हस्तौ(?)...

... ... ... ... ... ... ...

इत्यादि चतुष्काभ्यां गणाभ्यां षट्कसप्तकाष्टकैश्च मात्रासमूहैर्यथा-स्वमल्पभेदान्निष्पन्नानां वैतालीयादीनां जातिश्लोकानां लाघवे मात्रा येन प्रमाणेन यावताङ्गेनाक्षरेभ्योऽधिका भवन्तीति ।

Colophon :

इति जानाश्रय्यां छन्दोविचित्यां प्रक्रियाध्यायः षष्ठः । समाप्तेयं छन्दोविचितिः ।

Author—Janāśraya.

Remarks—There are three important schools of prosody i. e., of Bharata, Piṅgala and Janāśraya. Janāśraya probably was one of the Kings of the Viṣṇukuṇḍin dynasty and he flourished about 600 A. D. and ruled over the country now lying between the districts of Kṛṣṇa and Godāvari. Gaṇaswāmin, the author of the Bhāṣya says in the introductory verse that Janāśraya performed a number of yāgas and he conquered many Kings. Examples are taken from the works of Bharata, Vararuci, Śūdraka, Aśvaghoṣa, Sundara Pāṇdya, Kāḷidāsa, Kumāradeva etc., by the author Janāśraya.

---

## ॥ वृत्तप्रकाशिका ॥

## No. 1156. VṚTTAPRAKĀŚIKĀ.

C. O. L. No. 804.

Substance—Paper. Size—11″ × 8¾″. Pages—46. 20 lines per page and 26 letters per line. Script—Devanāgarī. No. of Granthas—750. Complete.

Owner—C. O.

Subject—Commentary on Vṛttaratnākara.

Beginning :

भजमानजनाज्ञानपिधानविहितव्रतम् ।
नमामि दक्षिणामूर्त्तिमहो मोहापनुत्तये ॥

यं प्राहुरखिलानर्थपञ्जरस्य विदारणम् ।
वन्दे तं पिञ्जराकारं कुञ्जराननमञ्जसा ॥

नरीनरीति या नित्यं मुखरङ्गे सरस्वती ।
चरीकरोतु मेऽभीष्टं भारती बोधरूपिणी ॥

मदीयमानसाम्भोजविकासनविचक्षणम् ।
उपासे सततं भक्त्या भारतीतीर्थभास्करम् ॥

क्रियते कृष्णसारेण सम्प्रदायानुसारतः ।
वृत्तरत्नाकरस्येयं व्याख्या वृत्तप्रकाशिका ॥

वृत्तरत्नाकराख्यं वृत्तादिविभवपरिज्ञानासाधारणं छन्दश्शास्त्रं चिकीर्षुराचार्यश्चिकीर्षितस्य शास्त्रस्याविघ्नपरिसमाप्तये शिष्टाचारपरिपालनाय विशिष्टदेवताप्रणतिमङ्गलाचरणपूर्वकमुद्देश्यं प्रतिजानीते—सुखेत्यादिभिस्त्रिभिः श्लोकैः। न च प्रथमद्वितीयश्लोकयोः क्रियापदाभावादानर्थक्यं शङ्कनीयम्, अन्तकुलकत्वेन तद्गतक्रियापदानपेक्षयोपपत्तेः।

End :

आत्मनः कुलीनतादिप्रदर्शनेन श्रोतॄणां स्वग्रन्थे रुचिमुत्पादयन्नाह ग्रन्थकारः—वंशोऽभूदित्यादिना ।

काश्यपस्य वंशे पव्वेको नाम द्विजोत्तमोऽभूत्। तस्य केदारो नाम पुत्रोऽभूत् । तेन केदारेण वृत्तरत्नाकराख्यं छन्दः प्रतिविरचितमिति योजना । किंविशिष्टः पव्वेकः। प्रकटगुणगणः। शैवसिद्धान्तवेत्ता । अन्यत्केदारस्य विशेषणम् ।

Colophon :

फलं स्वर्गापवर्गाख्यं फलन्तं फलिनां परम्।
श्रीमत्केशवतीर्थाख्यं पारिजातमुपास्महे ॥

श्रीमत्सरस्वतीतीर्थश्रीपादाम्भोजषट्पदः।
वेदेन्द्रभारतिनाम्ना जगौ वृत्तप्रकाशिकाम् ॥

इति वृत्तप्रकाशिकायां षट्प्रत्ययाध्यायः षष्ठः ।

Author—Vedendrabhārati.

Remarks—After the colophon are seen a few more verses defining certain metres.

---

॥ वृत्तरत्नाकरव्याख्या ॥

No. 1157. VṚTTARATNĀKARAVYĀKHYĀ.

C. O. L. No. 543.

Substance—Paper. Size—$13\frac{3}{4}'' \times 8\frac{1}{2}''$. Pages—146. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1825.

Owner—C. O.

Subject—Exposition of Vṛttaratnākara.

Beginning :

हरिः ।

गम्भीरं नौमि हेरम्बं वृंहितं विश्वबृंहणम् ।
प्रत्यूहव्यूहसन्नाहप्रत्यूहप्रतिपत्तये ॥

कला काचित् परा मह्यं चिन्मयीं चिदचिन्मयीम् ।
अचिन्मयीमपि दशां प्रथयन्ती प्रसीदतात् ॥

अस्तु लेशः कलेशस्य मौलौ शारदया धृतः ।
शेषस्वगात्रनिर्माणकारणस्येव कामधुक् ॥

वेणुगीतं भजे विष्णोर्वृन्दावनविहारिणः ।
नादब्रह्मामृताम्भोधौ मग्ना यत्र जगत्त्रयी ॥

कृतार्थयद्यस्त्रैविद्यनिर्मलैर्निजकर्मभिः? ।
भूसुरेभ्यस्तपोलक्ष्मीभासुरेभ्योऽयमञ्जलिः ॥

तस्मै नमोऽस्तु शास्त्राय छन्दोविचयनात्मने ।
यदाहुरागमाद्याया विद्याया गतिसाधनम् ॥

उत्कर्षवत्या जात्या च वृत्तेन च परिष्कृतान् ।
वाङ्निगुम्फान् कवीन्द्राणां क्ष्मानिलिम्पानिव स्तुमः ॥

अस्ति श्रीराजराजाख्यः केरलेषु महीपतिः ।
यत्प्रतापबृहद्भानोर्विस्फुलिङ्गायते रविः ॥

यत्कीर्तिकलशीसिन्धौ सन्ध्यानृत्तोद्धुरभ्रमिः ।
मथनोद्धृतमन्थाद्रिमुद्रां धत्ते महानटः ॥

वदान्यं वासवाचार्यं वाग्मिनं च सुरद्रुमम् ।
यं निर्मितवता धात्रा लम्भिता भाति कुम्भिनी ॥

धराधरैरगम्भीरैरुदन्वद्भिरनुन्नतैः ।
न लभ्यते कवयतो वाचि यस्य वयस्यता ॥

विद्यास्थानानि भुवनान्यपि यस्य चतुर्दश ।
प्रौढा प्रज्ञा समज्ञा च समभिव्याप्य वर्तते ॥

परस्परोपघातेन पार्थिवेषु कदर्थितः ।
त्रिवर्गो रमते यत्र समग्रः संयतात्मनि ॥

अभूत्कश्चन निश्शेषगुरुसात्कृतसम्पदः ।
सर्वविद्यानिधेस्तस्य साहित्यदिशि देशिकः ॥

श्रीवैष्णवकुलोद्भूतः शेवधिः कविसम्पदाम् ।
करुणाकरदासाख्यः कमलेक्षणनन्दनः ॥

कुलपालिकया मात्रा कुशाग्रीयमनीषया ।
संशिक्षिताक्षरतया साक्षरैरभिराधितः ॥

सहस्रधेनोरुद्धृत्य तद्वृत्तैः श्लोकतर्णकैः ।
विद्वद्गोष्ठ्यां विहरता व्याहृतः स महीभृता ॥

बह्व्यो विलोकिता व्याख्या वृत्तरत्नाकरस्य ताः ।
अशक्तेर्वा प्रणेतॄणां प्रमादाद्वा न सुस्थिताः ॥

अतो व्याख्या निबद्धव्या श्लाघ्या प्रेक्षावतां त्वया ।
दयालवः परार्थे हि यतन्ते हृदयालवः ॥

यल्लक्षणात्मकतया लक्ष्यस्यात्र विजिह्मता ।
तदुदाहरणं चान्यत् प्रतिलक्ष्म प्रकाश्यताम् ॥

यदत्युपनिषच्चिन्ताद्यत्यन्तमुपयुज्यते ।
प्रकृते तत् प्रसङ्गानुप्रसङ्गादपि तन्यताम् ॥

ततः कवयतां प्रायो व्याख्येयमुपकारिणी ।
कविचिन्तामणिरिति ख्यातिरस्या भविष्यति ॥

इति शैलार्णवेन्द्रस्य वचनामृतसेचनात् ।
व्याचिख्यासा प्ररूढान्तरेवमस्योदजृम्भत ।

अनवरतनिरुपाधिकभक्तिभारसुरभीकृतसपर्यासंविधानसंपादित-परमेश्वरप्रसादोऽप्याचार्यः परमकारुणिकतया कविसहृदयपदसमारोहणनिःश्रेणिकायमाननानाविधगद्यपद्यनिर्माणविचारणापरिशीलनप्रथमभूमिकाभूतस्य वृत्तविज्ञानस्योपायविचयनविसंस्थुलहृदयानामनायासव्युत्पत्तिजनकं कमपि ग्रन्थं ग्रथितुमारभमाणः तत्सौकर्यसाफल्यनिरवग्रहपरिकरसामग्रीपरिग्रहाभिलाषको विशेषतस्तदनुगुणगुणोत्कर्षाभिमानसमुद्घाटनवाचिकोपहारेण परमेश्वरसाम्मुख्यं करोति।

सुखसन्तानसिद्‌ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शङ्करं लोकशङ्करम् ॥

वेदशास्त्रार्थतत्त्वज्ञः पब्बेकोऽभूद् द्विजोत्तमः ।
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥

तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां सुखसिद्धये ॥

सङ्ख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तिता ।
वृत्तस्याङ्गुलिकी व्याप्तिर्मयः कुर्यात्तथाङ्गुलिम् ॥

एभिः प्रस्तारादिभिः वृत्तानां परिमाणादिकं निश्चीयते । इत्येतानि छन्दोविचितिषु षट्प्रत्यया इति व्यपदिश्यन्ते । प्रतीयतेऽस्मादिति प्रत्ययः ।

End:

अस्ति चेदस्मदुक्तेषु यत् किञ्चिदसमञ्जसम् ।
अनुग्रहेण साधूनां सर्वं भवतु मङ्गलम् ।

Colophon:

इति कुलपालिकासूनुविरचितायां वृत्तरत्नाकरटीकायां कविचिन्तामणौ षट्प्रत्ययानिर्णयो नाम षष्ठोऽध्यायः ।

Author—Text Kedāra, son of Pavveka.

Commentary—Son of Kulapālikā.

Remarks—The introductory portion evinces that the work was composed at the command of Rāja Rāja King of Keraḷa. The commentary is named Kavicintāmaṇi.

---

॥ वृत्तरत्नाकरव्याख्या ॥

No. 1158. VṚTTARATNĀKARAVYĀKHYĀ.

C. O. L. No. 2503.

Substance—Palm leaf. Size—11″ × 2″. Leaves—59. 9—13 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—1825.

Owner—Nārāyaṇan Mitran Nambūri Avl.

Subject—Same as No. 1157.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ताम्बूलं मालतीमाला बालाहेलावलोकनम् ।
त्रिलोचनमनाराध्य त्रितयं नोपलभ्यते ।

कारणं जगतां वन्दे कण्ठादुपरि वारणम् ।
मातामहमहाशैलं महस्तदपितामहम् ॥

End :

सङ्ख्यैव द्विगुणैकोना सद्भिरध्वा प्रतिकीर्तिता ।
वृत्तस्याङ्गुलिकी व्यस्त्रिमेयः कुर्यात्तथांगुलिम् ॥

Colophon—Same as No. 1157.

Author—Same as No. 1157.

Remarks—The opening five leaves contain the text alone and then begins the commentary.

---

## ॥ अलङ्कारः ॥

## ॥ अलङ्कारसर्वस्वसञ्जीविनी ॥

No. 1159. ALAṄKĀRASARVASVASAÑJĪVINĪ.

C. O. L. No. 656.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—4,

10 lines per page and 68 letters per line. Script — Malayāḷam. No. of Granthas—175. Complete.

Owner—C. O.

Subject—Poetics.

Beginning :

हरिः ।

विश्वं प्रकाशयति या जातिगुणाद्यात्मिका निजैः प्रसरैः ।
संस्कारगुणसमृद्धा वाणी मामवतु सरळसन्दर्भा ॥

विभागाभिगतं त्रित्वं त्रिशब्देन समाप्यते ।
त्रिप्रकारत्ववचनः कृतिशब्दस्ततो मतः ॥

पुनरुक्तवदाभासो यत्रेत्येवं हि संस्क्रिया ।
अलङ्कार्यैकनिघ्नत्वव्यक्तये समुपाश्रिता ॥

प्रकृष्टो वर्णविन्यासो रसाद्यनुगतस्तु यः ।
सोऽनुप्रासस्स च च्छेकवृत्त्युपाधिवशाद् द्विधा ॥

End :

तिलतण्डुलनीत्या संश्लेषः संसृष्टिरिष्यते ।
सा शब्दार्थोभयगतैरलङ्कारैस्त्रिधा मता ॥

अङ्गाङ्गिभावात् सन्देहात् प्रवेशादेकवाचके ।
त्रिधा तु सङ्करः शब्दालङ्कृत्योरेकवाचके ॥

शब्दन्यासो विषमविषमो दुर्घटार्थव्यवस्था
व्याप्त्यव्याप्तिप्रकटनपटुर्न्यायचर्चा गभीरः ।
इत्थं भूम्ना रुचकवचसां विस्तरः कर्कशोऽयं
टीकाभाभिः समुपरचितानेन सञ्जीवनीयम् ॥

Colophon :

काव्यप्रकाशेऽलङ्कारसर्वस्वे च सचेतसाम् ।
अत्यादरो जगत्यस्मिन् व्याख्यातमुभयं ततः ॥

श्रीरामाय नमः ।

अवान्तरविशेषनिर्व्यपेक्षो निष्कृष्टार्थः ।

Author—Śrīvidyācakravartin.

Remarks—The colophon indicates that this work is only a commentary on Kāvyaprakāśa and Alaṅkārasarvasvom. It may be designated Sañjīvinī from internal evidence.

---

## ॥ अलङ्कारसर्वस्वसञ्जीविनी ॥

No. 1160 A. ALAṄKĀRASARVASVASAÑJĪVINĪ.

C. O. L. No. 624 A.

Substance—Palm leaf. Size—21″ × 2″. Leaves—57.

9 lines per page and 76—90 letters per line. Script — Malayaḷam. No. of Granthas—2650.

Owner—C. O.

Subject—Poetics.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

विश्वं प्रकाशयन्ती जातिगुणाद्यात्मकं । निजैः प्रसरैः ।
संस्कारगुणसमृद्धा वाणी ममावतु सरळसन्दर्भा ॥

सञ्जीविनीति टीका श्रीविद्याचक्रवर्तिना क्रियते ।

उदाहरणशेषोऽत्र ध्वनौ ग्रन्थकृता कृतः ।
तदीयन्यायसम्पन्नैः स्वपद्यैः पूरयामि तम् ॥

ध्वनिदर्शनानुरक्ताः सूक्ष्मेक्षिकया निरीक्ष्य टीकां मे ।
कवयः सचेतना अपिहतनुतसाहित्यसाम्राज्या(?) ।

End :

तदलङ्कारत्वप्रयोजकत्व इति श्रौतोपमादेः शब्दान्वयव्यतिरेकाविधानात् शब्दालङ्कारत्वं प्रसरयन् निगमयति । तस्मादाश्रयाश्रयीति चिरन्तनमतेत्युक्तार्थे संवादनसमुद्घाटनम् ।

Colophon :

शब्दन्यासो विषमविषमो दुर्घटार्थव्यवस्था
व्याप्या (?) प्रकटनपटुन्यायचर्चा गभीरः ।

इत्थं भूम्ना रुचकवचसां विस्तरः कर्कशोऽयं
टीकास्माभिः समुपरचितानेन सञ्जीविनीयम् ॥

सूक्ष्मामव्याकुलामत्र शास्त्रयुक्त्युपबृंहिताम् ।
मीमांसामुपजीवन्तु कृतिनः काव्यतन्त्रिकाः ॥

काव्यप्रकाशेऽलङ्कारसर्वस्वे च सचेतसाम् ।
येनादरो महांस्तेन व्याख्यातमुभयं सह ॥

इत्यलङ्कारचक्रवर्तिध्वनिप्रस्थानपरमाचार्यकाव्यमीमांसाप्रभाकरसहजसर्वज्ञमहाकविश्रीविद्याचक्रवर्तिविरचितायां सञ्जीविन्यां अलङ्कारसर्वस्वटीकायाम् अर्थालङ्करणं समाप्तम् । समाप्ता चेयं सञ्जीविनी इत्यलं प्रासङ्गिकेन बहुना ।

तत्राह—सांख्ययोगादिशास्त्रविषयेण प्रतिज्ञातं खल्वस्माभिः श्रीगुरुप्रसादसमनन्तरं शैशव एवं यथा ।

शैवं विष्णुनिबन्धमौपनिषदं साङ्ख्यं सपातञ्जलं
शास्त्रं स्वात्महिताय वेद सकलैः साकं पुराणादिभिः ।
भूपानां तु विनोदनाय भरतं नीतिं सवात्स्यायनं
षड्भाषाकवितां च लक्षणवतीं श्रीचक्रवर्ती कविः ॥

इति स्पर्धया सिसाधयिषून् दुस्तार्किकजरद्गवान् प्रति उपहासपरस्य ममायमन्यः श्लोकः—

सांख्यं वेश्मनि वेश्मनि श्रुतिगिरः कक्ष्यासु कक्ष्यासु च
द्वारिद्वारि शिवागमाः पथिपथि प्राचां कवीनां गिरः ।

पश्यन्ते यदसूयिभिर्जडतरप्रज्ञैर्जरत्तार्किकै-
स्तत् सर्वं खलु चक्रवर्तिकवितुर्विद्यायशोडिण्डिमः ॥

Author—Śrī Vidyācakravartin.

Remarks—The Ms. briefly expounds the principles of poetics.

---

## ॥ अलङ्कारसर्वस्वम् ॥

No. 1160 B. ALAṄKĀRASARVASVAM.

C. O. L. No. 624 B.

Substance—Palm leaf. Size—21″ × 2″. Leaves—32, 9 lines per page and 88 letters per line. Script — Malayāḷam. No. of Granthas—800. Complete.

Owner—Same as No. 1160 A.

Subject—Same as No. 1160 A.

Beginning :

हरिः । श्रीगणपतये नमः ।

नमस्कृत्य परां वाचं देवीं त्रिविधविग्रहाम् ।
निजालङ्कारसूत्राणां वृत्त्या तात्पर्यमुच्यते ॥

इह भामहोद्भटप्रभृतयस्तावत् चिरन्तनालङ्कारकाराः प्रतीयमानमर्थं वाच्योपस्कारतयालङ्कारपक्षनिक्षिप्तं मन्यन्ते तथाहि—पर्या-

योक्ताप्रस्तुतप्रशंसासमासोक्त्याक्षेपव्याजस्तुत्युपमेयोपमानानन्वया-
दौ वस्तुमात्रं गम्यमानं वाच्योपस्कारकत्वेन 'स्वसिद्धये पराक्षेपः
परार्थं स्वसमर्पणम्' इति यथायोगं द्विविधया भङ्ग्या प्रति-
पादितं तैः ।

End :

अन्वयव्यतिरेकौ तु तत्कार्यत्वे प्रयोजकौ, न तदलङ्कारत्वे। तद-
लङ्कार(?त्व)प्रयोजकत्वे तु श्रौतोपमादेरपि शब्दालङ्कारत्वप्रसङ्गात् ।
तस्मादाश्रयाश्रयिभावेनैव चिरन्तनमतानुवृत्तिः ।

Colophon :

इति श्रीकाश्मीरसान्धिविग्रहिकमङ्खुकस्य कृतिरलङ्कारसर्वस्वम् ।
इति मङ्खुको वितेने काश्मीरक्षितिपसान्धिविग्रहिकः ।
सुकविमुखालङ्कारं तदिदमलङ्कारसर्वस्वम् ।

Author—Maṅkhuka.

Remarks—The Ms. is printed as No. 40 in TSS. An index to the figures occurs at the close of the Ms. According to the printed edition, the text is attributed to Rajanaka Ruyyaka and the commentary to Maṅkhuka. The subsequent three leaves embody a few verses in the 3rd Skandha of the Bhāgavata. Further some astrological topics are also discussed.

## ॥ अलङ्कारसर्वस्वसञ्जीविनी ॥

No. 1161. ALAṄKĀRASARVASVASAÑJĪVINĪ.

C. O. L. No. 708.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—102. 8 lines per page and 50 letters per line. Script — Malayāḷam. No. of Granthas—2550.

Owner—Nārāyaṇan Bhaṭṭatiri Avl., Parambūrillam, Tiruvalla.

Subject—Poetics.

Beginning:

विश्वं प्रकाशयन्ती जातिगुणाद्यात्मकं निजैः प्रसरैः ।
संस्कारगुणसमृद्धा वाणी मामवतु सरळसन्दर्भा ॥

रूपकाद्या... ... ...सेयमलङ्कारसर्वस्वे ।
सञ्जीविनीति टीका श्रीविद्याचक्रवर्तिना क्रियते ॥

End:

सूक्ष्मामप्याकुलामत्र शास्त्रयुक्त्युपबृंहिताम् ।
मीमांसामुपजीवन्तु कृतिनः काव्यतान्त्रिकाः ॥

काव्यप्रकाशेऽलङ्कारसर्वस्वे च सचेतसाम् ।
येनादरो महांस्तेन व्याख्यातमुभयं सह ॥

Colophon:

इत्यालंकारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यकाव्यमीमांसो प्रभाकरसहजसर्वज्ञमहाकविश्रीविद्याचक्रवर्तिविरचितायां अर्थालङ्कारप्रकरणं समाप्तम् ।

समाप्ता चेयं सङ्गीतिविन्याख्यालङ्कारसर्वस्वटीकेति शिवम् ॥

Author—Vidyācakravartin.

Remarks—The leaves between pages 45 and 99 are missing.

---

॥ आस्थानभूषणम् ॥

No. 1162. ĀSTHĀNABHŪṢAṆAM.

C. O. L. No. 412.

Substance—Paper. Size—13½" × 8½". Pages—35. 18 lines per page and 20 letters per line. Script — Devanāgarī. No. of Granthas—350.

Subject—A panegyric of Kings, illustrating various principles of poetics.

Beginning :

ज्यायांसं तनयं निधाय सविधे पत्युः सखीभ्यां समं
सत्यां जन्मगृहे महान् क्रतुरिति द्राक्प्रस्थितायां मुदा ।
तत्कालं करमस्तकं स गिरिशो यस्यानुवेलं स्पृश-
न्नत्याक्षीद्विरहव्यथां दिशतु ते भद्रं स भद्राननः ॥

× × × × ×

यः पादेन निरीक्षते जगदिदं यो वा शृणोत्यक्षिभि-
र्यौ चान्योन्यमुभावमू विवदतो ब्रह्मेति कर्मेति च ।

आहुः सूक्ष्मविदः समष्टिरिति यं तेषां चतुर्णामपि
श्रीमानेष सदाविरस्तु हृदये श्रीनल्लिकण्ठाध्वरी ॥

वृत्तोज्ज्वलं विततदीप्तिविचित्ररीति
न्यास्थानभूषणमिदं कलयामि राज्ञाम् ।
साध्वेव वास्तु न च वात्र विमर्शभारो
युष्मासु केवलमदःकुशलाः कलादाः ॥

End :

पृथ्वीभृतां भुजमहःकुरुविन्दरोचिः-
किम्मीरनिर्मलयशोगुणमौक्तिकाङ्कम् ।
आस्थानभूषणमिदं श्रुतिमौलिकण्ठे
कौतूहलेन सुमनाः सुचिरं बिभर्तु ॥

निर्निद्राभ्यवहारमस्मृतजगत्तन्त्रं विविक्तामिकं
निष्प्रत्यूहमनस्समाधि कुहचिन्निर्लक्ष्यदन्तेक्षणम् ।
सन्दृभ्नातु चमत्कृतं कवयिता यद्यस्ति पारे गिरां
भाग्यात् तस्य कृतिः प्रथेत धरणावासेतुहेमाचलम् ॥

Colophon :

श्रीगोपालसमुद्रग्रामे मृदुसूक्तिमल्लिकारामे ।
आकलितवसतिरकरोदाच्चानास्थानभूषणं राज्ञाम् ॥

Author—Accanyajva.

Remarks :

## ॥ काव्यदर्पणम् ॥

## No. 1163. KĀVYADARPAṆAM.

C. O. L. No. 714.

Substance—Paper. Size—11⅕" × 9". Pages—20. 20 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas — 200.

Owner—C. O.

Subject—Poetics.

Beginning :

... ... ... .... ...ज्यते । ननु जयतीत्यत्र उत्कर्षप्रतियोगिनो विशेष्यानुपादानात् संकोचोपमानाभावने भारत्याः सर्वोत्कृष्टत्वप्रतीतेरयं ततोऽपकर्षज्ञानवान् भारतीगतसर्वोत्कृष्टत्वज्ञानवत्त्वादित्यनुमानेनैव नमस्कारप्रतीतिः न व्यञ्जनया । न च तद्गतोत्कर्षज्ञानवत्त्वस्य तदपेक्षया स्वगतापकर्षज्ञानमात्रं नमस्कारः। तथा सति राजा जयतीति क्षत्रियादिस्तुतावपि नमस्कारानुमित्यापत्तेः। किन्तु भक्तिश्रद्धापूर्वकमपकर्षज्ञानम् । तच्च व्यञ्जनयैव स्यात् । अस्तु वात्रानुमितिसम्भवः। तथापि तस्या व्याप्तिस्मरणादि सापेक्षत्वेन विलम्बाद्व्यञ्जनाया एव झटिति प्रवृत्तिः ।

End :

प्रथमोल्लासे हि गुणादिविशिष्टं शब्दार्थयुगळं काव्यमित्युक्तम्। तत्र शब्दार्थयोः प्राधान्यात् प्रथमं तत्स्वरूपं दर्शयिष्यन् अर्थापेक्षया शब्दस्य प्राधान्यात् शब्दस्वरूपं तावद्विभजन्नेव निर्दिशति—शब्दोऽत्र त्रिविधः ।

Colophon :

इति दन्तिश्रोतिदिवाप्रदीपाङ्कसत्यमङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्द्धनारीश्वरगुरुचरणसहजतालब्धविद्यावैशद्यश्रीराजचूडामणिदीक्षितस्य कृतिषु काव्यदर्पणे प्रथमोल्लासः ।

Author—Rājacūḍāmaṇidīkṣita.

Remarks—The Ms. commences on a fragment of the 1st Ullāsa. Six leaves of the original Ms. are not copied herein. The work is available in print.

---

## ॥ काव्यप्रकाशटीका (प्रकाशिका) ॥

## No. 1164. KĀVYAPRAKĀŚAṬĪKĀ (Prakāśikā.)

C. O. L. No. 330.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—124. 6—8 lines per page and 50—58 letters per line. Script—Malayāḷam. No. of Granthas—2300.

Owner—Śaṅkaranārāyaṇa Piḷḷai Avl., Mānnār.

Subject—Elucidation of the characteristics of perfect and imperfect poetic compositions.

Beginning :

गणपतये नमः । स्वस्त्यस्तु ।

(श्रीणामुदारः) श्रीकान्तः श्रियं दिशतु मे प्रभुः ।
यस्याहुरीक्षणमिदं विश्वं नैगमसूक्तयः ॥

उपास्य विदुषो वृद्धान् यज्वा यज्ञेश्वराह्वयः ।
व्याख्यां काव्यप्रकाशस्य विदधाति यथामति ॥

ग्रन्थारम्भ इत्यादि—सदाचारप्रमाणकेष्टदेवतानमस्कारः कारिकार्थ इति दर्शयति। ग्रन्थः प्रारभ्यमाणं प्रकरणम् । ग्रन्थग्रहणम् सरस्वत्याः समुचितेष्टदेवतात्वद्योतनाय। समुचितेति। अधिकृतेत्यर्थः। भारत्याश्चाधिकृतत्वं तत्प्रसादैकलभ्यस्य काव्यस्यात्राभिधेयत्वात्। अभिधायकस्यापि प्रकरणस्य वाङ्मयरूपत्वात् । परामृशति अनुसन्दधाति । अत्र स्वाभिलाषितानुरूपं सरस्वत्या रूपमाविर्भावयति नियतेत्यादिना।

End :

... ... ...क्षणमाप्तमूलभावालोकपरिगृहीतं न स्यादित्याशङ्कायाम् इतीति। ध्वनिकृत्प्रभृतीन.... .... .... भिन्नो विशीर्णः सिद्धान्तो मया सङ्कलय्य सुखग्रहणार्थमे.... .... ....र्शितः न तु स्वमनीषित .... .... .... .... .... चातुर्याच्चपूर्वं निर्मितमिवैतत्प्रतीयते। अतः प्रेक्षावत्.... .... ....कारणमाप्तमूलत्व .... .... ....नापिकार.... .... ....यं ग्रन्थोऽसमाप्तः पश्चादन्येन पूरिता.... .... .... ....संघटनाकौशला .... .... .... न्तरश्च ध्वन्यत इति शिवम् ।

Colophon :

यज्ञेश्वरेण रचिता बहुदर्शनेयं
काव्यप्र.... .... ....त्रम् ।

समस्ततन्त्रार्थनिवेशरम्या
प्रकाशिकाख्या विवृतिर्गभीरा ॥

अन्यून.... .... .... ....
.... .... .... ....निर्मिता शुभा ।
आचन्द्रतारकं भूयाद्विदुषां कर्णमञ्जरी ॥

इति यज्ञेश्वर.... .... .... .... ....काव्यप्रकाशटीकायां प्रकाशिकायां दशम उल्लासः ।

Author—Yajñeśvarabhaṭṭa.

Remarks—The leaves are extremely damaged.

---

## ॥ काव्यप्रकाशटीका (प्रकाशिका) ॥

### No. 1165. KĀVYAPRAKĀŚAṬĪKA (Prakāśika).

C. O. L. No. 545.

Substance—Palm leaf. Size—19″ × 2″. Leaves—63. 8 lines per page and 70—76 letters per line. Script—Malayāḷam. No. of Granthas—2300.

Owner—Kumāran Mūttatu Avl., Kiḍaṅgūr.

Subject—Same as No. 1164.

Beginning :

हरिः । श्रीगणपतये नमः ।

श्रीणामुदारः श्रीकान्तः श्रियं दिशतु मे प्रभुः ।
यस्याहुरीक्षणमिदं विश्वं नैगमसूक्तयः ॥

End :

पुंस्त्वादित्यादि । पुंस्त्वं पुरुषस्य भावः । अमृतम्र.... .... रुकृत्यं च अधःपाताळं निकृष्टागतिश्च । प्रणयेन महान् याच्ञया महान् याचनमस्य ... ....कस्यापीति भगवतो विश्वोद्धारणं प्रसिद्धम् । अन्यत्र तु भुवनरक्षणं पुरुषोत्तम ... ...

Colophon :

इति यज्ञेश्वरविरचितायां काव्यप्रकाशटीकायां षष्ठ उल्लासः ।
इति यज्ञेश्वरभट्टविरचितायां काव्यप्रकाशटीकायां नवमोल्लासः ।

Author—Yajñeśvarabhaṭṭa.

Remarks—The closing portion is missing.

---

## ॥ काव्यप्रकाशटीका (प्रकाशिका)

### No. 1166 A. KĀVYAPRAKĀŚAṬĪKĀ (Prakāśikā).

C. O. L. No. 2410 A.

Substance—Palm leaf. Size—17½″ × 2″. Leaves—30

100. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—2500. Complete.

Owner—Kaṇḍan Śaṅkaravāriar Avl., Kuṭṭamperūr.

Subject—Beginning—Same as No. 1164.

End :

.... ...भिन्नोऽवशीर्णः सिद्धान्तो मया सङ्कलय्य सुखग्रहणार्थमेकत्र दर्शितः। न तु स्वमनीषितया काश्चि.... ...घटनाचातुर्यात्तु अपूर्वनिर्मितमिवैतत् प्रतीयते, अतः प्रेक्षावत्प्रवृत्तिकारणमाप्त... ...र्थः। ग्रन्थकृता च केनापि कारणेनायं ग्रन्थो समाप्तः पश्चादन्येन पू... ... ... ...संघटनाकौशलादेककर्तृकत्ववदवभासत इत्यर्थान्तरञ्च ध्वन्यते।

Colophon—Same as No. 1164.

Author—Yajñeśvarabhaṭṭa.

Remarks—Many leaves have been damaged. After the close of the work, three leaves deal with the Uṇādisūtras.

## ॥ सेतुबन्धव्याख्या ॥

## No. 1166 B. SETUBANDHAVYĀKHYĀ.

C. O. L. No. 2410 B.

Substance—Palm leaf. Size—17″ × 2″. Leaves—8. 7—9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—200.

Owner—Same as No. 1166 A.

Subject—A commentary on Setubandha a Prākrit Mahākāvya.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ः

प्रणम्य जगतो हेतुं सेतुं संसारवारिधेः ।
सेतूदन्वति तात्पर्यव्याख्यासेतुर्निबध्यते ॥

गृहीत्वैवादितः सर्वा
यासां तात्पर्यमस्फुटम् ।
संस्कृतैर्निर्दिशन् देशीः
गाथास्ता व्याकरोम्यहम् ॥

प्रबन्धादावविघ्नपरिसमाप्तिकामः कविर्नमतेत्यस्य विध्यर्थतया

नद्वारेण तदुपासनयितोत्कीर्तनरूपमविगीतसदाचारसमधिगतं मङ्ग-
लं कुर्वन् श्रोतृणामपि तत्कर्तव्यताबोधनार्थं ग्रन्थे निबध्नाति—
णमहेत्यादि ।

End :

मसिणि इत्यादिना । पुनरवस्कन्दनबुद्ध्या इत्याशयः, पंका
अइत्या... ... ...णिं महि अनिर्गतस्निग्धारुणदेहच्छवितया
बकुलामोदिदरीमुखतया च मधुपसमाधिरत्राभिप्रेतः। बोलंति इत्यादि
बोलंति... ...दिति बहुव्रीहिः तडपं भारेत्यादि...

Colophon :

Author :

Remarks—The first three leaves contain a Sanskrit rendering and explanation of 49 verses in the first Ullāsa. The next five leaves contain elucidation of the idea embodied in verses 51—57.

---

## ॥ साहित्यदर्पणम् ॥

No. 1166 C. SĀHITYADARPAṆAM.

C. O. L. No. 2410 C.

Substance—Palm leaf. Size—17″ × 2″. Leaves—9.

7—9 lines per page and 46—52 letters per line. Script—Malayālam. No. of Granthas — 225. Incomplete.

Owner—Same as No. 1166 A.

Subject—An elaborate exposition of the Sāhitya-darpaṇa.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ग्रन्थारम्भे प्रारिप्सितस्य निर्विघ्नपरिसमाप्तिकामो वाङ्मयाधिकृत .... तायास्साम्मुख्यमाधत्ते ।

शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।
अपहृत्य तमः सन्ततमर्थानखिलान् प्रकाशयतु ।

अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलत्वेनै... ... ... मिति काव्यफलान्याह —

चतुर्वर्गफलप्राप्तिः सु...दन्यधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥

उक्तञ्च

धर्मार्थकाममोक्षेषु वैचक्षण्यं कला(सु च) ।
(क)रोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥

इति ।

End :

... ... कदाचित् ज्ञातो भवति । रसस्य तु प्रतीयमान-
दशायामेव सम्भवात् तद्विलक्षणत्वमित्यर्थः । यद्येष विभावादि-
ज्ञानकारणत्वमित्यभि ...नानित्येतेनाप्ययं साक्षा ... ....
...वेदनकाले हि न भाव्योऽप्यस्य विद्यते । न खलु नित्यवस्तुनोऽ-
संवेदनकाले संभवेनापि साक्षादानन्दमयप्र ... ...

Colophon :

इति साहित्यदर्पणे वृत्तिनिर्णयो नाम द्वितीयोल्लासः ।

Author—Viśvanātha Kavi Rāja.

Remarks — The Ms. covers only the first three Ullāsas. The leaves are much damaged. The explanation contained in the additional 16 leaves after the 9th measuring 9″ × 1″ appears to be a commentary on the section Śabdālaṅkāra of Sāhityadarpaṇa. The next three leaves (9″ × 1½″) embody certain ślokas from the Naiṣadha.

---

## ॥ काव्यप्रकाशटीका (प्रकाशिका) ॥

## No. 1167 A. KĀVYAPRAKĀŚAṬĪKĀ (Prakāśikā).

Substance—Paper. Size—13½″ × 8½″. Pages—160.

20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1800. Incomplete.

Owner—C. O.

Subject—An elaborate commentary on the Kāvya-prakāśa.

Beginning :

श्रीः । काव्यप्रकाशव्याख्या

श्रीणामुदारः श्रीकान्तः श्रियं दिशतु मे प्रभुः ।
यस्याहुरीक्षणमिदं विश्वं नैगमसूक्तयः ॥

उपास्य विदुषो वृद्धानज्ञो यज्ञेश्वराह्वयः ।
व्याख्यां काव्यप्रकाशस्य विदधाति यथामति ॥

ग्रन्थारम्भ इत्यादि । सदाचारप्रमाणकेष्टदेवतानमस्कारः कारिकार्थ इति । ग्रन्थः प्रारभ्यमाणं प्रकरणम् । ग्रन्थग्रहणं सरस्वत्यास्समुचितदेवतात्वद्योतनाय । समुचितेति । अधिकृतेत्यर्थः । भारत्याश्चाधिकृतत्वं तत्प्रसादैकलभ्यस्य काव्यस्यात्राभिधेयत्वात् । अभिधायकस्य प्रकरणस्यापि वाङ्मयरूपत्वात् । परामृशति अनुसन्दधाति ।

End :

उभयत्रापीति । अनङ्गरङ्गप्रतिममिति मूर्ध्नामुद्वृत्तेत्यादि च । केचिदित्युद्भटादयः। वैदर्भीगौडीत्यादिरीतीनां विदर्भादिषु देशेषु

दर्शनात् तत्तत्समाख्या । यदाह वामनः—"विदर्भादिषु दृष्टत्वात् तत्तत्समाख्या" इति। शाब्दस्त्विति शब्देन वर्णं व्यावर्तयति। तात्पर्यशब्देनान्वयरूपो वाक्यार्थो गृह्यते स इति लाटेति । शाब्दोऽनुप्रासो लाटानुप्राससंज्ञ इत्युद्देश्योपादेयतया द्वयीरूपादाने सत्यपि विधेयतया ।

Colophon :

Author—Yajñeśvarabhaṭṭa.

Remarks—This transcript contains eight Ullāsas complete and a portion of the 9th.

---

## ॥ काव्यप्रकाशटीका (प्रकाशिका) ॥

## No. 1167 B. KĀVYAPRAKĀŚAṬĪKĀ (Prakāśikā).

C. O. L. No. 190 B.

Substance—Paper. Size—11″ × 8½″. Pages—44. 20 lines per page and 28 letters per line. Script—Devanāgarī. No. of Granthas—775.

Owner—C. O.

Subject—Same as No. 1167 A.

Beginning :

नवमोल्लासः ।

गुणालङ्कारयोरभेदस्य अनिराकरणे तद्वचनेनैव अलङ्कारकथन-स्यापि सिद्धत्वात् पृथग्वचनं न कर्तव्यं स्यात् । तस्मिंस्तु कृते भेदे न वक्तव्या इति तेषामिदानीमवसर इत्याह—गुणविवेचन इति। सम्प्रतीत्यादि—शब्दस्य प्राधान्यादुद्देशक्रमानुरोधाच्चेत्यभिप्रायः। नारीणामित्यादि । नारीणां कान्तानां शत्रूणां च। वामानां प्रतिकू-लानां स्त्रीणां च । हितकृत् हितच्छेत्ता तत्कारी च। बलाभावो दौर्बल्यं बलासुराभावश्च ।

दारुणा काष्ठेन वृक्षेण च । त्रयो गुणाः सत्त्वरजस्तमांसि यस्याः प्रकृतिः सा ।

नेष्यतीत्यादि--नायिकया पूर्वमागमने निषिद्धे सख्या तत्प्रतिषि-ध्य काक्वा विधिरेव स्थाप्यत इति वाक्यस्यान्यथायोजनम् ।

End :

अत्र धर्मभानुतनयत्वादीनां शीतलत्वादीनां च धर्मिणा भिन्ना-धारतया विरोधोक्तेः स च न सम्भवति । एकाश्रतयैवं तस्योपपत्तेः अन्यथातिप्रसङ्गात् । यदापि तस्य ... .... ..... .... .... .... मेषान्नानात्वं प्रतीयते, अयं च विरोधः शब्द एवेष्यते। तथा च .... .... .... .... .... .... .... .... .... .... ग्रन्थकृता च केनापि कारणेनायं ग्रन्थोऽसमाप्तः, पश्चादन्येन पूरितावशेषः, सङ्घटनाकौशलादेककर्तृकवदवभासत इत्यर्थान्तरं च ध्वन्यते भद्रम् ।

Colophon:

यज्ञेश्वरेण रचिता बहुदर्शिनेयं
काव्यप्रकाशगहनाम्बुधियानपात्रम् ।
समस्ततन्त्रार्थनिवेशरम्या
प्रकाशिकाख्या विवृतिर्गभीरा ॥

अन्यूनानधिका त्वेषा सुमनोनिर्मिता शुभा ।
आचन्द्रतारकं भूयाद्विदुषां कर्णमञ्जरी ॥

इति यज्ञेश्वरभट्टारकविरचितायां काव्यप्रकाशव्याख्यायां दशम उल्लासः ।

Author—Yajñeśvara Bhaṭṭāraka.

Remarks—This transcript comprises Ullāsas 9 and 10 only.

---

## ॥ काव्यप्रकाशव्याख्या (उत्तेजिनी) ॥

## No. 1168. KĀVYAPRAKĀŚAVYĀKHYĀ (Uttejinī).

C. O. L. No. 26.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Leaves—651.

10 lines per page and 20—22 letters per line. Script—Devanāgarī. No. of Granthas—7800. Incomplete.

Owner—C. O.

Subject — Elucidative exposition of the Kāvyaprakāśa.

Beginning :

॥ श्रीः ॥

मायामोमुह्यमानद्रुहिणहरहरिद्रक्षके यत्र धीरा
मोमुह्यन्ते मुकुन्दे प्रणिहितमनसो दुर्वचानन्दसिन्धौ ।
वेदान्ताशंक्यशंकेरितचरितगुणे संगमास्थानरङ्गे
तुंगे तेष्टीयमाने महति मम परा भक्तिरत्राविरस्तु ॥

विश्वेन्द्रजालशिखिपिञ्छकटाक्षलीलो
मन्दाकिनीसमकरन्दपदारविन्दः ।
कान्तः श्रियः कमपि कामपिता करोतु
कल्याणपूरममलो भगवान् मुकुन्दः ॥

रामेणेव गुणाकरेण महता वंशो रघोः श्रीमता
कृष्णेनेव यदोरशेषजगतोराधारतामश्नुता ।

श्रीकाञ्चीशितुरन्वयोऽवनितले पुण्येन येनाधुना
धत्ते सर्वकुलोत्तमत्वममलो भातीह सोऽयं रविः ।

विराट्च्छ्वेतच्छत्रप्रसृमरयशालेखरमणी-
जनाभीष्टश्रेयोवितरणभुजादण्डमहिमा ।
मिथोंकूरक्षीरार्पणभरितदानव्यसनित-
स्वरुर्वीरुड्धेनू रविधरणिपालो विजयते ॥

संगीतागमपारगो वितरणी साहित्यसौहित्यभूः
शूरस्सज्जनरक्षणैकनिपुणः श्रीमान् रविक्ष्मापतिः ।
यस्तस्य स्वसुरात्मजोऽखिलसुधीजागद्यमानप्रथा-
शाली यो भुवि वीरकेरळधराजानिः स जेगीयते ॥

नृपस्स वीरकेरळोऽरिकेळिपश्यतोहर-
प्रतापशोभमानमानवेन्द्रवृन्दशेखरः ।
कदाचिदागतो मुकुन्दवन्दनाय संगम-
स्थले निरङ्कचन्द्रबिम्बसुन्दराननः सुधीः ॥

तुण्डीरक्षितिमण्डलमण्डनकाञ्चीपुरादिहायातम् ।
वेदान्तदेशिकं बुधमैक्षत दिक्कूलमुद्रुजसमज्ञम् ॥

मंगलसंगमरंगे तं गुरुमवलोक्य वीरकेरळराट् ।
स्मितराञ्जितमुखमण्डलिवचनं रचनामनोहरं न्यगदत् ॥

विद्वज्जनमकुटीमणिरञ्जितचरणाब्जनखरगम्भीर! ।
वाग्देवतावतार त्वं शृणु वचनं समस्तलोकहितम् ॥

तौदादिक(?)नैयायिकवैयाकरणादिवादिसिद्धान्तैः ।
दुरधिगमस्य विधेहि व्याख्यां काव्यप्रकाशस्य ॥

आलंकारिकवाचोयुक्तिन्यायानुसारिणीं ललिताम् ।
व्याचिख्यासां दधतीं टीकामाधेहि पिपठिषां विदुषाम् ॥

इत्थं निदेशतस्तस्य राज्ञो वेदान्तदेशिकः ।
प्रकाशोत्तेजिनीं नाम टीकामाधातुमुद्यतः ॥

वसुन्धराकलिततपोधनपुरन्दरेण सनन्दनावतारेण योऽयमस्तूयत—

यच्छास्त्रं येन सम्यक् पठितमुरुदृढं पाठितं वाग्विधेयं
क्लृप्तं तत्रैव तस्य प्रतिभटकरिणो गर्वभङ्गं वितन्वन् ।
नानातन्त्रस्वतन्त्रश्चरति बुधजनास्वाद्यगम्भीरसूक्ति-
र्वेदान्ताचार्यसिंहो विसृमरसुयशःकेसरं केरळोर्व्याम् ॥

तथैव महाकविमन्त्रवादिशिखामणिना वामनभूसुरेणापि प्राशंसि—

वेदान्ताचार्यसूर्योदयमनु समभूत् साधुचक्रप्रहर्षो
दुर्लोकोलूकपूगः समजनि विगतालोकहृच्छोकमूकः ।

विद्याध्वन्यध्वनीना भुवि फलितदृशः स्वैरसञ्चारदक्षाः
दिक्षु द्राक् क्षुद्रभासो मतिरयमधुना प्राप्य सत्तामसत्ता(?)॥

इति स तादृशः

भारद्वाजान्वयाम्भोनिधिजननजुषः श्रीनिवासाध्वरीन्दोः
सञ्जातः सर्वविद्याजलधिकलशजः श्रीनृसिंहानुजो यः ।
श्रीवश्रीराजसिंहा.....निलयसुधीचक्रवर्ती बुधोऽसौ
वेदान्ताचार्यनामा रचयति विवृतिं व्यक्तकाव्यप्रकाशाम् ॥

काव्यप्रकाशेऽलङ्कारमीमांसान्यायमांसले ।
व्याचिख्यासोज्जिहीते मे तर्कोपक्रमकर्कशे ॥

कवितार्किकसिंहस्य प्रतिवादिभयङ्करस्य सर्वगुरोः ।
करुणा पराङ्कुशमुनेस्सरणावेतस्य शरणयतु मे ।

इह खलु समाप्तिकामो मङ्गलमाचरेदिति श्रुतिप्रसिद्ध्या वैदिकात्सङ्गात् कर्मणः फलावश्यम्भाव इति समग्राङ्गमङ्गलानुष्ठानस्यान्वयव्यतिरेकाभ्यां सहकृतेन विघ्नध्वंसद्वारा समाप्तिनिष्ठकार्यतानिरूपितकारणताश्रयत्वस्य प्रत्यक्षेणाप्यवधृतत्वेन प्रारिप्सितारम्भे निखिलशिष्टानुष्ठीयमाणमङ्गलाचारात्मकं स्वव्युत्पिपादयिषितसर्वाङ्गीणभृङ्गारभङ्गितरङ्गितनवव्यङ्ग्यपरम्पराकरम्बितकाव्यपरार्धनिर्माणालङ्कर्मीणकटाक्षवीक्षणजगदुत्पत्त्यादिविचक्षणपुरुषधौरेयज्ञानशक्ति -- स्वरूपधेय(?)वाग्देवतानुसन्धानं ग्रन्थकारस्तन्तनीति--नियतीति---

End :

यत्रेति । लहरीपरीवाहतरङ्गरेखा तद्वच्चलाः चञ्चलाः दृशो यासां ताः । यत्र पुंसि तत्रैव पतन्तीति यत् तस्माद्धेतोरित्यर्थः । स्मर आसामग्र(त एव धा)वति सत्यमित्यन्वयः । अत्र स्मरस्याग्रतो धावनं साध्यम् । भ्रूव्यापरणविषये बाणनिपतनं साधनम् । ननु सूत्रवृत्त्योः क्रमवैपरीत्यमनुपपन्नमित्यत आह—स...युक्तसाध्यसाधनपौर्वापर्यविपर्ययनिबन्धनो भेदः न वैचित्र्यावह इति । न सूत्रक्रमेण वृत्तिक्रमो दर्शित इति भावः । वैचित्र्येणोदाहरणान्तरं यथा—

Colophon :

इति श्रीसर्वतन्त्रस्वतन्त्रदुर्वादितूलवातूलपञ्चमतीभञ्जनवैष्णवराद्धान्तप्रतिष्ठापकश्रीवेदान्ताचार्यविरचितायां सर्वटीकाविभञ्जिन्यां काव्यप्रकाशटीकायां प्रकाशोत्तेजिन्यां नवम उल्लासः ।

Author—Śrī Vedāntacārya.

Remarks—The Ms. contains several Ullāsas in fragments. The introductory portion indicates that the author was born in Bhāradvājakula and that his father was Śrīnivāsādhvari. He was a dependent of King Ravi. Several laudatory verses about his patron occur in the course of the work. Again the subjoined

closing lines of the first Prakāśa disclose the titles of this commentary as Ravirājayaśobhūṣaṇam and Prakāśottejinī.

इति श्रीभारद्वाजकुलजलधिकलानिधिगोपपुरोपकण्ठहंसगमनाम्बिकानिवासगुरुशरग्रामाधिराजकृतगंगाधिराजस्नानाग्निष्टोमादिनित्यान्नदानसरस्वतीसहोदरश्रीनिवासाध्वर्युवरतनयसर्वज्ञनृसिंदेशिकसहजवाग्देवतावरप्रसादाधिगतचतुर्विधकवित्वषट्भाषासाम्राज्यसिंहासनतर्कविद्याभिनवगौतमप्राभाकरसरणिप्राभाकरशाब्दिकशिखामणिध्वनिमार्गाध्वनीनदुर्वादिगर्वतूलवातू (ल) सर्वतन्त्रस्वतन्त्रश्रीवेदान्ताचार्यकृतौ रविराजयशोभूषणे सर्वटीकाविभञ्जिन्यां प्रकाशोत्तेजिन्यां काव्यप्रकाशटीकायां प्रथम उल्लासः ॥

---

## ॥ काव्यप्रकाशव्याख्या (उत्तेजिनी) ॥

## No. 1169. KĀVYAPRAKĀŚAVYĀKHYĀ (Uttejinī)

C. O. L. No. 564.

Substance—Palm leaf. Size—19″ × 2″. Leaves—124. 9—10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—4700.

Owner—Śaṅkaranārāyaṇa Piḷḷai Avl., Mānnār.

Subject—Same as No. 1164.

Beginning :

निरूप्य षड्भिरुल्लासैर्भेदान् काव्यस्य धर्मिणः ।
चतुर्भिरथ धर्माणां विदधाति निरूपणम् ॥

इह खलु 'तददोषा'वित्यादिना निरूपितनिर्दोषगुणालङ्कारकाव्यस्वरूपस्य दोषाभावादिविशेषज्ञानाधीनज्ञानतया दोषाभावगुणालङ्काराणामवश्यनिरूपणीयत्वेन दोषाभावज्ञानस्यापि प्रतियोगिरूपदोषज्ञानाधीनत्वमिति काव्यस्वरूपनिरूपणानन्तरमुपोद्घातसङ्गत्या सामान्यविशेषलक्षणाभ्यां दोषान् निरूपयतीत्याह—

End :

इत्येष इति । निरूपणप्रकारभेदेऽपि ध्वनिमार्ग एव यद्विदुषां प्रतिभासनम् । नैतच्चित्रं अमुष्य प्रतिभासनस्य सम्यक् न्यायानुसारेण विनिर्मिता शास्त्रसङ्कटनैव हेतुः । अतः स्वात्मनि न बहुमानावकाश इति सूचितम् । इति सर्वं निरवद्यम् ।

Colophon :

समस्तविघ्नशमनं सङ्गमेशकराब्जकम् ।
दयितं विदुषां कुर्याद् दर्शनं नः सुदर्शनम् ॥

यो नैयायिकशाब्दभाट्टसरणीनाडिन्धमत्वं ? जनो
ध्वन्यध्वन्यतुलाध्वगत्वमपिचालङ्कारतत्त्वस्थितिम् ।
उल्लेखान्तरचातुरीं परमदच्छेदैकधौरन्धरीं
लब्धुं वाञ्छति सोऽत्र खेलतु कृताचाचार्यमौलेः सुखम् ॥

श्रीरामक्षितिपानुजस्त्रिजगतिख्यातोऽसि मल्लाभिधो
यो वै मानवपारिजात इति यः श्रीकृष्णपादाम्बुजे ।
भक्त्या नूतनदेवरात इति यो लीलाहरिश्चन्द्र इ-
त्याख्यातो रविमेदिनीपतिरयं जीयादिहायुः शतम् ॥

इति श्रीमद्भारद्वाजकुलजलधिकलानिधिगुरुशरग्रामाधिराजकृतगङ्गास्नानाग्निष्टोमानित्यान्नदानसरस्वतीसहोदरश्रीनिवासाध्वरिवरतनयसर्वज्ञनृसिंहदेशिकसहजसर्वतन्त्रस्वतन्त्रषड्भाषाकविशेखरतर्कविद्याभिनवगौतमश्रीवेदान्ताचार्यविरचितायां सर्वटीकाविभञ्जिन्यां काव्यप्रकाशोत्तेजिन्यां दशम उल्लासः ।

Author—Śrī Vedāntācārya.

Remarks—The manuscript contains Ullāsas 7—10.

---

## ॥ काव्यप्रकाशव्याख्या (उत्तेजिनी) ॥

## No. 1170. KĀVYAPRAKĀŚAVYĀKHYĀ.

(Uttejinī).

C. O. L. No. 328.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—201
7—8 lines per page and 44 letters per line
Script—Malayāḷam. No. of Granthas—400.

Owner—Kumārasvāmi Nampūdiripādu, Cennāsumana, Kunnattunāḍ.

Subject—A clear and elucidatory commentary on the Kāvyaprakāśa.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्यामा संगमराजस्य
शरीरद्युतिमञ्जरी ।
अञ्जनश्रीरपूर्वेय-
मस्तु संविद्दृशोर्मम ॥

प्रभेदान् ध्वनिकाव्यस्य
प्रतिपाद्य सविस्तरम् ।
गुणीभूतव्यङ्ग्यभेदान्
वक्तुं प्रक्रमते स्फुटम् ॥

अत्र ध्वनिगुणीभूतव्यङ्ग्यचित्राणां लक्षणक्रमेणैव लक्ष्याणामपि सप्रभेदप्रपञ्चनं युक्तमिति संगतिप्रदर्शनापेक्षाराहित्येऽपि ध्वनिविषयरसादिप्राधान्यस्याप्राधान्यापेक्षकत्वेन 'प्रधानेऽन्यत्र वाक्यार्थे, यत्रांगन्तु रसादयः' इत्यादिना प्राधान्यस्य प्रतिपाद्यमानतया

ततोऽयमन्तरंगतया प्राप्तावसर इति गुणीभूतव्यङ्ग्यकाव्यविशेषस्यान्तरङ्गसंगतिमुल्लिङ्गयति ।

End :

अत्र पद्ये हि एकस्मिन् एकस्मिन् तनुवपुरित्यत्र तनुशब्दे नखरनख इत्यत्र नखरशब्दे तेजोधामेत्यत्र धामशब्दे मद इति शब्दोऽपि हरिशब्दजिष्णुशब्दे च कृशानु(?)ग्रन्थानोत्सव(?)सिंहजयशीलैः क्रमेण परिवर्तिते पुनरुक्तवत् प्रतिभानरूपालङ्कारो नास्तीति शब्दाश्रय इति भावः । कुञ्जररक्तयोस्तु नागशोणितशब्दाभ्यां परिवर्तयितुं शक्यत्वादिति ध्येयं अपरस्मिंस्त्विति । वपुर्नखतेज इन्द्राणामेकस्मिन् सर्वस्मिन् वा देहकररुहकान्तिसुरराजैः क्रमेण परिवर्ति...,..

Colophon :

असारैरिह किं भूरिविचारैः सुधियांवराः ।
काव्ये रसोचितगुणेयतध्वं व्याकृताध्वना ॥

इति श्रीसर्वतन्त्रस्वतन्त्रषड्भाषाकविसार्वभौमश्रीवेदान्ताचार्यविरचितायां सर्वटीकाविभञ्जिन्यां प्रकाशोत्तेजिन्यां काव्यप्रकाशटीकायां अष्टम उल्लासः ।

गुरुपादसरोजन्मप्ररूढो रेणुसञ्चयः ।
निर्मलीकुरुतान्नित्यं मन्मनोमाणिदर्पणम् ॥

Author—Śrī Vedāntācārya.

Remarks—This Ms. comprises Ullāsas 5—9. But the 9th Ullāsa is short of about ten granthas. The letters are quite legible.

---

## ॥ काव्यप्रकाशव्याख्या (साहित्यदीपिका) ॥

## No. 1171. KĀVYAPRAKĀŚAVYĀKHYĀ (Sāhityadīpikā).

C. O. L. No. 143.

Substance — Paper. Size—14″ × 9″. Pages — 45. 20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—1050. Incomplete.

Owner—C. O.

Subject—Kāvya and its characteristic qualities.

Beginning :

स्तनन्धयसुधाधामधाम्ने धाम्ने भ्रुमन्यवे ।
एकतोऽन्यत्र कण्वादिदारिणे दारिणे नमः१ ॥

न ते टीकाकाराः परिगलद्विद्यान्धतमसं
 प्रमेयं शास्त्राणां प्रतिफलति येषां न मतिषु ।
न टीकास्ता यासां विलसितमनालोकविषयान्
 गभीरान् शब्दार्थान् गमयति न सिद्धाञ्जनमिव ।

टीकाः काव्यप्रकाशस्य कामं सन्तु परःशताः ।
किं ताभिः सुगमग्रन्थमात्रव्याख्यानचञ्चुभिः ॥
यद्यस्ति तत्र सारांशः सोऽपि संगृह्यते मया ।
तेन टीकान्तरालोककौतुकं त्यज्यतांतमाम् ॥

साहित्यदीपिका नाम टीका भास्कर... ...नुना ।
मधूद्वहानां काव्यानां तेजनीयं विरच्यते ॥

इह तावदादिमेन श्लोकेन नमस्कारस्य वा प्रेक्षावत्प्रवृत्तेरङ्ग-भूतस्य प्रयोजनस्य वा काव्यलक्षणस्य वा प्रातिपादनं युज्यते; न पुनः सर्वोत्कर्षेण वृत्तेः। तदयं नियतिकृतेत्यादेरुपन्यासो न सङ्ग-च्छते इत्याशङ्क्याह—ग्रन्थारम्भ इत्यादि ।

End :

अयं भावः पूर्वं दोषा वक्तव्याः । ततो गुणाः । पश्चादलङ्कारा इति परिपाटीवशेन नवमदशमयोरुल्लासयोः शब्दालङ्कारा वक्ष्यन्ते । इहोल्लासे तर्हि किं निरूपितम्। शब्दचित्रं वाच्यचित्रमिति भेदद्वयं प्रागेव निरूपितम् । सत्यं निरूपितम् । तदेवानूद्य तयोर्गुणप्रधान-

भावो निरूप्यते । केचिदर्थालङ्कारानेवावतिष्ठन्ते केचिच्छब्दालङ्कारानेवेति कथं भेदद्वयमित्यनुपपत्तौ तृतीयं मतमवातीतरम् ।

Colophon :

इति भास्करमिश्रविरचितायां साहित्यदीपिकायां काव्यप्रकाशटीकायां षष्ठ उल्लासः ।

Author—Bhāskaramiśra.

Remarks—This transcript comprises 6 Ullāsas. It is bound in two volumes.

---

## ॥ काव्यादर्शः ॥

## No. 1172. KĀVYĀDARŚA.

C. O. L. No. 1163.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—32. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 500.

Owner—Īśvaran Nīlakaṇṭhan Vārrier, Talavaḍivārriam, Ambalapuzha.

Subject—A commentary on the Kāvyādarśa.

Beginning :

हरिः ।

आवृत्तिमेव संघातगोचरां यमकं विदुः ।
तत्तु नैकान्तमधुरमतः पश्चाद्विधास्यते ॥

इति प्राक्प्रतिज्ञातं प्राप्तावसरं यमकं प्रदर्शयति अव्यपेतेत्यादिना । अव्यपेता वर्णसंहत्यन्तरेणाव्यवहिता आवृत्तिः पुनः पुनरुक्तिः वर्णसंहतेः अक्षराणां संघातस्य नत्वेकस्य द्वयोर्वा । आदिमध्यान्तगोचरं आदिश्चमध्यश्चान्तश्च यस्य गोचरः तत्तथोक्तं एकद्वीत्यादिना । यमकस्य भेदानाह—

End :

पूर्वनिर्दिष्टं शास्त्रं निगमयति—व्युत्पन्नबुद्धिरित्यादिना । विधिदर्शिते(न) चोदितेन गुणदोषयोर्वशवर्त्तिनीभिः गुणदोषविषयहानोपादानादिक्रियोपकरणभूता(भिः) धन्यः सुभगः रमते कीर्तिं च लभते । कवेः काव्यकरणस्य ऐहिकामुष्मिकसुखहेतुत्वमुक्तम् ।

Colophon :

इति यामुनेयविरचितायां काव्यादर्शटीकायां चतुर्थः परिच्छेदः । इति समाप्तं चैतद् यामुनम् । इति दण्डिव्याख्यायां यामुने चतुर्थः परिच्छेदः । इति दण्डिव्याख्या समाप्ता ।

Author—Yamunācārya.

Remarks—The codex opens with Yamakālaṅkāra and extends to the very end.

## ॥ काव्यादर्शटीका ॥

## No. 1173. KĀVYĀDARŚAṬĪKĀ.

C. O. L. No. 618.

Substance—Paper. Size—11″ × 8½″. Pages—114. 16—18 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—1200. Complete.

Owner—C. O.

Subject—Same as No. 1172.

Beginning :

करोतु कमलाकान्तः कल्याणं करुणाकरः ।
बुद्धिबोधकबोध्यात्मा प्रपञ्चोऽयं यदाश्रयः ॥

अथ दण्डिप्रणीतस्य विवृणोत्यर्थमादरात् ।
काव्यादर्शाभिधानस्य काव्यशास्त्रस्य यामुनः ॥

प्रबन्धादौ प्रयोक्तव्यामाचार्यैः सद्भिराशिषम् ।
प्रायुङ्क्त दण्डी पद्येन चतुरित्यादिना स च ॥

चित्ते सरोविशेषे च मानसाख्या प्रयुज्यते ।
शुक्लशब्दश्च निर्दोषे श्वेतवर्णे च वस्तुनि ॥

हंसी जलचरी तस्या रतियुक्तेव मानसे ।
अंभोजेषु च तत्प्रीतेर्दैर्घ्यमाशास्यमत्र तु ॥

काव्यस्वरूपजिज्ञासुजनचित्तानुवर्तनम् ।
पूर्वशास्त्राणि संहृत्येत्यादिना सोऽकरोत् सुधीः ॥

अत्र लक्षणशब्देन ज्ञापकं शास्त्रमुच्यते ।
नो चेत् क्रियत इत्येतदमुना स्यादनन्वितम् ॥

कालिदासादिकविजनप्रयुक्तान् रघुवंशादिकाव्यप्रयोगानुपलक्ष्य तत्स्वरूपनिरूपणलक्षणप्रतिपादकानि काश्यपप्रभृत्याचार्यविरचितानि बहूनि शास्त्राणि विस्तरग्रहणाशक्तबालजनसुग्रहत्वाय संहृत्यास्माभिर्यथासामर्थ्यं काव्यलक्षणं क्रियते ।

End :

अथाचार्यः स्वारब्धं शास्त्रमुपसंजिहीर्षुरुक्तमर्थजातमनुवदन् अतिशब्दार्थालङ्क्रिया इत्यादिना गुणदोषान्, अशास्त्रज्ञः इत्यादिना पूर्वनिर्दिष्टं शास्त्रं निगमयति—व्युत्पन्नबुद्धिरित्यादिना ...विधिदर्शि (तेन)...चोदितेन गुणदोषयोर्वशवर्तिनीभिर्गुणदोषविषयहानोपादानादिक्रियोपकरणभूता(भिः) .... .... धन्यः सुभगः रमते कीर्तिं च लभते, इत्यादि कवेः काव्यकरणस्य ऐहिकामुष्मिकसुखहेतुत्वमुक्तम् ।

Colophon :

इति यामुनेयविरचितायां काव्यादर्शटीकायां चतुर्थः परिच्छेदः ।

इति समाप्तमेतद् । इति दण्डिव्याख्यायां यामुने चतुर्थः परिच्छेदः । श्रीदण्डिव्याख्या समाप्ता ।

Author—Yāmuneya.

Remarks :

## ॥ काव्यादर्शव्याख्या ॥

## No. 1174. KĀVYĀDARŚAVYĀKHYĀ.

C. O. L. No. 1801.

Substance—Palm leaf. Size—6″ × 1½″. Leaves—89. 9 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Owner—Kūḍallūr Brahmadattan Nambūdiri.

Subject etc.—Same as No. 1173.

Remarks—The work is complete. The Ms. is in good condition and the letters clear and beautiful.

---

## ॥ काव्यादर्शटीका ॥

## No. 1175 A. KĀVYĀDARŚAṬĪKĀ.

C. O. L. No. 1862 A.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—87. 8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas — 260. Complete.

Owner—Kūḍallūr Brahmadattan Nampūdiri Avl.

Subject—A commentary on the Kāvyādarśa.

Beginning:

गणपतये नमः ।

मुरारेर्नाभिकमलाज्जातो यश्चतुराननः ।
ज्ञानं मे तत्प्रिया देयाद् विश्वशुभ्रा नु भारती ॥

लक्ष्मीवराहरूपः पायाद् वसुदेवनन्दनः कृष्णः ।
नीता वराहवपुषा समुन्नतिं येन वसुधेयम् ॥

अविघ्नेन शास्त्रसमाप्तिमभिवाञ्छन् चतुर्मुखेत्यादिना आशीर्द्वारेण वाग्देवतामभिष्टौति । चतुर्मुखो ब्रह्मा तस्य मुखान्यम्भोजानीव मुखानि मुखांभोजानि । 'उपमितं व्याघ्रादिभि' रित्यादिना समासः ।

End:

पुरा किलार्जुनेन राधवेधां तु(?) परिणीतां द्रौपदीमानीय पृथायै प्रादर्शि, हे अंबा मयोपलब्धेति । ततः किल कुन्त्याभिहितमेषा भिक्षा पञ्चभिरपि भुज्यतामिति । व्युत्पन्नबुद्धिरित्यादिना प्रकृतमुपसंहरति ।

व्युत्पन्नबुद्धिरमुना विधिदर्शितेन
मार्गेण दोषगुणयोर्वशवर्तिनीभिः ।
वाग्भिः कृताभिसरणो मदिरेक्षणाभि-
र्धन्यो युवेव रमते लभते च कीर्तिम् ॥

Colophon:

इति वादिधंकालविरचितायां दण्डिकाव्यालङ्कारटीकायां यमकप्रहेलिकाकाव्यदोषविभावनम् .... .... .... .... ॥

Author—Vādidhaṃkāla.

Remarks—The Ms. is in decaying condition. The name Vādidhamkāla seems to be a title rather than the name proper.

---

## ॥ काव्यादर्शटीका ॥

No. 1175 B. KĀVYĀDARŚAṬĪKĀ.

C. O. L. No. 1862 B.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—38. 8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1150.

Owner—Subject : Same as No. 1175.

Beginning—End : Same as No. 1173.

Author—Yāmuneya.

Remarks :

---

## ॥ काव्यादर्शव्याख्या ॥

No. 1176. KĀVYĀDARŚAVYĀKHYĀ.

C. O. L. No. 27.

Substance—Paper. Size—13½″ × 8½″. Pages—217. 19 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—3100.

Owner—C. O.

Subject—Same as No. 1173.

Beginning :

प्रथमः परिच्छेदः ।

प्रधानसंज्ञा विपक्षिता। मानसं मनः दिव्यं सरश्च । रमतामित्याशिषिलोट् । दर्धि रमतामित्यत्र क्रियायाः साध्यरूपत्वात् साक्षाद्विशेष्यत्वासम्भवाद् रमतामिति लोट्प्रत्ययार्थान्यथानुपपत्तिगम्यं भविष्यत्कालं द्वारीकृत्य क्रियाविशेषणत्वम् । ननु " शाब्देनैव शाब्दोऽन्वयः" इति स्थितेऽन्वयो बाध्येतेति चेन्न । शब्दतात्पर्यक्रोडीकृतोऽप्यर्थः शाब्द एव । अतस्तेनान्वयो भवत्येव ।

End :

व्युत्पन्नबुद्धिरमुना विधिदर्शितेन
मार्गेण दोषगुणयोर्वशवर्तिनीभिः ।
वाग्भिः कृताभिसरणो मदिरेक्षणाभि-
र्धन्यो युवेव रमते लभते च कीर्तिम् ॥

व्युत्पन्नबुद्धिरिति । विधिदर्शितेनामुना मार्गेण दोषगुणयोर्व्युत्पन्नबुद्धिस्ततो वशवर्तिनीभिर्वाग्भिः कृताभिसरणः, यथा वशवर्तिनीभिर्मदिरेक्षणाभिः कृताभिसरणो युवा रमते लभते च कीर्तिमिति ।

अधीतवेदसूत्रस्य मीमांसाव्याक्रियाविदः ।
केशवस्य कलाज्ञस्य काव्यतल्लक्ष्मवेदिनः ॥

यावत् पद्मभवः पुनः पुनरिदं स्रष्टा समस्तं जगद्
यावद्व्योम्नि परे पुराणपुरुषःसाम्राज्यमातिष्ठते ।
यावद्धारयते शशाङ्कशकलापीडः शरीरे प्रियां
कुर्यात् तावदियं कृतिर्हृदि सतां मुक्तावलीविभ्रमम् ॥

Colophon :

इत्याचार्यदण्डिनः कृतौ काव्यादर्शे शब्दालङ्कारदोषविभागो नाम तृतीयः परिच्छेदः ।

इति महाराजाधिराजश्रीरामनाथनरेन्द्रवन्दितचरणारविन्दमहोपाध्यायतरुणवाचस्पतितनूजन्मना केशवभट्टारकेण विरचिते काव्यादर्शतात्पर्यनिरूपणे तृतीयः परिच्छेदः ।

समाप्तोऽयं ग्रन्थः ।

Author—Keśavabhaṭṭāraka.

Remarks—The first Fol. has been lost. From the colophon it is clear that the author was the son of Taruṇavācaspati revered by the king Śrī Rāmanātha.

---

॥ काव्यालङ्कारः ॥

No. 1177. KĀVYĀLAṄKĀRA.

C. O. L. No. 2472.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1''$. Leaves—41.

5 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas — 450. Incomplete.

Owner—Valia Rāja of Iḍappaḷḷy.

Subject—Divisions of Kāvya, nature of Rasa etc.

Beginning :

गणपतये नमः ।

कुन्देन्दुकुमुदस्पर्धिशुभ्रविभ्रमदेहिनि ।
सरस्वति नमस्तेऽस्तु शब्दब्रह्मस्वरूपिणि ॥

शृङ्गारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे
बीभत्सोऽस्थिभिरुत्फणी च भयकृन्मूर्त्याद्भुतस्तुङ्गया ।
रौद्रो दक्षविमर्दने हसनकृन्नग्नः प्रशान्तश्चिरा-
दित्थं सर्वरसाश्रयःपशुपतिर्भूयात् सतां भूतये ॥

आख्यातनामरचनाचतुरश्रसन्धि-
सद्भावत्वलंकृतिगुणं सरसं सुवृत्तम् ।
आसेदुषामपि दिवं कविपुङ्गवानां
तिष्ठत्यखण्डमिह काव्यमयं शरीरम् ॥

काव्ये शुभे विरचिते खलु नो खलेभ्य
... ...गुणो भवति यद्यपि संप्रतीह ।
कुर्यां तथापि सुजनार्थमिदं प्रयत्नाद्
यूकाभये ... .... नहि मोक्षणं स्यात् ॥

सानन्दप्रमदाकटाक्षविशिखैर्येषां न भिन्नं मनो
... ... सारसमुद्रपातविधुरेष्वन्येषु पोतायितम् ।
यैर्निस्सीमसरस्वतीविलसितं द्वित्रैः पदैः संहितं
तेषामप्युपरि स्फुरन्ति मतयः कस्यापि पुण्यात्मनः ॥

प्रायो नाट्यं प्रति प्रोक्ता भरताद्यै रसस्थितिः ।
यथामति मयाप्येषा काव्यं प्रति निगद्यते ॥

End :

मुग्धा त्वं सुभगे! न वेत्सि मदनव्यापारमद्यापि त-
न्नूनं तेऽब्जदलैषिणायमलिना दष्टो न भर्त्राधरः ।
सख्येत्थं हसितं वधूं प्रति तथा सानन्दमाविर्भव-
द्वक्त्रान्तर्घनशीधुगन्धरसिकैर्भृङ्गैर्यथा धावितम् ॥

त्यक्त्वा गुञ्जफलानि मौक्तिकमयीभूषा स्तनेष्वाहिता
स्त्रीणां कष्टमिदं कृतं कुवलयं कण्ठे न बर्हिच्छदः ।
इत्थं नाथ! तवारिधाम्नि शबरैरालोक्य चित्रस्थितिं
बाष्पार्द्रीकृतलोचनैः स्फुटरवं दासैः समं हास्यते ॥

अस्मिन् सखीकराघातनेत्रोल्लासाङ्गवर्तनम् ।
नासाकपोलनिष्यन्दो मुखराग .... .... .... ॥

Colophon :

इति रुद्रटकृते शृङ्गारतिलके द्वितीयःपरिच्छेदः ॥

इति रुद्रटकृते काव्यालङ्कारे शृङ्गारतिलके प्रथमः परिच्छेदः ॥

Author—Rudraṭa.

Remarks — This Ms. comprises only two Paricchedas.

---

## ॥ काव्यालङ्कारः ॥

### No. 1178. KĀVYĀLAṄKĀRA.

C. O. L. No. 313.

Substance—Paper. Size—13″ × 8½″. Pages—72. 12 lines per page and 16 letters per line. Script—Grantha. No. of Granthas—442. Complete.

Owner—C. O.

Subject—Poetics.

Beginning, End—Same as No. 1357, DCSMMPL.

Colophon :

इति श्रीभामहालङ्कारे षष्ठः परिच्छेदः ।

षष्ठ्या शरीरं निर्णीतं शतषष्ठ्या त्वलङ्कृतिः ।
पञ्चाशता दोषदृष्टिः सप्तत्या न्यायनिर्णयः ॥

षष्ठ्या शब्दस्य शुद्धिः स्यादित्येवं वस्तुपञ्चकम् ।
उक्तं षड्भिः परिच्छेदैः भामहेन क्रमेण वः ॥

शिवं भूयात् ।

Author—Bhāmaha.

Remarks—About 30 leaves have been injured partly by rats. The work has been published at Bombay.

---

## ॥ गोदवर्मयशोभूषणम् ॥

No. 1179. GODAVARMAYAŚOBHŪṢAṆAM.

C. O. L. No. 164.

Substance—Palm-leaf. Size—8″ × 1½″. Leaves—66. 7—9 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—850.

Owner—Subrahmaṇyan Mūttatu Avl., Puttiyil, Harippād.

Subject—Same as No. 1178.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

कल्याणं कलयन्तु भूरि शिवयोः कल्याणवेद्यां मिथो-
लज्जाकूतदरोदयादसकलं पर्यायतः पश्यतोः ।
फुल्लेन्दीवरपुण्डरीकरुचिभिर्नीलामलार्धवपुः
कुर्वद्भिस्समभावि भाविचरितं यैस्ते कटाक्षाङ्कुराः ॥

अपि च—

अङ्के पङ्केरुहस्य प्रतिवसति विधिर्यस्य नाभीसरस्याः
पर्यङ्के यः फणीन्द्रे भजति परिमिते प्रायशो योगनिद्राम् ।
सोऽयं हस्तारविन्दस्फुरदलिनलिनो भार्गवभूमिसेव्य-
श्रेयः श्रीगोदवर्मक्षितिरमणमणेरावहत्वम्बुजाक्षः ॥

वीणापाणिसरोजशोणनखरश्रीकोणवीणारव-
श्रेणीनिर्भरमाधुरीरसलसद्वाण्युद्गिरा यद्गिरः ।
सोऽयं सत्कविसम्मतोऽरुणगिरिश्रीगोदवर्मप्रभो-
रर्थालङ्कृतिमद्भुतां वितनुते हृद्यां यशोभूषणम् ॥

अथ शब्दालङ्कारादर्थालङ्काराणामभ्यर्हितत्वात् तत्रापि प्रथममनेकालङ्कारानुगतत्वादुपमालङ्कारो निरूप्यते—

End:

सम्पदा जितनिलिम्बवासभू-
र्बिम्बलाधिपतिजम्भशासितुः ।

मण्डयन्ति किल मान्दिराजिरं
गन्धसिन्धुरगिरीन्द्रपङ्क्तयः ॥

अत्र गन्धसिन्धुरगिरीन्द्रपंक्तयः इत्यत्र गिरीन्द्रा इव गन्धसिन्धुरा इत्युपमा वा गन्धसिन्धुरा एव गिरीन्द्राः इति रूपकं वेतिसन्देहः । एकवाचकानुप्रवेशेन यथा—

मृदुस्मितसुधाशाली गोदवर्मनराधिपः ।
शरदिन्दुरिव श्रीमान् भाति बिम्बलपालकः ॥

अत्र मृदुस्मितसुधाशालीत्यत्र रूपकानुप्राणितसाधारणधर्मेणोपमारूपकयोरेकवाचकानुप्रवेशेन सङ्कर इति

Colophon :

इति श्रीमतो वेंकटाद्रिगुरुकृपावाप्तविद्यस्य कौण्डिन्यकुलसागरोदितस्य शेषाद्रिसूनोः विद्वन्मणेररुणगिरिकवेः कृतिः गोदवर्मयशोभूषणं नामार्थालंकारस्समाप्तः ।

Author—Aruṇagiri.

Remarks—The author belonged to the Kauṇḍinya-gotra and was the son of Śeṣādri and disciple of Veṅkaṭādri. He was also a dependent of King Godavarma.

## ॥ गोदवर्मयशोभूषणम् ॥

## No. 1180. GODAVARMAYAŚOBHŪṢAṆAM.

C. O. L. No. 81.

Substance—Paper. Size—14″ × 9″. Pages — 79. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—850. Complete.

Owner—C. O.

Subject—Same as No. 1178.

Beginning, End etc.— Same as No. 1179.

Author—Aruṇagiri.

Remarks :

---

## ॥ चन्द्रालोकः ॥

## No. 1181 A. CANDRĀLOKA.

C. O. L. No. 1993 A.

Substance—Palm-leaf. Size—$5\frac{5}{8}$″ × 1″. Leaves—26.

7 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 228.

Owner—C. O.

Subject—Rhetoric.

Beginning—Same as No. 1364, DCSMMPL.

End :

हेतुहेतुमतोरैक्यं हेतुं केचित् प्रचक्षते ।
लक्ष्मीविलासा विदुषां कटाक्षा वेङ्कटप्रभोः ॥

इत्थं शतमलङ्कारा लक्षयित्वा निदर्शिताः ।
प्राचामाधुनिकानां च मतान्यालोच्य सर्वशः ॥

चत्वारो रसवत्प्रेय ऊर्जस्वी च समाहितः ।
भावस्य चोदयः सन्धिः शबळत्वमिति त्रयः ॥

अष्टौ प्रमाणालङ्काराः प्रत्यक्षप्रमुखाः क्रमात् ।
एवं पञ्चदशान्यानप्यलङ्कारान् विदुर्बुधाः ॥

Colophon :

Author—Jayadeva.

Remarks—Only the text is embodied in this Ms. It is published along with the commentary, Kuvalayānanda, at N. S. P. B.

## ॥ गणितसङ्ग्रहः ॥

## No. 1181 B. GAṆITASAṄGRAHA.

C. O. L. No. 1993 B.

Substance—Palm leaf. Size—$5\frac{7}{8}'' \times 1\frac{1}{2}''$. Leaves—15. 9 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—169. Complete.

Owner—Same as No. 1181 A.

Subject—Gaṇita.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीगुरुभ्यो नमः ।

श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।

याताश्च मासा दिवसाश्च नाड्यः
स्वाभीष्टकालावधिकाः क्रमेण ।
भवन्ति राश्यंशकलाश्च भानो-
र्योग्यादिवाक्यं च कलासु कुर्यात् ॥

नीते च तत्तद्दिवसाष्टकोक्त-
योग्यादिवाक्याद्दिनभक्तलिप्ताः ।

कुर्यात्तदार्कस्फुटभुक्तिरेषा
स्याद्यज्ञरत्नादिवशाद्धनर्णम् ॥

End :

इष्टाद्बाहोर्यः स्यात्तत्स्पर्धिन्यां दिशीतरो बाहुः ।
त्र्यश्रे चतुरश्रे वा सा कोटिः कीर्तिता तज्ज्ञैः ॥

तत्कृत्योर्योगपदं कर्णो, दोःकर्णवर्गयोर्विवरात् मूलम् कोटिः ।
कोटिश्रुतिकृत्योरन्तरात् पदं बाहुः ॥

Colophon :

इति नवमः खण्डः ।

इति गणितसंग्रहः समाप्तः । शुभमस्तु ।

Author :

Remarks—The Ms. is divided into 9 Sections. Many topics on Gaṇita are dealt with herein.

---

## ॥ ज्योतिश्शास्त्रसङ्ग्रहभाषा ॥

## No. 1181 C. JYOTIŚŚĀSTRASAṄGRAHABHĀṢĀ.

C. O. L. No. 1993 C.

Substance—Palm leaf. Size—$5\frac{5}{8}'' \times 1\frac{1}{2}''$. Leaves—62.

35

7—9 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 620. Complete.

Owner—Same as No. 1181 A.

Subject—Astrology.

Beginning :

हरिः ।

श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।

ജ്യോതിശ്ശാസ്ത്രത്തെ സംഗ്രഹിച്ചു ചൊല്ലുവാൻതുടങ്ങുന്ന ആചാൎയ്യൻ അതിന്റെ വിഘ്നശാന്തിക്കായ്ക്കൊണ്ടു് ഇഷ്ടദേവതാ നമസ്കാരത്തെ ചെയ്യുന്നു. ശ്രീസൂൎയ്യാദിസൎവ്വഗ്രഹേഭ്യോ നമഃ. എന്നതുകൊണ്ടു ഇവിടെ സിദ്ധാന്തം, ഹോരാ, സംഹിതാ എന്നിങ്ങനെ മൂന്നു സ്കന്ധത്തോടുകൂടി ഇരുന്നൊന്നു് ജ്യോതിശ്ശാസ്ത്രം. അതിൽ ഗ്രഹഗതികളേയും കല്പാദികാലങ്ങളുടെ പ്രമാണത്തേയും ഗോളസംസ്ഥാനത്തേയും ഗ്രഹഗണിതത്തേയും പറയുന്നതു സിദ്ധാന്തം ആകുന്നതു. മുഹൂൎത്തത്തേയും ജാതകത്തേയും പ്രശ്നത്തേയും പറയുന്നതു ഹോരയാകുന്നതു. വർഷാദിനിമിത്തങ്ങളേയും അതിന്റെ ലക്ഷണങ്ങളേയും പറയുന്നതു സംഹിതയാകുന്നതു എന്നറിക.

End :

ഗതി രണ്ടു പ്രകാരമാകുന്നതു മദ്ധ്യമഗതിയും സ്ഫുടഗതിയും. അതിൽ മദ്ധ്യഗതിയെ ധൎമ്മഃ കളാൎദ്ധീ എന്നു തുടങ്ങി ഉള്ളതു

കൊണ്ടു കാട്ടി. സ്ഫുടഗതിയെ ജ്യാചാപംകൊണ്ടു സൂചിപ്പിച്ചു എന്നറിക. മാസവാക്യം തുടങ്ങി ഉള്ളവകൊണ്ടു കാലത്തെ കൂടെ സൂചിപ്പിച്ചു. മഹാജ്യാവു തുടങ്ങി ഉള്ളവകൊണ്ടു ഗോളത്തേയും സൂചിപ്പിച്ചു. ഇങ്ങനെ രണ്ടു ഭാഗംകൊണ്ടു സിദ്ധാന്തസ്കന്ധത്തെ സംഗ്രഹിച്ചു കാട്ടിയെന്നറിക.

Colophon:

इति ज्योतिःशास्त्रसङ्ग्रहभाषायां सिद्धान्तस्कन्धः समाप्तः ।

नमःशिवाय ।

Author:

Remarks—The Ms. is a commentary on Jyotiś-śāstrasaṅgraha in Malayāḷam. Siddhānta Skandha alone is embodied herein.

---

## ॥ गणितसङ्ग्रहः (भाषाव्याख्यायुतः)

### No. 1181 D. GAṆITASAṄGRAHA
with Malayāḷam commentary.

C. O. L. No. 1993 D.

Substance—Palm leaf. Size—$5\frac{5}{8}'' \times 1\frac{1}{2}''$. Leaves—[illegible]7

7—9 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 900. Complete.

Owner—Same as No. 1181 A.

Subject—Determination of Muhūrtas.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
श्रीगुरुभ्यो नमः ॥

അനന്തരം ഹോരാസ്കന്ധം ഉത്തരഭാഗംകൊണ്ടു് ചൊല്ലുന്നു. അവിടെ മുഹൂർത്തത്തിന്നു ശ്രൌതാദികർമ്മാംഗത്വം ഉണ്ടാകകൊണ്ടു പ്രാധാന്യമുണ്ടു്. അതുകൊണ്ടു മുഹൂർത്തത്തെ മുൻപിൽ ചൊല്ലുന്നു. അവിടെ എല്ലാ കർമ്മങ്ങളിലും വർജ്ജിക്കേണ്ടവററെ മുൻപിൽ ചൊല്ലുന്നു. അവിടെ ദോഷങ്ങളെ ഉദ്ദേശിക്കുന്നു. "ഉൽക്കോർവീ" എന്ന ശ്ലോകംകൊണ്ടും "ഉൽക്കാപാതെ" എന്നു തുടങ്ങിയുള്ള ശ്ലോകങ്ങളെക്കൊണ്ടും ദോഷലക്ഷണം തുടങ്ങിയുള്ളവ ചൊല്ലുന്നു.

End :

ഇതിന്റെ വിസ്താരം വരാഹസംഹിത തുടങ്ങിയുള്ള ഗ്രന്ഥങ്ങളിൽ ഉണ്ടെന്നറിക. ഇങ്ങനെ പല ഗ്രന്ഥങ്ങളിൽനിന്നും

റിക. ഇതെല്ലാം സജ്ജനങ്ങൾ വഴിപോലെ നിരൂപിച്ചു ബോധിച്ചുകൊള്ളണം. മത്സരംകൊണ്ടെങ്കിലും നിരൂപിയാതെയെങ്കിലും ദോഷത്തെ പറയുന്നവരെ സജ്ജനങ്ങൾ ശാസിച്ചുകൊള്ളണം. വസ്തുത ദോഷമുള്ളതു കളഞ്ഞു ശിക്ഷ വരുത്തിക്കൊള്ളുകയും വേണം. ഇതിനായിക്കൊണ്ടു വേദവേദാംഗപാരഗന്മാരായി സർവ്വശാസ്ത്രജ്ഞന്മാരായി ഇതരശാസ്ത്രനിപുണന്മാരായി ഊഹാപോഹകുശലന്മാരായി നിർമ്മത്സരന്മാരായി നീരാഗന്മാരായി ധർമ്മതത്ത്വബുദ്ധത്സ്വകളായിരിക്കുന്ന സജ്ജനങ്ങൾക്കായിക്കൊണ്ടു പിന്നെയുംപിന്നെയും ഭക്തിപുരസ്സരമാകുംവണ്ണം നമസ്കരിക്കുന്നു ഞാൻ.

Colophon :

नमो नीलकण्ठाख्यपितृव्यचरणेभ्यो गुरुभ्यो नमः ।

ഗണിതസംഗ്രഹത്തിന്റെ ഭാഷ കഴിഞ്ഞു.

Author :

Remarks—The colophon discloses that Nīlakaṇṭha was the author's uncle. Only the Horāskandha is embodied herein. The last two leaves contain certain details on Kranti jyā Gaṇādi jyā etc.

---

## ॥ दशरूपकटीका ॥

## No. 1182 A. DAŚARŪPAKAṬĪKĀ.

C. O. L. No. 1974 A.

13 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—2250. Complete.

Owner—P. Nīlakaṇṭha Iyer Avl., Maṅkompu.

Subject—The characteristics of the Sanskrit dramas.

Beginning etc.—Same as No. 1373 A, DCSMMPL.

Author—Dhanika.

Remarks—The commentary is named Avalokana.

---

॥ दशरूपकटीकाव्याख्या ॥

No. 1182 B. DAŚARŪPAKAṬĪKĀVYĀKHYĀ.

C. O. L. No. 1974 B.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaves—27. 13 lines per page and 40—48 letters per line. Script—Malayāḷam. No. of Granthas—1100. Complete.

Beginning:

हरिः श्रीगणपतये नमः अविघ्नमस्तु ।

क्वचन घटिते श्राह्ने मुण्डे सगद्गद्वेणिका
क्वचन भुजगश्वासैरुग्रैरनुक्षणनर्तिता ।
क्वचन रचितं रेखाचन्द्रं रयेण विधून्वती
स्मरहरशिरो गङ्गा मङ्गल्यमावहतु स्थिरम् ॥

दशरूपस्य या व्याख्या धनिकेन समीरिता ।
तस्य भट्टनृसिंहेन लघ्वी टीका विधीयते ॥

अविघ्नपरिसमाप्तिनमस्कारयोः फलफलिभावे सदाचारमेव प्रमाणी करोतीति वदंस्त्रयाणामपि गणेशविष्णुभरतानां नमस्कारप्रतिपादकतयैकार्थं श्लोकद्वयं युगपदेवोपपादयति ।

समाप्तिश्च—

End:

'साम भेदः प्रदानं चे'त्येवमादीनि सन्ध्यन्तराण्येकविंशतिः उपमादिष्वलङ्कारेषु च हर्षादिष्वन्तर्भावान्न पृथगुक्तानि ।

रम्यं जुगुप्सितमुदारमथापि नीच-
मुग्रं प्रसादि गहनं विदितं च वस्तु ।

यद्भाव्यवस्तु कविभावकभाव्यमानं
तन्नास्ति यन्न रसभावमुपैति लोके ॥

विष्णोः सुतेनापि धनञ्जयेन
विद्वन्मनोरागनिबन्धहेतुः ।
आविष्कृतं (मुञ्जम)ही(शगोष्ठी-
वै)दग्ध्यभाजा दशरूपमेतद् ॥

Colophon :

इति दशरूपावलोके ध(निक)कृते चतुर्थः प्रकाशः ।

तपस्य .... .... ....वसामस्सुरनदी.... ....
.... .... ....णोदारान्दारानुतपरिच.... .... ....
....श्शास्त्राणि .... .... ... न्न विदुः । किं कुर्मः ।

Author—Bhaṭṭanṛsimha.

Remarks :

---

## ॥ दशरूपकटीकाव्याख्या ॥

No. 1183 A. DAŚARŪPAKAṬĪKĀVYĀKHYĀ.

C. O. L. No. 616 A.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—46
7—8 lines per page and 58—62 letters per line

Script—Malayāḷam. No. of Granthas—1200. Incomplete.

Owner—Tekkumkūr Valia Tampuran Avl., Vyckom.

Subject—The different kinds of Rūpakās and their characteristics.

Beginning :

इति तदर्थः । तत्पदैस्तत्रत्यैरेव पदैः सं(क्षि)प्याञ्जसा क्रियते

... ... ... ... ... ... ...

तस्यार्थस्तत्पदैरञ्जसेति सूचितं चैतदाञ्जस्यं पूर्वत्र प्रगुणरचनयेति । ननु दशरूपकेष्वपीति हासादिवदसाधा .... त्वान्मन्दफलम् । सुलभं चैतदितिहासादिषु । यच्च वैदग्ध्यं फलमित्युक्तं तदपि मन्दफलमेव साक्षादफलत्वाच्च । वैदग्ध्यस्य ... .... .... मेव रूपकाणां लक्षणमिति पुनरपि तदवश्यमेवानारम्भणीयमित्याशंकायामाह —

आनन्दनिष्यन्दिषु रूपकेषु व्युत्पत्तिमात्रं (फलमल्पबुद्धिः) ।
योऽपीतिहासादिवदाह साधुस्तस्मै नमः स्वादुपराङ्मुखाय ॥

End :

अथ वीरः—

वीरः प्रतापविनयाध्यवसायशौर्य-
मोहाविषादनयविस्मयविक्रमाद्यैः ।
उत्साहभूस्स च दयारणदानयोगात्
त्रेधा किलात्र मतिगर्वधृतिप्रकर्षाः ॥

प्र(भावा?तापा)दिविभावकाः उत्साहस्थायिभावका(?) दयायुद्ध(दान)विभावनैस्त्रिधा मतिगर्वादिभिरनुभावितस्तैरेव व्यभिचारिभि-

विस्तारात्मा स्वानुभावे वीर इति भरताचार्येण तु पृथगेवानुभावो दर्शितः । उत्साहादविषादाद्व्यवसा ... ... ...

Colophon :

इति महोपाध्यायबहुरूपमिश्रविरचितायां दशरूपकटीकायां वस्तुविचारो नाम प्रथमः प्रकाशः ।

Author—Bahurūpamiśra.

Remarks—The Ms. extends almost to the end of the fourth prakāśa. The leaves are numbered only up to 37 and are arranged in a confused manner.

---

## । नयविवेकः ॥

## No. 1183 B. NAYAVIVEKA.

C. O. L. No. 616 B.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—30. 7—9 lines per page and 48—52 letters per line. Script—Malayāḷam. No. of Granthas—750. Incomplete.

Owner—Same as No. 1183 A.

Subject—Mīmāṃsā.

Beginning :

(मन्त्रार्थ)वादार्थः स्वरूपतः सिद्धोऽपि कार्यान्वितरूपेण कार्य एव । न च तद्रूपे मानान्तरगम्यतेति "चोदना हि" इति भाष्यम् । प्रतिज्ञादोषमाह – न चोदनालक्षणं किञ्चिदिति पुंवाक्ये व्यभि-

चारदर्शनोत्थं संशयरूपमर्थासंस्पर्शित्वं शब्दस्य ब्रुवत् । न च प्रत्यक्षादिवद् भेदाग्रहसमाधेयो व्यभिचारः । तत्र हि दोषादग्रहः । इह तु शाब्दधीहेतोः शब्दस्य न दोषः, नरगतस्तु दोषो न धीहेतुदोषः, किन्तु शब्दव्यक्तिहेतुदोष इति । इदमेवोक्तं (गु) रुणा "अन्तरा बाधकेऽप्यदुष्टशब्दोत्था धीर्व्यभिचरत्येवेति नाग्रहोऽयम्" इति ।

End:

लिङ्गविनियोगस्तु तदर्थशास्त्राद्यवरुद्धेन युक्तः वाक्यनियमादीना ....याम्रुपयोगः । न लिङ्गादविनियोगे । ...राद्धान्ते नाधिकं ....भाष्ये तदर्थशास्त्राद्युपेक्ष्य ........पेयदृष्टमित्युक्तम् । अर्थधीरेव नास्ति दूरे विपक्षेति वक्तुं (?) परिहृतं न सल्लापपरं वा .... ति परं तद्धीरस्त्येवेति जे....रित्यादेरर्थधीरुपाय च तामस्त्येवेति ।

Colophon:

इति नयविवेके प्रथमस्य द्वितीयः पादः ।

Author—Bhavadeva.

Remarks—The Ms. contains two *pādas* in chapter 1 and a portion of the third. The leaves are decayed and torn and it is very difficult to make out the writing in the first three leaves.

---

## ॥ दशरूपकव्याख्या ॥

No. 1184 A. DAŚARŪPAKAVYĀKHYĀ.

C. O. L. No. 256 A.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—126.

6—7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—2250. Complete.

Owner — Nārāyaṇa Bhaṭṭatiri Avl., Kuruvūr, Eḍappaḷḷi.

Subject—A commentary on the Daśarūpaka.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

रथतुरगवरत्रातोऽत्रगीतार्थमुद्रा-
धरणनिपुणपाणिः श्यामलः पीतवासाः ।
बहुविधवनमालः पिञ्छबद्धालकालिः
सरसिजनयनो नः सारथिस्सन्निधत्ताम् ॥

सदाचारं प्रमाणयताविघ्नेन प्रकरणपरिसमाप्त्यर्थमिष्टाया देवतायाः प्रकृताभिमतयोश्च देवतयोर्नमस्कारः कृतिना क्रियते श्लोकद्वयेन ।

End:

'साम भेदः प्रदानं च'त्येवमादीनि सन्ध्यन्तराण्येकविंशतिः उपमादिष्वलङ्कारेषु च हर्षादिष्वन्तर्भावान्न पृथगुक्तानि ।

रम्यं जुगुप्सितमुदारमथापि नीच-
मुग्रं प्रसादि गहनं विदितं च वस्तु ।
यद्वाप्यवस्तु कविभावकभाव्यमानं
तन्नास्ति यन्न रसभावमुपैति लोके ॥

विष्णोः सुतेनापि धनञ्जयेन
विद्वन्मनोरागनिबन्धहेतुः ।

आविष्कृतं (मुञ्जम)ही(शगोष्ठी-
वै)दग्ध्यभाजा दशरूपमेतद् ॥

Colophon :

इति दशरूपावलोके ध(निक)कृते चतुर्थः प्रकाशः ।

तपस्य .... .... ....वमामस्सुरनदी.... ....

.... .... ....णोदाशान्दाशज्ञुतपरिच.... .... ....

....श्शास्त्रणि .... .... ... न्न विदुः । किं कुर्मः ।

Author—Dhanika.

Remarks—The leaves are decayed especially towards the close of the Ms.

---

## ॥ दशरूपकटीकाव्याख्या ॥

No. 1184 B. DAŚARŪPAKAṬĪKĀVYĀKHYĀ.

C. O. L. No. 256 B.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—61. 6—7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—1100.

Owner—Same as No. 1184 A.

Subject—A commentary on the Daśarūpakaṭīka.

Beginning :

श्रीगणपतये नमः ।

क्वचनधरिते श्रा...सगद्र.... ...वेणिका
क्वचन श्रु... ...रनुक्षणवर्तित.... .... ।

.... ....चन रचितं रेखाचन्द्रं रयेण विधू....
....रहर.... ....गा मङ्गल्यमावहतु स्थिरम् ॥

दशरू.... स्यया व्याख्या धनिकेन समीरिता ।
तस्या भ.... .... नृसिंहेन लघ्वी टीका विधीयते ॥

अविघ्नपरिसमाप्ति.... ....योः फलफ.... ....वे सदाचार... ....व प्रमाणीकरोति इति वदन् त्रयाणामपि गणेशविष्णुभरतानां नमस्कारप्रतिपादकतयैका.... ....श्लोकद्वयं युगपदेवोपादाय पठति सदाचारमित्यादिना—

End :

नन्वन्येपीत्यादयो भावाः सन्ति मृगयादयो रसाश्च सन्ति, ते किं न लक्षितास्तत्राह—प्रतीति षट्त्रिंशदिति । भूषणाक्षरसंघातशोभोदाहरणे तथेत्यादीनि कीर्तितानि षट्त्रिंशद्भूषणानि एकविंशतिस्सामप्रभृतीनि सन्ध्यन्तराणि एकविंशतिरुपमादयोऽलङ्काराश्च तेषु तेषु हर्षोत्साहादिष्वन्तर्भूतत्वात् प्राङ् न कीर्तितानीत्यर्थः । रम्यजुगुप्सितादि रूपं वस्त्ववस्तु वा रसीभूत.... (क)विभावेनानाक्रान्तं लोके नास्तीत्याह रम्यमिति । विष्णोः सुतेनापि न केवलं विष्णुना, तत्सुतेनापि धनञ्जयनाम्ना दशरूपकमाविष्कृतमित्यर्थः ।

Colophon :

इति भट्टनृसिंहकृतायां दशरूपकटीकायाः व्याख्यायां चतुर्थः परिच्छेदः । समाप्तं दशरूपावलोकनव्याख्यानम् ।

कतिपयपदन्यासे व्यासाः कति क्षितिमण्डले
कतिपयविधानर्थान् वक्तुं बृहस्पतयः कति ।

विविधविषयां वह्वीं वाचं विचक्षणरञ्जिनी-
मिह रचयितुं यद्वा ज्ञातुं पटुर्विरलो जनः ॥
वासुदेवेन लिखितमिदम् ।
ऋतायनग्रामजुषः श्रीमज्जयपुरे सतः ।
वासुदेवस्य विदुषः स्वव्याख्यं दशरूपकम् ॥

Author—Bhaṭṭanṛsiṃha.

Remarks—The Ms. is very much decayed.

---

## ॥ पूजाविधिः ॥

## No. 1184 C. PŪJĀVIDHI.

C. O. L. No. 256 C.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—4. 7 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—65.

Owner—Same as No. 1184 A.

Subject—The rites of worship.

Beginning :

मूलेन त्रिवारं प्राणायामं कुर्यात् । ततो व्यापकं त्रिवारं तेनैव । ततः पञ्चस्थानन्यासः । ओं श्रीमिति शिरसि । ओं ह्रीमिति वदने । ओं क्लीमिति हृदये । ओं ग्लौमिति गुह्ये । ओं गमिति पादतलयोः । शेषेण गणपतय इत्यादिना व्यापकमेकवारम् । अथ स्थितिन्यासः । हृदयशिरोवदनपादगुह्येषु यथोक्तपञ्चकेन शेषेण व्यापनम् । अथ तुण्डन्यासः ।

End :

पुनरेकं पुष्पं निवेद्योपरि अदृश्यं देवोपरि क्षिपेत् । अमृतापिधानमसि । पुनर्गणपतिनिवेदने कुम्भोदरस्योच्छिष्टनिवेदनम् । वैष्णवे तु विष्वक्सेन! वौन्नमः इत्युक्त्वा पुष्पं समाराधयेत् । पुनरमृतोपस्तरणमसि, प्राणाहुतयः अमृतापिधानमसि । पुनर्बर्हिः क्षिपेत् । पुनर्भूशोधनं गण्डूषादिकञ्च । पुनः प्रसन्नपूजातीर्थादिकमुक्तप्रकारं द्रष्टव्यम् ।

सालग्रामे तु प्रथमं प्रणवेन पुष्पार्पणम् ।

निवेद्यं तु सालग्रामाणामेकस्मिन् वाणलिङ्गानामपरस्मिन् । नमश्शिवाय ।

Colophon :

नमस्ये त्वाम्बिकेऽभीक्ष्णं स्वसन्तानयुतं शिवम् ।
भूयात्पतिर्मे भगवान् कृष्णस्तदनुमोदताम् ॥

नमो नारायणाय । हरिहरहिरण्यगर्भा युष्मभ्यं नमः ।

Author :

Remarks—The work discusses rites of worship in general and then the particular modes of worshipping Vighneśvara and other Gods.

---

## ॥ नृसिंहस्तोत्रम् ॥

### No. 1184 D. NṚSIMHASTOTRAM.

C. O. L. No. 256 D.

Substance—Palm leaf. Size—12″ × 1½″. Leaf—1.

12 lines per page and 40 letters per line. Script — Malayaḷam. No. of Granthas—15. Complete.

Owner—Same as No. 1184 A.

Subject—Eulogy of Nṛsimha.

Beginning:

गणपतये नमः ।

श्रीम.... .... ....शशिकोटि-
श्रीधरमनोहरसटापटलकान्त! ।
पालय कृपालय भवापदि विमग्नं
मामसुरकाल नरसिंह नरसिंह! ॥

पादकमलावनतपातकपटानां
पाटनपरावरपते! पतगकेतो! ।
पावनपरायण पुराणपरया मां
पाहि कृपयैव नरसिंह नरसिंह! ॥

तुङ्गनखपङ्क्ति(दलि)तासुरवरासृक्
पङ्कनवकुङ्कुमाविपङ्किलमहोरः ।
पण्डितनिधान! भुवनाधिप! नमस्ते
पङ्कजनिषण्ण! नरसिंह! (नरसिंह) ॥

End:

इन्दुरविपावकविलोचन! रमाया
मन्दिर महाभुजलसद्दररथाङ्ग ।

सुन्दर चिराय रमतां त्वयि मनो मे
नन्दि... ...घ नरसिंह! नरसिंह! ॥

भैरव! सुरारिनिधनाय किल पद्म-
श्रीनृहरिकोपबहुलानलशमाय ।
श्रीभगवदङ्घ्रिमुनिवागमृतवर्ष-
स्तोत्रवरमष्टकमभीष्टफलदं नः ॥

Colophon :

नरसिंहाष्टकं पद्मपादाचार्यविनिर्मितम् ।
वासुदेवेन लिखितं वासुदेवसमश्रिया ॥

हरिः ।

Author—Padmapāda.

Remarks—The Ms. is much damaged.

---

## ॥ दशरूपकव्याख्या ॥

No. 1185 A. DAŚARŪPAKAVYĀKHYĀ.

C. O. L. No. 1855 A.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{3}{8}''$. Leaves—64. 7—8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Owner—Kūḍallūr, Brahmadattan Nampūdiri.

Subject—Same as No. 1184 A.

Beginning :

... ... ... नमः ।

स्वस्ति ।

क्वचन घटिते भ्राह्मे मुण्डे सगद्गदवेणिका
 क्वचन भुजगश्वासैरुग्रैरनुक्षणनर्तिता ।
क्वचन रचितं रेखाचन्द्रं रयेण विधून्वती
 स्मरहरशिरोगङ्गा मङ्गल्यमावहतु स्थिरम् ॥

दशरूपस्य या व्याख्या धनिकेन समीरिता ।
तस्य भट्टनृसिंहेन लघ्वी टीका विधीयते ॥

अविघ्नपरिसमाप्तिनमस्कारयोः फलफलिभावे सदाचारमेव प्रमाणीकरोतीतिवदंस्त्रयाणामपि गणेशविष्णुभरतानां नमस्कारप्रतिपादकतयैकार्थं श्लोकद्वयं युगपदेवोपादाय पठति सदाचारमित्यादिना ।

End :

एवंविधजन्माहमेवंविधकार्यघटनात् । त्रैलोक्यपारभूतानां सुरासुराणामपि .... .... इमेवंविधस्यां इत्यादिमते .... .... वापीमतिक्रान्त्रपुरूरव.... ....उर्वशीविषयो.... ....तिस्त्वयीत्यादि । द्वन्द्वात्परमित्यादिन्या.... ....र्णं पूर्वं श्रुतस्यापि तेनापदस्थशब्दस्य— द्वयोस्सम्बन्धः । अधमध्यितादिष्वनत्र विपक्षवा(?)गविरुद्धेति तेनोत्क्रमाद्भेदः । अक्र.... ....केवलं क्रमं गवनतुऽअचिर- .... ....नस्थत्वरवक्षो विशेषणमलङ्कारौचित्यख्यापनपर.....सन्तीत्यादिप्रौढोक्तिः प्रेमाभा.... .... ..... ।

Colophon :

(१) इति धनिककृतस्य दशरूपावलोकनस्य भट्टनरसिंहकृतटीकायां प्रथमः परिच्छेदः ।

(५) इति तृतीयः परिच्छेदः ।

Author :

Remarks—The Ms. comprises the first four paricchedas. It is much injured.

---

## ॥ दशरूपकावलोकनव्याख्या ॥

## No. 1185 B. DAŚARŪPAKĀVALOKANA-VYĀKHYĀ.

C. O. L. No. 1855 B.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{3}{8}''$. Leaves—11. 7—8 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—275.

Owner—Same as No. 1185 A.

Subject—A commentary on the Daśarūpakāvalokana.

Beginning :

हरिः श्रीगणपतये नमः ।

श्रियं दिशतु मे श ... श्रीगुरूणां दयालवः ।
यदीयवैभवात्सर्वे ज.... ....वैभवम् ॥

रथतुरगवरत्राय(तो?)...श्च ....

यमेकस्मिन् पाणौ श्रीगीतार्थमुद्र....प ....स्मिन्निति विभागः ।
पुष्पपल्लवनद्धस्रग्वनमालेति .... .... .... ....
सारथिस्सान्निध्यात्ता ॥ । अस्माकं सहायस्स .... करोतु । अथवा

रथतुरगेत्यादिनाक्षिप्तस्यार्जुनस्य सारथिर्भवन् सरसिजनयनः नः सन्निधत्ताम् ।

End :

सूत्रधारस्य गुणाः सौमनस्यादद्भुतदृष्टित्वादयः, आकृतिश्च वैष्णवस्थानादि तस्येति सूत्रधारगुणाकृती । शृङ्गारोऽङ्गी सलक्षण इति शृङ्गारस्य यल्लक्षणमुक्तम् उत्तमप्रकृत्युज्ज्वलवेषयौवनयुक्तस्त्रीपुंसाश्रयत्वादि तत्सहितः शृङ्गारोऽङ्गी यथोक्तलक्षणसहितस्यैव हि रसस्याङ्गित्वं युक्तम् । अत एव च डिमे वक्ष्यति न्याय्ये रौद्ररसेऽङ्गिनीति । डिमे ह्यत्यन्तमुद्धता नायकाः तदाश्रयत्वेन रौद्रो न्याय्यरसलक्षणः । ततश्च तत्रापि सोऽङ्गीति युक्तम् ।

Colophon :

Author :

Remarks—The Ms. is much damaged. It contains only a portion of the first *Pariccheda.*

---

## ॥ दशरूपकटीकाव्याख्या ॥

## No. 1186. DAŚARŪPAKAṬĪKĀVYĀKHYĀ.

C. O. L. No. 127.

Substance—Paper. Size—13″ × 8½″. Pages—90 18 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—1000. Complete.

Owner—C. O.

Subject—The characteristic features of hero, heroine, the definition of Rasa etc.

Beginning :

श्रीः ।

दशरूपकटीकाव्याख्या ।

क्वचन घटिते ब्राह्मे मुण्डे सगद्गदवेणिका
क्वचन भुजगश्वासैरुग्रैरनुक्षणनर्तिता ।
(क्व)चन रचितं रेखाचन्द्रं रयेण विधून्वती
स्मरहरशिरोगङ्गा मङ्गल्यमावहतु स्थिरम् ॥

दशरूपस्य या व्याख्या धनिकेन समीरिता ।
तस्या भट्टनृसिंहेन लघ्वी टीका विधीयते ॥

अविघ्नपरिसमाप्तिनमस्कारयोः फलफलिभावे सदाचारमेव प्रमाणीकरोति इति वदन् त्रयाणामपि गणेशविष्णुभरतानां नमस्कारप्रतिपादकतयैकार्थं श्लोकद्वयं युगपदेवोपपादयति – सदाचारमित्यादिना ।

End :

एकविंशतिः सामप्रभृतीनि सन्ध्यन्तराणि एकविंशतिरुपमादयोऽलङ्काराश्च तेषु तेषु हर्षोत्साहादिष्वन्तर्भूतत्वात् प्राङ् न कीर्तितानि इत्यर्थः रम्यजुगुप्सितादिरूपं वस्त्ववस्तु वा रसीभूतकविभावेनानाक्रान्तं लोके नास्तीत्याह – रम्यमिति । विष्णोः सुतेनापि न केवलं विष्णुना तत्सुतेनापि धनञ्जयनाम्ना दशरूपमाविष्कृतमित्यर्थः ।

Colophon :

इति भट्टनृसिंहकृतायां दशरूपकटीकाव्याख्यायां चतुर्थः परिच्छेदः ।

समाप्तं दशरूपकावलोकनव्याख्यानम् ।

Author—Bhaṭṭanṛsimha.

Remarks : ———

## ॥ दशरूपकव्याख्या (रूपदीपिका) ॥

## No. 1187. DAŚARŪPAKAVYĀKHYĀ.
(Rūpadīpikā.)

C. O. L. No. 349.

Substance—Paper. Size—13″ × 8½″. Pages—223. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—250. Complete.

Owner—C. O.

Subject—Same as No. 1184 A.

Beginning :

श्रीः

रूपदीपिका (दशरूपकव्याख्या)

अथारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्त्यादिसिद्धये विघ्नाधिराजं नमस्कारोति निखिलबुधकुलमौलिमालामणिर्मुञ्जराजाधिराजवन्दितचरणयुगलो ग्रन्थकृद् धनञ्जयः

नमस्तस्मै गणेशाय यत्कर्णः पुष्करायते ।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे ॥

यथा घनस्य मेघस्य ध्वानो नीलकण्ठस्य मयूरस्य ताण्डवे पुष्करायते तथा नीलकण्ठस्य परमेश्वरस्य ताण्डवे उद्धतनृत्ते मदाभोगेन मदपरिपूर्णतया घनध्वानो निबिडध्वनिर्यत्कण्ठः पुष्करायते मृदङ्गवदाचरति तस्मै नम इति, अत्र खण्डश्लेषाक्षिप्यमाणोपमाछायालङ्कारः ।

End :

अर्थापत्तिः अभावः प्रत्यक्षमिति वस्तुनोऽवस्थाविशेषजातः सन्निवेशविशेषो जातिः यथा —

सदक्षिणापाङ्गनिविष्टमुष्टिं
नतांसमाकुञ्चितसव्यजानुम् ।
ददर्श चक्रीकृतचारुचापं
प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥

विष्णोः सुतेनापि धनञ्जयेन
विद्वन्मनोरागनिबन्धहेतुः ।
अविष्कृतं मुञ्जमहीशगोष्ठी-
वैदग्ध्यभाजा दशरूपमेतत् ॥

Colophon :

इति बहुरूपकृतौ रूपदीपिकायां तृतीयः प्रकाशः ।
इति दशरूपदीपिकायां रसविचारो नाम चतुर्थः प्रकाशः

Author—Bhaṭṭamahopādhyāya Bahurūpa.

Remarks :

## ॥ दशरूपकव्याख्या (रूपदीपिका) ॥

### No. 1188 A. DAŚARŪPAKAVYĀKHYĀ.

Rūpadīpikā.

C. O. L. No. 1658 A.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2''$. Leaves—44. 11—12 lines per page and 76 letters per line. Script—Malayāḷam. No. of Granthas—2500. Complete.

Owner—Rāma Varma Rāja Avl., Pantaḷam, Koccukoyikkal.

Subject etc.—Same as No. 1184 A.

---

## ॥ माघव्याख्या ॥

### No. 1188 B. MĀGHAVYĀKHYĀ.

C. O. L. No. 1658 B.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2''$. Leaves—12. 9—10 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas — 375. Incomplete.

Owner—Same as No. 1188 A.

Subject—A commentary on the Śiśupālavadha.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ तत्रभवान् माघकविः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥" इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनतां, काव्यालापांश्च वर्जयेदिति निषेधस्यासत्काव्यविषयतां च पश्यन् शिशुपालवधाख्यं काव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुख'मित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च काव्यफलशिशुपालवधबीजभूतं भगवतः कृष्णस्य नारददर्शनरूपं वस्तु आदौ श्रीशब्दप्रयोगपूर्वकं निर्दिशन् कथामुपक्षिपति श्रिय इति ।

End:

अथ शिशुपालो हन्तव्य इति वक्तुं तस्य अवध्यत्वानवध्यत्वज्ञापनेन चाधिगतयात्यौद्धत्यप्रकटनार्थं(?) जन्मान्तरवृत्तान्तं तावदुद्धाटयति अभूदिति । प्रतिपक्षाच्छत्रोर्जन्म यासां तासां भियामभूमिरविषयः निर्भीक इत्यर्थः । तपनद्युतिः सूर्यप्रतापो दितेस्तनूजो दैत्योऽभूत् ।

Colophon:

Author—Mallinātha.

Remarks—The commentary on 42 verses of the first canto alone is found herein. Some leaves are written only on one side.

## ॥ दशरूपकव्याख्या (रूपदीपिका) ॥

## No. 1189. DAŚARŪPAKAVYĀKHYĀ.
### Rūpadīpikā.

C. O. L. No. 2242.

Substance—Palm leaf. Size—14"×2". Leaves—40. 10—12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1320. Incomplete.

Owner—Manier Kṛṣṇa Bhaṭṭatiri Avl., Ceṅgannūr.

Subject etc.—Same as No. 1184 A.

End :

धीरोदात्ताद्यवस्थानां रामादिः प्रतिपादकः ।
विभावयति रत्यादीन् स्वदन्ते रसिकस्य ते ॥

... ... ... ... ...

क्रीडितां मृन्मयैर्यद्वद् बालानां द्विरदादिभिः ।
सोत्साहः स्वदते तद्वच्छ्रोतॄणामर्जुनादिभिः ॥

काव्यार्थभावनास्वादो नर्तकस्य न वार्यते ।
स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः ॥

विकासविस्तरक्षोभविक्षेपैस्स चतुर्विधः ।
शृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात् ॥

हास्याद्भुतभयोत्कर्षकरुणानां त एव हि ।
अतस्तज्जन्यता.... .... .... .... ॥

Colophon :

इति महोपाध्यायश्रीबहुरूपकृतायां दशरूपकदीपिकायां नेतृविचारोनाम द्वितीयः प्रकाशः ।

Author—Bahurūpa.

Remarks—The commentary extends to the third Āśvāsa while the text runs to the middle of the 4th chapter.

॥ ध्वन्यालोकलोचनम् ॥

No. 1190. DHVANYĀLOKALOCANAM.

C. O. L. No. 73.

Substance—Paper. Size—11½″ × 8¾″. Pages—491. 20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—5550.

Owner—C. O.

Subject—The principles of Dhvani.

Beginning :

प्रथम उद्द्योतः ।

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः ।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः ॥

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात् सारयति च ।
क्रमात् प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयतात् ॥

भट्टेन्दुराजचरणाब्जकृताधिवास-
हृद्यश्रुतोऽभिनवगुप्तपदाभिधोऽहम् ।
यत्किञ्चिदप्यनुरणन् स्फुटयामि काव्या-
लोकं स्वलोचननियोजनया जनस्य ॥

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ॥

स्वयमविच्छिन्नपरमेश्वरनमस्कारसंपत्तिचरितार्थोऽपि व्याख्यातृश्रोतॄणामविघ्नेनाभीष्टव्याख्याश्रवणलक्षणफलसंपत्तये समुचिताशीःप्रकटनद्वारेण परमेश्वरसाम्मुख्यं करोति वृत्तिकारः स्वेच्छेत्यादिना ॥

End—Same as No. 1391, DCSMMPL.

Author—Text : Rajānaka Ānandavardhanācārya.
Com : Abhinavagupta.

Remarks :

---

## ॥ ध्वन्यालोकलोचनम् ॥

## No. 1191. DHVANYĀLOKALOCANAM.

C. O. L. No. 409.

Substance—Paper. Size—13½″ × 9″. Pages — 16.

18 lines per page and 28 letters per line. Script—Devanāgarī. No. of Granthas — 250.

Owner—C. O.

Subject—The Dhvani system in Poetics.

Beginning :

उद्द्योतसङ्गतिं विरचयितुं वृत्तिकार आह—एवमिति । प्रयोजनान्तरमिति । यद्यपि सहृदयमनःप्रीतय इत्यनेन प्रयोजनं प्रागेवोक्तं ......तृतीयोद्योतावयौ (?) सत्काव्यं कर्तुं वा ज्ञातुं वेति । तदेवैषत्स्फुटीकृतं तथापि स्फुटीकृतमिदानीम् । यतः सुस्पष्टत्वरूपेण विज्ञायते ।

End :

श्रीसिद्धिचेलचरणाब्जपरागपूतो
भट्टेन्दुराजमतिसंस्कृतबुद्धिलेशः ।
वाक्यप्रमाणपदवेदिगुरुप्रबन्ध-
सेवारतो . . . च्यधद् ध्वनिवस्तुवृत्तिम् ॥

सज्जनान् कविरसौ न याचते
ह्लादनाय शशभृत् किमर्थितः ।
नैव निन्दति खलो मुहुर्मुहुः
सत्कृतोऽपि नहि शीतलोऽनलः ॥

वस्तुतः शिवमये हृदि स्फुटं
सर्वतः शिवमयं विराजते ।
नाशिवं क्वचन कस्य चिद्वच-
स्तेन वः शिवमयी सदा भवेत् ॥

Colophon :

इति महामहेश्वराचार्याभिनवगुप्तविरचिते काव्यालोकलोचने चतुर्थोद्योतः ।

Author—Abhinavagupta.

Remarks—The Ms. comprises the 4th Uddyota only. Three Uddyotas are alone printed in Locana.

## ॥ ध्वन्यालोकलोचनम् ॥

No. 1192 A. DHVANYĀLOKALOCANAM.

C. O. L. No. 2357 A.

Substance—Palm leaf. Size—21¾" × 2". Leaves—76. 9—10 lines per page and 76 letters per line. Script—Malayāḷam. No. of Granthas—3400.

Owner—Tuppan Tuppan Nambūripād Avl., Punnorkoṭṭumana, Kumārapuram.

Subject—Same as No. 1191.

Beginning :

श्रीः ।

..... .... .... ....वार्थ इत्येकतयोपक्रम्य सहृदयश्लाघ्य इति विशेषणद्वारं हेतुमभिधाय अपे... .... ... ...

... ... ... ... ... ... ...

.... .... .... .... .... .... ....चितशब्देन रसविषयमेवौचित्यं भवतीति दर्शयन् रसध्वनेर्जी.... .... ....

... ... ... ... ... ... ...

.... .... .... .... .... .... त्यादिना तद-

भ्युपगम एव द्व्यंशकत्वं सत्युपपद्यत इति दर्शयति .... .... ....
... ... ... ... ... ... ...
... ... ... ... ... ... ...
प्येवं स्यात् । तथापि वाच्ये नानैकान्तिको हेतुः । नह्यलङ्काय एवालंकारो गुणी वा गुणः एतदर्थम.... .... .... ....
... ... ... ... ... ... ...
... ... ... ... ... वदनोद्यानेन्दूदयादिर्लौकिक एवेत्यर्थः । उपमादिभिः प्रकारैरस्य व्याकृतो बहुधेति सङ्गतिः ।

End :

इह बाहुल्येन लोको लोकप्रसिद्ध्या सम्भावनाप्रत्ययबलेन प्रवर्तते । स च सम्भावनाप्रत्ययो नाम श्रवणवशात् प्रसिद्धानन्यदीयसमाचारकवित्वविद्वत्तादिसमनुस्मरणेन भवति । तथाहि भर्तृहरिणेदं कृतं यस्यायमौदार्यमहिमा यस्यास्मच्छास्त्र एवंविधस्फारो दृश्यते, तस्यायं श्लोकप्रबन्धः । तस्मादादरणीयमिति लोकः प्रवर्तमानो दृश्यते । लोकश्चावश्यं प्रवर्तनीयः शास्त्रोदितप्रयोजनसम्पत्तये । तदनुग्राह्यश्रोतृजनप्रवर्तनाङ्गत्वात् ग्रन्थकाराः स्वनामनिबन्धनं कुर्वन्तीति तदभिप्रायेणाह आनन्दवर्धन इति । प्रथितशब्देनैतदेव प्रथितं यत्तदेव नामश्रवणं केषाञ्चिन्निर्वृतिं करोति । तन्मात्सर्यविजृम्भितं नात्र गणनीयम् । निःश्रेयसप्रयोजनादेव हि श्रुतात् कोऽपि रागान्धो यदि निवर्तते किमेतावता प्रयोजनमप्रयोजनमप्यवक्तव्यं वक्तव्यमेव स्यात्(?) । तस्मादार्थिनां प्रवृत्त्यङ्गं नाम प्रथितमिति प्रसिद्धम् ।

स्फुटीकृतार्थवैचित्र्यबहिःप्रसरदायिनीम् ।
तुर्यां शक्तिमहं वन्दे प्रत्यक्षार्थनिवेशिनीम् ॥

आनन्दवर्धनविवेकविकासिकाव्या-
लोकार्थतत्त्वघटनादनुमेयसारम् ।
यत्प्रोन्मिषत्सकलसद्विषयप्रकाशि-
व्यापार्यतोऽभिनवगुप्तविलोचनं तत्(?) ॥

श्रीसिद्धिचेलचरणाब्जपरागपूत-
भट्टेन्दुराजमतिसंस्कृतबुद्धिलेशः ।
वाक्यप्रमाणपदवेदिगुरुप्रबन्ध-
सेवारतो व्यरचयद् ध्वनिवस्तुवृत्तिम् ॥

सज्जनान् कविरसौ न याचते
ह्लादनाय शशभृत्किमर्थितः ।
नैव निन्दति खलान्मुहुर्मुहुः
सत्कृतेऽपि नहि शीतलोऽनलः ॥

वस्तुतश्शिवमये हृदि स्फुटं
सर्वतः शिवमयं विराजते ।
नाशिवं क्वचन कस्यचिद्वच-
स्तेन वः शिवमयी सदा भवेत् ॥

Colophon :

इति महामहेश्वराभिनवगुप्तविरचिते काव्यालोकलोचने चतुर्थ उद्द्योतः ॥

अवसितं च काव्यालोकतत्त्वालोचनं लोचनम् ॥

Author—Abhinavaguptacarya.

39

Remarks—The Ms. has lost the first four leaves and half of the fifth.

---

## ॥ दशरूपकव्याख्या ॥

## No. 1192 B. DAŚARŪPAKAVYĀKHYĀ.

C. O. L. No. 2357 B.

Substance—Palm leaf. Size—$21\frac{3}{4} \times 2''$. Leaves—28. 9 lines per page and 76 letters per line. Script—Malayāḷam. No. of Granthas—1200. Complete.

Owner—Same as No. 1192 A.

Subject—A commentary on the Daśarūpaka.

Beginning :

श्रीगणपतये नमः ।

सदाचारं प्रमाणयता अविघ्नपरिसमाप्त्यर्थमिष्टायाः (देवतायाः) प्रकृताभिमतयोश्च देवतयोर्नमस्कृतिः कृतिना क्रियते श्लोकद्वयेन—

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे ॥

दशरूपानुकारेण यस्य माद्यन्ति भावकाः ।
नमः सर्वविदे तस्मै विष्णवे भरताय च ॥

यस्य कण्ठः पुष्करायते मृदङ्गवदाचरति, सदाभोगघनध्वानः निबिडध्वनिः। नीलकण्ठस्य शिवस्य। ताण्डवे उद्धतनृत्ते। तस्मै गणेशाय नमः । अत्र खण्डश्लेषाक्षिप्यमाणोपमाच्छायालङ्कारः । नीलकण्ठस्य मयूरस्य ताण्डवे मेघध्वनिर्यथा पुष्करायत इति प्रतीतेः । दशरूपानुकारेणेति । एकत्र मत्स्यकूर्मादिप्रतिमारूपेण, अन्यत्रानुकृतिरूपेण नाटकादिनायकस्य भावकाः ध्यातारः रसिकाश्च माद्यन्ति तस्मै विष्णवेऽभिमताय प्रकृताय भरताय (च) नमः ॥

श्रोतुः प्रवृत्तिनिमित्तं दर्शयति

कस्यचिदेव कदाचिद्दयया विषयं सरस्वती विदुषः ।
घटयति कमपि तमन्यो व्रजति जनो येन वैदग्धीम् ॥

तं कञ्चिद्विषयं प्रकरणादिरूपं कदाचिदेव कस्यचिदेव सरस्वती योजयति, येन प्रकरणादिना विषयेणान्योऽपि जनो विदग्धो भवति। स्वप्रवृत्तेर्विषयं दर्शयति—

उद्धृत्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरिञ्चि-
श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः ।
शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः कर्तुमीष्टे
नाट्यानां किन्तु किञ्चित्प्रगुणरचनया लक्षणं सङ्क्षिपामि ॥

यं नाट्यवेदं वेदेभ्यस्सारमादाय ब्रह्मा कृतवान्, यत्सम्बद्धमभिनयं भरतश्चकार, करणाङ्गहारानकरोद्धरः, सुकुमारनृत्तं पार्वती कृतवती, तस्य सामस्त्येन लक्षणं वक्तुं कः शक्तः, तदेकदेशस्य तु दशरूपकस्य संक्षेपः क्रियत इत्यर्थः ।

End :

तत्र नाटिकेति स्त्रीसमाख्ययौचित्यप्राप्तं स्त्रीप्रधानत्वम् । कैशिकी-वृत्त्याश्रयत्वाच्च तदङ्गसङ्ख्यया स्वल्पावमर्शनत्वेन च चतु(रंत?रङ्क) त्वमप्यौचित्यप्राप्तमेव । विशेषस्तु—

देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ।
गम्भीरा मानिनी कृच्छ्रात्तद्वशान्नेतृसङ्गमः ॥

प्राप्या तु—

नायिका तादृशी मुग्धा दिव्या चातिमनोहरा ।
अन्तःपुरातिसम्बन्धादासन्ना श्रुतिदर्शनैः ॥

तादृशीति नृपवंशजत्वादिधर्मातिदेशः अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम् ॥

तस्यां मुग्धनायिकायामन्तःपुरसङ्गीतादिदर्शनप्रत्यासत्तौ नायकस्य देवीप्रतिबन्धान्तरित उत्तरोत्तरो नवावस्थोऽनुरागो निबन्धनीयः ।

नेता तत्र प्रवर्तेत देवीत्रासेन शङ्कितः ।
कैशिक्यङ्गैश्चतुर्भिश्च युक्ताङ्कैरिव नाटिका ॥

क्रियाप्रत्यङ्गोपनिबद्धाभिहितलक्षणकैशिक्यङ्गचतुष्टयवती नाटिकेति ।

अथ भाणः ।

भाणं तु धूर्तचरितं स्वानुभूतं परेण वा ।
यत्रोपवर्णयेदेको ... ... ..., ॥

Colophon :

इति दशरूपकावलोकने द्वितीयः प्रकाशः ।

Author—Dhanika.

Remarks—The Ms. extends to the 49th verse in the 3rd Prakāśa wherein the characteristics of Bhāṇa are defined.

---

## ॥ भारतव्याख्या ॥

No. 1192 C. BHĀRATAVYĀKHYĀ.

C. O. L. No. 2357 C.

Substance—Palm leaf. Size—21¾″ × 2″. Leaves—11. 19 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Owner—Same as No. 1192 A.

Subject—A commentary on Bhārata.

Beginning :

...त्यर्थः। भारं पुष्पादीनां भारं वोढुं शक्तः स्पन्दनं(തൊട്ടകാരം) अन्यमहीजां वायुना कम्पितेषु ... दीनां भारं .... .... शक्ताः । अत्र स्पन्दनदृष्टान्तेन राज्यभारवहनादौ कुलीनत्वादेव प्राधान्यं न स्थूलबहुत्वादिति द्योतितम् ।एवं युक्ता महाकुललक्षणयुक्ताः भार-सहाः राज्यभारं वोढुं शक्ताः अन्ये अमहाकुलीनाः । पाण्डवानां महाकुलीनत्वादिगुणयुक्तत्वादबहुत्वेऽपि राज्यरक्षणे शक्तिरस्ति. हयों-

धनादीनां तु महाकुलीनत्वादिगुणराहित्याद्बहुत्वे सत्यपि न शक्तिरिति भावः ।

End :

यत एवं तस्मात्पाण्डवानां राज्यमदासीरित्यर्थः । पाण्डवानां राज्यप्रदानेन पूर्वकृतो सद्व्यापारोऽपि साधुरेव भवेदिति भावेनाह— अक्रोधेनेति— असाधुत्वं असद्व्यापारं—साधुना सद्व्यापारेण—कदर्यो लुब्धः अनृतम् असत्यं यत एवं तस्माद्विश्वस्य राज्यप्रदानं कु....

.... .... .... .... .... ....

Colophon :

Author :

Remarks—The commentary begins from verse 37, chapter 36 and ends with a verse in chapter 39 of Udyogaparva. In the commentary sometimes equivalents in Malayāḷam are given for Sanskrit words.

---

## ॥ ध्वन्यालोकव्याख्या ॥

No. 1193 A. DHVANYALOKAVYĀKHYĀ.

C. O. L. No. 1035 A.

Substance—Palm leaf. Size—18″ × 2½″. Leaves—50 9—10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1800. Complete.

Owner—Rāja of Cirakkal.

Subject—The theory of Dhvani.

Beginning :

हरिः श्रीगणपतये नमः ।अविघ्नमस्तु ।

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः ।
त्रायन्तां वो मधुरिपोः प्रपन्नार्त्तिच्छिदो नखाः ॥

काव्यस्यात्मा ध्वनिरिति बुधैर्यस्समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमस्सहृदयमनःप्रीतये तत्स्वरूपम् ॥

बुधैः काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिरिति संज्ञितः । परम्परया यः समाम्नातस्तस्य सहृदयजनमनःप्रकाशमानस्यापि अभावमन्ये जगदुः । सम्यक् आ समन्तात् म्नातः । तदभावादिनां चामी विकल्पाः सम्भवन्ति ।

End :

प्रतायन्तां वाचो निमितविविधार्थामृतरसा
न वादः कर्तव्यः कविभिरनवद्यैः स्वविषये ।

न सन्ति नवाः काव्यार्थाः परोपनिबद्धार्थविरचनेन कश्चित् कवेर्गुण इति भावयित्वा परस्वादानेच्छाविरतमनसां महाकवीनां सरस्वत्यैवैषा भगवती यथेष्टं वस्तु घटयति येषां सुकृतीनां सुक-

परिग्रहनिःस्पृ....पारो न कश्चित् उपयुज्यते सैव भगवती सरस्वती स्वयमभिमतमर्थमाविर्भावयति । एतदेव हि महाकवित्वम् महाकवीनामिति ।

नित्यक्लिष्टरसाश्रयोचितगुणालङ्कारशोभाहृतो
यस्माद्वस्तु समीहितं सुकृतिभिः सर्वं समापाद्यते ।
काव्याख्येऽखिलसौख्यधाम्नि विबुधोद्याने ध्वनिर्दर्शितः
सोऽयं कल्पतरूपमानमहिमा भोग्योऽस्तु भाव्यात्मनाम् ॥

सत्काव्यतत्वविषयं स्फुरति प्रसुप्त-
कल्पं मनःसु परिपक्वधियां यदासीत् ।
तद्व्याकरोत् सहृदयोदयलाभहेतो-
रानन्दवर्धन इति प्रथिताभिधानः ॥

इत्यानन्दवर्धनविरचिते सहृदयालोकनाम्नि काव्यालङ्कारे चतुर्थ उद्द्योतः ॥

Author—Anandavardhana.

Remarks :

---

## ॥ ध्वन्यालोकव्याख्या ॥

No. 1193 B. DHVANYALOKAVYAKHYA.

C. O. L. No. 1035 B.

Substance—Palm leaf. Size—18″ × 2½″. Leaves—109. 9—10 lines per page and 52 letters per line.

Script—Malayāḷam. No. of Granthas—3400. Complete.

Owner—Same as No. 1193 A.

Subject—A commentary on the Dhvanyāloka.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात् सारयति च ।
क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति त-
त्सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयताम् ॥

भट्टेन्दुराजचरणाब्जकृताधिवास-
हृद्यः श्रुतोऽभिनवगुप्तपदाभिधोऽहम् ।
यत्किञ्चिदप्यनुरणन् स्फुटयामि काव्या-
लोकं स्वलोचननियोजनया जनस्य ॥

स्वयमव्युच्छिन्नपरमेश्वरनमस्कारसम्पत्तिचरितार्थोऽपि व्याख्यातृश्रोतॄणामविघ्नेनाभीष्टव्याख्याश्रवणलक्षणफलसम्पत्तये समुचिताशीःप्रकटनद्वारेण परमेश्वरसाम्मुख्यं करोति वृत्तिकारः—स्वेच्छेत्यादिना ।

End—Colophon—Same as No. 1192 A.

Author—Abhinavaguptācārya.

Remarks:

## ॥ लोचनव्याख्या ॥

## No. 1193 C. LOCANAVYĀKHYĀ.

C. O. L. No. 1035 C.

Substance—Palm leaf. Size—18″ × 2¼″. Leaves—21. 11—12 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—1000. Incomplete.

Owner—Same as No. 1193 A.

Subject—A commentary on the Dhvanyālokalocana.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ॥

कारुण्यस्फुरणं चन्द्रकलापुष्प(?)जटावनम् ।
समग्रं मृगशाबाक्ष्या सर्वस्योपरि वर्तते ॥

को नामात्र परिच्छिन्द्याल्लोचनप्रसराशयम् ।
तदप्येतस्य दिङ्मात्रमभिव्यङ्क्तुमुपक्रमे ॥

अथ (मी?)श्रीमदभिनवगुप्ताचार्यपादः ध्वनिग्रन्थव्याख्यानारम्भे मङ्गलमाचरति अपूर्वं यद्वस्त्वित्यादिना । अत्र द्वितीये वाक्ये तृतीये च यद्वृत्तमनुषञ्जनीयम् । चशब्दस्तृतीये निवेशनीयः । "एको द्योतको बहुषु द्योत्येष्वन्त्ये" इति न्यायात् अन्त्यनिविष्टोऽयमर्थात् पूर्वत्र सम्बध्यते ॥

End :

अतिशयोक्त्येति पदं व्याचष्टे । अतिशयोक्त्येतीति । अनाख्यत्वेयतोक्त्येति अतिशयस्य व्याख्यान ... ... अनाख्येयताया उक्तिरनाख्येयतोक्तिः । सारूपतां प्रतिपादयितुमिति प्रवृत्तयेति शेषः । अतिशयोक्त्या अनाख्येयतोक्त्या साररूपतां प्रतिपादयितुं प्रवृत्तयानया काव्यान्तरातिशयितं रूपं यद्याख्यायत इत्यर्थः। सुधायित इति ध्वनेस्साररूपत्वाभिधानमस्माकमाभिमतम्। यतो वयं काव्यस्यात्मा ध्वनिरिति ब्रूम इति भावः । लोचनमिति लोचनं नेत्रम् । अयं व्याख्यानग्रन्थश्च लोको भुवनमालोकश्चायं ध्वनिग्रन्थः । चन्द्रिका ज्योत्स्ना ध्वनिव्याख्यानग्रन्थश्चान्यः । लोचनोन्मीलना उन्मीलितं लोचनमिति यावत् । आलोकस्य शोभाग्रहणं यत् उन्मिलितेन लोचनेन नान्येनेत्यर्थः । यदुन्मीलनेति–उन्मीलनयुक्त्या स्फुटयुक्त्या । उन्मीलयति स्फुरति स्वात्मायतनविश्रान्तां (स्वस्वरूपामवस्थिताम्) ।

Colophon :

Author :

Remarks—This Ms. contains only a portion of the first Uddyota.

---

॥ ध्वन्यालोकव्याख्या ॥

No. 1194. DHVANYĀLOKAVYĀKHYĀ.

C. O. L. No. 2542.

12 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—525.

Owner—Valia Rāja Kṛṣṇa Rāja Avl., Iḍappaḷḷy.

Subject—Poetics.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

... ... ... रणकला-
ञ्जगदूग्रावग्रख्यं निजरसभरात् सारयति च ।
क्रमात् प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥

भट्टेन्दुराजचरणाब्जकृताधिवास-
हृद्यः श्रुतोऽभिनवगुप्तपदाभिधोऽहम् ।
यत्किञ्चिदप्यनुरणन् स्फुटयामि काव्या-
लोकं स्वलोचननियोजनया जनस्य ॥

स्वयमव्युच्छिन्नपरमेश्वरनमस्कारसम्पत्तिचरितार्थोऽपि व्याख्यातृश्रोतॄणामविघ्नेनाभीष्टव्याख्याश्रवणलक्षणफलसम्पत्तये समुचिताशीः प्रकटनद्वारेण परमेश्वरसाम्मुख्यं करोति वृत्तिकारः स्वेच्छेत्यादिना, मधुरिपोर्नखाः वः युष्मान् व्याख्यातृश्रोतॄन् त्रायन्तां तेषामेव संबोधनयोग्यत्वात् संबोधनसारोहि युष्मदर्थः ।

End :

आनन्दवर्धन इति प्रथितशब्देनैतदेव प्राथितं यत्तदेव नामश्रवणं केषाश्चिन्निवृत्तिं करोति । तस्मात्सर्वविजृम्भितं नात्रत्रगणनीयं(?)निःश्रेयसप्रयोजनादेव हि श्रुतात् कोपि रागान्धो यदि निवर्तते किमेतावता प्रयोजनमप्रयोजनमप्यवक्तव्यमेव स्यात्। तस्मादर्थिनां प्रवृत्त्यंगन्नाम प्रथितमिति सिद्धम् ।

स्फुटीकृतार्थवैचित्र्यबहिःप्रसरदायिनीम् ।
तुर्यां शक्तिमहं वन्दे प्रत्यक्षार्थनिदर्शिनीम् ॥

आनन्दवर्धनविवेकविकासिकाव्या-
लोकार्थतत्त्वघटनादनुमेयसारम् ।
यत्प्रोन्मिषत्सकलसद्विषयप्रकाशि
व्यापार्य(ता?तोऽ)भिनवगुप्तविलोचनं तत् ॥

श्रीसिद्धिचेलचरणाब्जपरागपूते
भट्टेन्दुराजमतिसंस्कृतबुद्धिलेशम् ।
काव्यप्रमाणपदवेदिगुरुप्रबन्ध-
सेवारतो व्यरचयद् ध्वनिवस्तुवृत्तिम् ॥

सज्जनान् कविरसौ न याचते
ह्लादनाय शशभृत् किमर्थितः ।
नैव निन्दति खलो मुहुर्मुहुः
स्वीकृतोऽपि न च शीतळोऽनलः ॥

वस्तुतश्शिवमये हृदि स्फुटं
सर्वतश्शिवमयं विराजते ।
नाशिवं क्वचन कस्यचिद्वच-
स्तेन वः शिवमयी दशा भवेत् ॥

Colophon :

इति माहेश्वराभिनवगुप्तविरचिते काव्यालोकलोचने चतुर्थ उद्योतः । अवसितञ्च काव्यालोकलोचनं लोचनम् ।

कृष्णाय नमः । श्रीगरुडाय नमः । श्रीरामवल्लभाय नमः । श्रीगुरुभ्यो नमः ।

Author—Abhinavaguptācarya.

Remarks—The work is printed in N. S. P. B. The leaves are slightly damaged. The script is legible.

---

## ॥ ध्वन्यालोकलोचनाविवृतिः ॥

No. 1195. DHVANYĀLOKALOCANAVIVṚTI.

C. O. L. No. 2379.

Substance—Palm leaf. Size—19″ × 2½″. Leaves—148. 9—10 lines per page and 50 letters per line.

Script—Malayalam. No. of Granthas—4400.

Owner—Manuscripts Library, Trippunittura.

Subject—Poetics.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

या सा व्यञ्जकभेदेन बहुधैका विभाव्यते ।
काव्यार्थसारभूतां तामाद्रिये संविदं पराम् ॥

विश्वा त्रिर्भावविश्राणननिपुणनिजोन्मेषमन्तर्विचित्रान्
भेदानव्यक्तमाभासयदभिगमयद्व्यक्तभावश्च भूयः ।
प्रत्यक्षार्थानुवेधप्रकटितमहिम स्पष्टमन्तस्समिन्धा-
मन्धीभावान्निरुन्धात् किमपि निरुपमन्धाम सारस्वतं वः ॥

नवरसमयमन्यद्विश्वमन्यव्यपेक्षा-
विरहितमपरोक्षं शश्वदुन्मीलयन्ती ।
कविसहृदयसंसन्मानसाम्भोजहंसी
विहरतु हृदि नित्यं वाङ्मयीदेवता वः ॥

यत्प्रज्ञाशिल्पियत्नस्फुटघटितविवेकात्मसोपानपङ्क्ति-
प्राप्तोर्ध्वोर्ध्वाधिरोहा स्थितमुपरि बुधा विद्यते वस्तुतत्त्वम् ।
वाग्देवी लास्यशिक्षाक्रमपरिकलनापूर्वरङ्गायमाणा-
नाद्यानाचार्यवर्याननुदिनमिह तान्भामहाद्यान्प्रपद्ये ॥

पूर्वैरसञ्चरितमुद्धृतकण्टकं स-
त्काव्यार्थवर्त्म यदुपज्ञमदःप्रवृत्तम् ।
आनन्दवर्धनमनुत्तममन्विताथ-
नामानमेनमहमन्वहमानतोऽस्मि ॥

ध्वनिसमयरहस्यवस्तुतत्त्व-
प्रथनपटिष्ठगरिष्ठवाक्प्रपञ्चान् ।
अभिमतसुरपादपान् गुरूंस्ता-
नभिनवगुप्तपदाभिधानुपासे ॥

विद्यास्वस्तरवे नमोऽस्तु गुरवे तस्मै कृपाम्भोधये
शिष्याज्ञाननिशान्धकारनिवहप्रध्वंसितिग्मांशवे ।
यत्कारुण्यकटाक्षपातकणिकानौकाश्रितैरश्रमा-
त्तीर्णोऽस्माभिरुदीर्णनीतिसलिलो ध्वन्यर्थतन्त्रार्णवः ॥

काव्यालोकार्थसंयोजितमभिनवगुप्ताह्वयाचार्यपादै-
रात्मीयं लोचनं यत्सुनिशितधिषणैरप्यनामृष्टसारम् ।
तत्सारोद्ग्राहिणीं सम्प्रति विवृतिमहं संविधातुं समीहे
विद्वांसस्तत्परास्तत्परगुणसुखिनस्सन्तु सन्तोषवन्तः ॥

ख्यातिस्नेहप्रतिष्ठां जगति गमयितुन्नमकृष्टां विदुष्टा-
माविष्कर्तुन्निजां वा विवृतिविरचना प्रस्तुता वस्तुतो नः ।
तीर्थेनानेन काव्यामृतसरसि मनाङ्मङ्क्तुकामोऽस्मि तस्मा-
न्मङ्क्तुं मा मन्तुमन्तं न्वनु दधत मनो हन्त! मा मा महान्तः ॥

आशंसिता रसिकलोकचकोरवृन्दै-
रात्रिर्भवन्त्युदयतोऽमृतगोरुदारा ।
आचन्द्रतारकमियं नवकौमुदीव
प्रीतिं दधातु जगतां विवृतिर्मदीया ॥

अथ सकलमहाजनबहुमतमहिमा महामहेश्वरपरमेश्वर एव जगदनुग्रहकृतपरिग्रहविग्रहविशेषः श्रीमानभिनवगुप्ताचार्यः श्रीमदानन्दवर्धनाचार्यविरचितं काव्यालोकं व्याकृतमपि पूर्वैरनुन्मीलिताकूतसारसर्वस्वमत एवाव्याकृतकल्पं मन्वानस्सन्नुपसन्नजनोपचिकीर्षया स्वयं व्याचिकीर्षश्चिकीर्षितप्रबन्धकीर्तिप्रतिष्ठात्मकप्रयोजनप्रस्तावकतया समासादितसमग्रपुरुषार्थसाधनमविच्छिन्नार्यजनाचारपारम्पर्यागतमधिक्रियमाणाभिमतदेवतासतत्वानुस्मरणस्तुतिनमस्कारलक्षणमङ्गलमादितोऽनुसन्दधानः श्रोतॄणामपि तत्कर्तव्यतानियमावबोधार्थं ग्रन्थे निवेशयति—अपूर्वं यद्वस्त्विति ।

End :

ध्वनिसामान्यलक्षणं ह्यत्र प्राधान्येनाभिहितं; तेन च तस्य क्रोडीकृतसकलावान्तरभेदं स्वरूपमुन्मीलितं, तदुन्मीलने च तदवान्तरभेदोन्मीलनं सुसंपादं विशेषावधारणस्य सामान्यावधारणाधीनत्वात् सामान्योपाधौ च विशेषाणामन्तर्भावाद्; अतश्चात्र प्रतिभेति काव्यात्मभूतध्वनिस्वरूपावधारणं गृहीतं, तस्य च प्रतिभाशब्दवाच्यत्वं विचारजन्यज्ञानस्य परिनिश्चितस्वरूपतया साक्षात्कारप्रायत्वात् शिवात्मकत्वञ्च निरतिशयानन्दरूपत्वात् । वन्दे इत्यनेन सर्वोत्कृष्टत्वमिति । एवमुद्द्योतान्ते प्रतिपाद्यार्थसंक्षेपे श्रोतृव्याख्यातृसु-

स्वग्रहार्थं मङ्गलाचारात्मक एवास्मिन्पद्ये लाघविकतया ग्रन्थकारेण मनागुन्मीलित इति सकलमपि मङ्गलम् ।

यत्पादाब्जकुटुम्बिनी परिणता भक्तिद्रुसद्वल्लरी
हस्तादेयमिव प्रसौति चतुरः पूर्णान्पुमर्थान्फलम् ।
अध्यासीनमधःस्थलीं वटतरोर्मध्ये महायोगिना-
मुद्धूतानतमोहमस्तु सततन्तद्धाम हृद्धाम नः ॥

Colophon :

इत्थं मोहतमोनिमीलितदृशां ध्वन्यर्थमार्गे यतां
व्याख्याभासमहोष्मसज्वरजुषां प्रेक्षावतां प्रीतये ।
उत्तुङ्गादुदयात्क्ष्माभृत उदेयुष्याममुष्यामयं
कौमुद्यामिह लोचनस्य विवृतावुद्द्योत आद्यो गतः ॥

൧൦൫൭ മകരം ൨൭-ാംതീയതി പൊതമനത്തുകാരൻ നാരാ-
യണൻനമ്പ്യാർ എഴുതിയതു".

Author :

Remarks :

---

## ॥ ध्वन्यालोकलोचनव्याख्यानम् ॥

## No. 1196 A. DHVANYĀLOKALOCANA-VYĀKHYĀNAM.

C. O. L. No. 2380 A.

Substance—Paper. Size—8¼" × 6½". Pages—84.

18 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—756. Incomplete.

Owner—Same as No. 1195.

Subject—Poetics.

Beginning :

एवं कृतसमुचितेष्टदेवतास्मरणमङ्गल आत्मन औद्धत्यं परिहरन् परमगुरुसमनुस्मरणपुरःसरं चिकीर्षितं प्रतिजानीते—भट्टेन्दुराजेति अभिनवगुप्तपदाभिधोऽहं यत्किञ्चिदत्यल्पमनुस्मरन्नपि लोचननियोजनया श्रोतृजनस्य काव्यालोकनामानं महाग्रन्थं स्फुटयामि । अतिगम्भीरत्वेऽपि स्फुटार्थं करोमीति संबन्धः, नैतदसत्प्रभावादित्याह—भट्टेन्दुराजेति ।

End :

किञ्चास्मिन्नुदाहरणपञ्चके तावत् यानि प्रतीयमानानि वस्तूनि वाच्यात् प्रधानभूतानि तेषां तत्रभवद्भिः यदनुमानत्वमुद्घोष्यते तत्र हेतुं न विद्मः वाच्यात् प्रतीयमानस्य भेदप्रकाशनमात्रप्रयोजनेनैषामुदाहृतत्वात् प्रतीयमानार्थसद्भावे तत्र भवतामनुमानवादिनामपि वादाच्चेत्यलम्भूयसा ।

Colophon :

Author :

Remarks :

॥ शृङ्गारप्रकाशः ॥

No. 1196 B. ŚṚṄGĀRAPRAKĀSA.

C. O. L. No. 2380 B.

Substance—Paper. Size—$8\frac{1}{4}'' \times 6\frac{1}{2}''$. Pages—352. 16 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—2464.

Owner—Same as No. 1195.

Subject—Poetics.

Beginning:

सम्पत्तिनिमित्तत्वे यथा—

सरातं (?) सौख्यं स च हरिजनस्ते च दिवसा
स्मृतावाविर्भूतं त्वयि सुहृदि नष्टेऽद्य ... ... ...
गुणसम्पत्तिनिमित्तत्वं एव यथा—

चंदावलय दीहि अहमघह्लहिनियदेह अणजीदिहरलो अणहोतहो मुह अंदहो रेव ह ।

End:

उक्ताश्च तत्रैव पुनश्चतस्रः
शब्दार्थसंबन्धभिदाः क्रमेण ।
चतस्र एवाथ वचोविशेष-
निषेदुषस्ताः परिकीर्तयामः ॥

Colophon :

इति महाराजाधिराजश्रीभोजदेवविरचिते शृङ्गारप्रकाशे सापेक्षशब्दशक्तिप्रकाशनो नामाष्टमः प्रकाशः समाप्तः ।

Author—Śrī Bhojadeva.

Remarks—This is an eminent treatise on poetics. The opening portion is missing.

॥ ध्वन्यालोकलोचनव्याख्या ॥

No. 1197. DHVANYĀLOKALOCANAVYĀKHYĀ.

C. O. L. No. 181.

Substance—Paper. Size—13″ × 8″. Pages—35. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—950.

Owner—C. O.

Subject etc.—Same as No. 1389 B, DCSMMPL.

Author :

Remarks—This transcript contains one Uddyota only.

# ध्वन्यालोकलोचनव्याख्या (कौमुदी)

## No. 1198 A. DHVANYĀLOKALOCANA-VYĀKHYĀ (Kaumudī.)

C. O. L. No. 1832 A.

Substance—Palm leaf. Size—$12\frac{1}{2}''\times1\frac{1}{2}''$. Leaves—132. 9 lines per page and 62 letters per line. Script—Malayāḷam. No. of Granthas—600.

Owner—Kūḍallūr Brahmadattan Nampūdiri Avl.

Subject—The theory and principles of Dhvani.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

या सा व्यञ्जकभेदेन बहुधैका विभाव्यते ।
काव्यार्थसारभूतां तामाद्रिये संविदं पराम् ॥

विश्वाविर्भावविश्राणननिपुणनिजोन्मेषमन्तर्विचित्रान्
भेदानव्यक्तमाभासयदभिगमयद् व्यक्तभावं च भूयः ।
प्रत्यक्षार्थानुवेधप्रकटितमहिमस्पष्टमन्तस्समिन्धा-
मन्धभावं निरुन्धात् किमपि निरुपमं धाम सारस्वतं वः ॥

नवरसमयमन्यद् विश्वमन्यव्यपेक्षा-
विरहितमपरोक्षं शश्वदुन्मीलयन्ती ।
कविससहृदयसंसन्मानसाम्भोजहंसी-
विहरतु हृदि नित्यं वाङ्मयी देवता वः ॥

यत्प्रज्ञाशिल्पियत्नस्फुटघटितविवेकात्मसोपानपङ्क्ति-
प्राप्तोर्ध्वोर्ध्वाधिरोहास्थितमुपरि बुधा विद्यते वस्तुतत्त्वम् ।
वाग्देवी लास्यशिक्षाक्रमपरिकलना पूर्वरङ्गायमाणा-
नाद्यानाचार्यवर्याननुदिनमिह तान् भामहाद्यान् प्रपद्ये ॥

पूर्वैरसञ्चारितमुद्धृतकण्टकं सत्-
काव्यार्थवर्त्म यदुपज्ञमदःप्रवृत्तम् ।
आनन्दवर्धनमनुत्तममन्वितार्थ-
नामानमेनमहमन्वहमानतोऽस्मि ॥

ध्वनिसमयरहस्यवस्तुतत्त्व-
प्रथनपटिष्ठगरिष्ठवाक्प्रपञ्चान् ।
अभिमतसुरपादपान् गुरूंस्ता-
नभिनवगुप्तपदाभिधानुपासे ॥

विद्यास्वस्तरवे नमोऽस्तु गुरवे तस्मै कृपाम्भोधये
शिष्याज्ञाननिशान्धकारनिवहप्रध्वंसतिग्मांशवे ।
यत्कारुण्यकटाक्षपातकणिकानौकाश्रितैरश्रमात्
तीर्णोऽस्माभिरुदीर्णनीतिसलिलो ध्वन्यर्थतन्त्रार्णवः ॥

काव्यालोकार्थसंयोजितमभिनवगुप्ताह्वयाचार्यपादै-
रात्मीयं लोचनं यत् सुनिशितधिषणैरप्यनामृष्टसारम् ।
तत्सारोद्ग्राहिणीं सम्प्रति विवृतिमहं संविधातुं समीहे
विद्वांसस्तत्परास्तत्परगुणसुखिनस्सन्तु सन्तोषवन्तः ॥

ख्यातिं नेह प्रतिज्ञां जगति निगदितुं न प्रकृष्टां विदुष्टा-
मविष्कर्तुं निजां वा विवृतिविरचना प्रस्तुता वस्तुतो नः ।
तीर्थेनानेन काव्या[लो]तिसरसि मनाङ्मङ्क्तुकामोऽस्मि तस्मा-
न्मन्तुं मा मन्तुमन्तं ननु दधत मनो हन्त मा मा महान्तः ॥

आशंसिता रसिकलोकचकोरवृन्दै-
राविर्भवन्त्युदयतोऽमृतगोरुदारा ।
आचन्द्रतारकमियं नवकौमुदीव
प्रीतिं दधातु जगतां विवृतिर्मदीया ॥

अथ सकलमहाजनबहुमतमहिमा महामहेश्वरपरमेश्वरः परमेश्वर एव जगदनुग्रहकृतपरिग्रहविग्रहविशेषः श्रीमानभिनवगुप्ताचार्यः श्रीमदानन्दवर्धनाचार्यविरचितं काव्यालोकं व्याकृतमपि पूर्वैरनु-न्मीलिताकूतसारसर्वस्वमत एवाव्याकृतकल्पं मन्वानस्सन्नुपसन्न-जनोपचिकीर्षया स्वयं व्याचिकीर्षुश्चिकीर्षितप्रबन्धकीर्तिप्रतिष्ठा-त्मकप्रयोजनप्रसावकतया समासादितसमग्रपुरुषार्थसाधनमविच्छि-न्नार्यजनाचारपारम्पर्यागतमाधिक्रियमाणाभिमतदेवतासतत्त्वानुस्मर-णस्तुतिनमस्कारलक्षणं मङ्गलमादितोऽनुसन्दधानः श्रोतॄणामपि तत्कर्तव्यतानियमावबोधार्थं ग्रन्थे निवेशयति—अपूर्वं यद्वस्त्विति ।

एवमुद्योतान्ते तत्प्रतिपाद्यार्थसंक्षे ... .... श्रोतृव्याख्यातृ-सुखग्रहार्थं मङ्गलाचारात्मकामिवा।स्मिन् पद्ये लाघविकतया ग्रन्थका-रेण मनागुन्मीलित इति सकलमतिमङ्गलम् ।

यत्पादाब्जकुटुम्बिनी परिणता भक्तिद्रुमद्वल्लरी
हस्तादेयमिव प्रसौति चतुरं पूर्णान् पुमर्थान् फलम् ।
अध्यासीनमधस्थलीं वटतरोर्मध्ये महायोगिना-
मुद्धूतानतमोहमस्तु सततं तद्धाम हृद्धाम नः ॥

Colophon :

इत्थं मोहतमोनिमीलितदृशां ध्वन्यर्थमार्गे यतां
व्याख्याभासमहोष्मसञ्चरजुषां प्रेक्षावतां प्रीतये ।
उत्तुङ्गादुदयात् क्षमाभृत उदेयुष्यामसुष्यामयं
कौमुद्यामिह लोचनस्य विवृतावुद्योत आद्यो गतः ॥

श्रीगुरवे शरणम् । शुभमस्तु ।

Author :

Remarks—The commentary on the first Uddyota alone is found herein.

---

## ॥ ब्रह्मसूत्रशाङ्करभाष्यव्याख्या ॥

## No. 1198 B. BRAHMASŪTRAŚAṄKARA-BHĀṢYAVYĀKHYĀ.

C. O. L. No. 1832 B.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—10. 6—8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—150. Incomplete.

Owner—Same as No. 1198 A.

Subject—Advaita philosophy.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीगुरुभ्यो नमः ।

अथ ब्रह्मसूत्राणि व्याख्यातुकामो भगवान् भाष्यकारः सूत्रकारेण विचारकर्तव्यतारूपश्रौतार्थान्यथानुपपत्त्या अर्थात् सूत्रितविषयप्रयोजनवत्वस्योपोद्घातत्वात् तत्सिद्धिहेत्वध्यासमाक्षेपसमाधानाभ्यां प्रथमं वर्णयति—युष्मदस्मत्प्रत्ययगोचरयोरिति । अत्र च युष्मादित्यादिर्मिथ्याभवितुं युक्तमित्याशङ्का ग्रन्थः । तथापीत्यादिः परिहारग्रन्थः ।

End :

कल्पनाम्भः स(म?मा)नताम् आचक्षते रजतादिकं दोषवशात् अत्यन्तलाघवात् । अन्यथा रूपस्मरणं तत्प्रमोषः तन्निमित्ताविवेकश्चेति गरीयसी कल्पना स्यात्, नेदं रजतमिति प्रतिपन्नस्यासत्त्वसंवेदनादिति । एतेषु मतेषु परत्र परावभासत्वलक्षणविसंवादमाह—सर्वथापित्विति ।

Colophon :

Author :

Remarks—This work is entirely devoted to the explanation of the first syllable of the first aphorism.

## ॥ नञ्जराजयशोभूषणम् ॥

### No. 1199. NAÑJARĀJAYAŚOBHŪṢAṆAM.

C. O. L. No. 2438.

Substance—Palm leaf. Size—14″ × 2½″. Leaves—142. 10—11 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—3725.

Owner—Rāmalingom Śāstrigaḷ Gaṇapati Iyer Avl., Mahādānapuram.

Subject—The principles of poetics.

Beginning etc.—Same as No. 1377, DCSMMPL.

Author—Narasimhakavi.

Remarks—The work has been published. For further information refer to page 2351, DCSMMPL.

---

## ॥ बालरामवर्मयशोभूषणम् ॥

### No. 1200. BĀLARĀMAVARMA-YAŚOBHŪṢAṆAM.

C. O. L. No. 946.

Substance—Paper. Size—12½″ × 8½″. Pages—78. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—875. Incomplete.

Owner—C. O.

Subject—The definition Kāvyas, Nāṭakas etc.

Beginning—Same as No. 1379, DCSMMPL.

End :

बोधिका—भो महाराअ अदिधीरो वि किं कादरो विअ दीसइ ।
(संस्कृतमाश्रित्य)एवं खलु लोकरीतिः ।

जन्मान्तरीयसुकृतातिशयानुरूप-
दैवप्रसक्तिविषयो धृतिमान्य एव ।
कात्स्न्र्येन साहसशतैः परिहृत्य विघ्नान्
प्रारब्धकार्यफलभाग्भविता पुमान् सः ॥

Colophon :
इति शुद्धविष्कम्भः ।

इति श्रीसदाशिवदीक्षितकृतौ श्रीपद्मनाभदासवञ्चिबालरामवर्म-कुलशेखरमहाराजयशोभूषणेऽलङ्कारशास्त्रे काव्यप्रकरणं समाप्तम् ।

Author—Sadāśivadīkṣita.

Remarks—The Ms. contains the Kāvyaprakaraṇa and a portion of the Nāṭakaprakaraṇa. For further information refer to page 2356, DCSM MPL.

---

## ॥ भावप्रकाशनम् ॥

No. 1201. BHĀVAPRAKĀŚANAM.

C. O. L. No. 636.

Substance—Paper. Size—11″ × 9″. Pages—284.

20—22 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—300. Complete

Owner—C. O.

Subject—The divisions etc. of the Bhāvas.

Beginning:

॥ श्रीः ॥

भावप्रकाशनम् । श्रीशारदातनयविरचितम् ।

प्रश्च्योतन्मदमन्थरभ्रमरिकाशृङ्गारगीतं मुहु-
र्हेलाबृंहितवादनव्यतिकरं भावोल्लसत्प्रक्रियम् ।
नृत्यन्नस्तु सुखाय वः करिमुखः पुण्योपहारैश्चिरा-
दानन्दी नटभावितैरिव यथा भावैः स सामाजिकः ॥

वन्दे वृन्दावनचरं गोविन्दं गोपिकापतिम् ।
गां पालयन्तं गायन्तं वेणुना षड्जवादिना ॥

× × × × ×

आर्यावर्ताह्वये देशे स्फीतो जनपदो महान् ।
मेरूत्तर इति ख्यातस्तस्य दक्षिणभागतः ॥

ग्रामो माठरपूजाख्यो द्विजसाहस्रसम्मितः ।
तत्र लक्ष्मणनामासीत् विप्रः काश्यपवंशजः ।

त्रिंशता क्रतुभिर्विष्णुं तोषयामास वेदवित् ।
वेदानां भाष्यतामकेर नाम्ना यो वेदभूषणम् ॥

तस्य श्रीकण्ठनामासीत् पुत्रः कृष्ण इवापरः ।
वेदानधीत्य निखिलान् शास्त्राण्यप्यखिलानि च ॥

स पुत्रार्थं महादेवं वाराणस्यामतोषयत् ।
तस्यासीत् भट्टगोपालो नाम्ना सूनुः सुलोचनः ॥

अष्टादशसु विद्यासु बहुशः सुकृतश्रमः ।
उपास्य शारदां देवीं पुत्रं लेभे गुणोत्तरम् ॥

तमाह्वयत् पिता प्रीतः शारदातनयाख्यया ।
+ + + + + ॥

शारदातनयो देव्यास्तान्यधीत्य च सन्निधौ ।
आदाय सारमेतेभ्यो हितार्थं नाट्यवेदिनाम् ॥

भावप्रकाशनं नाम प्रबन्धमकरोत् तदा ।
एतस्मिन् प्रथमं भावस्तस्य भेदास्ततःपरम् ॥

तदवान्तरभेदाश्च तत्तत्कार्येषु कौशलम् ।

End :

इत्थमुक्तक्रमोपेतं नाट्यं सर्वरसाश्रयम् ॥

प्रेक्षकस्य प्रयोक्तुश्च कवेः स्या... .... ... ।
ग्रन्थेऽस्मिन्नविभिन्नोऽपि योऽर्थो बहुश ईरितः ॥

न तस्य पुनरुक्तित्वमार्थितान्त(?)समर्थनात् ।
सन्ति चैकशतं शिष्या भरतस्य महामुनेः ॥

तेषां गुरुरभिन्नोऽपि भिन्नवत् प्रतिभाति यः ।

Colophon :

इति शारदातनयविरचिते भावप्रकाशने दशमोऽधिकारः ।
समाप्तमिदं भावप्रकाशनम् ।

Author—Śāradātanaya.

Remarks—The author belonged to the village of Mādhavapūja. He was born to Bhaṭṭagopāla by the blessings of Śarada and hence he was named Śaradātanaya. He wrote the work under Her merciful guidance.

---

## ॥ रसविवेकः ॥

## No. 1202. RASAVIVEKA.

C. O. L. No. 1764.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—68. 8 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—1050.

Owner — Śakti Kocci Śakti Avl., of Vaikkattillam Tiruvalla.

Subject—The realisation of the aesthetic enjoyment.

Beginning :

हरिः ओम् । शुभमस्तु ।

जयत्यप्राकृतं ज्योतिर्दूरं वाक्चेतसोरपि ।
विवृत्तिं यस्य मन्यन्ते बुधाः शब्दस्वरूपिणीम् ॥

इदमस्तु नमस्तस्मै दक्षिणामूर्त्तिसूरये ।
यत्पादपद्मरजसा जग...  ...परोरजः ॥

जयति रसाख्यं तत्त्वं सुहृदां स्वानन्दसंविदावेद्यम् ।
यदुदाहरन्त...  ...या ब्रह्मास्वादस्य नेदिष्ठम् ।

जयति स भावो योऽसौ समस्तसाधार...  ....यैस्तैः ।
श्रोतृप्रेक्षकवर्गं नायकवद्रसमयं प्रकुरुते ॥

ये...  ...काप्यति जनः कारकसिद्धोऽप्यकार्यभूतश्च ।
सविकल्पोऽप्यविकल्पः सरसः...  ...यते कविना ॥

स्वानन्दसंविद्रूपस्य पुलकाङ्कुरसाक्षिणः :
विरल...  ...रो रसस्य ब्रह्मणो यथा ॥

End :

...  ...भूयोऽपि दृश्येत सा
दोषाणामुपशान्तये...  ....तमहो के...  ... ।
किं वक्ष्यन्त्यपकल्मषाः सुकृतिनः स्वप्नेऽपि सा दुर्लभा
(चेतः) स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं पास्यति ॥

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानाम् । त एते रसादयो ध्वनौ प्राधान्यादलङ्कार्या एव । गुणीभूतव्यङ्ग्ये तु रसाद्यङ्गतया रसवदलङ्कारा अपि । आरसाद्यङ्गत्वं यथा—

स्मरसि स्मर मेखलागुणै-
रुत गोत्रस्खलितेषु बन्धनम् ।

च्युतकेसरभूषित... .... ...

... ... ... ...

Colophon:

इति रसविवेकनाम्नि काव्यादर्शे रसस्वरूपनिर्णयो नाम प्रथम उल्लासः ।

Author:

Remarks—The Ms. is much injured. One end of the codex has been damaged.

---

॥ रसविवेकः ॥

No. 1203. RASAVIVEKA.

C. O. L. No. 377.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—94. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1050. Incomplete.

Owner—C. O.

Subject etc.—Same as No. 1202.

Author:

Remarks—This seems to be a copy of Ms. No. 1202.

॥ रसार्णवसुधाकरम् ॥

No. 1204. RASĀRṆAVASUDHĀKARAM.

C. O. L. No. 2435.

Substance—Palm leaf. Size—11″ × $1\frac{1}{2}$″. Leaves—170. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—3450.

Owner—Parameśvaran Nampūdiri Avl. of Iḍappaḷḷy Mana, Alwaye.

Subject—Rules of poetics with illustrations.

Author—Siṅgabhūpāla.

Remarks—This work has been published as No. 50 in TSS. This Ms. was made use of in its preparation for the Press.

---

॥ वामनालङ्कारसूत्रवृत्तिः ॥

No. 1205. VĀMANĀLAṄKĀRASŪTRAVṚTTI.

C. O. L. No. 316.

Substance—Paper. Size—$13\frac{1}{2}$″ × $7\frac{1}{2}$″. Pages—117.

13—15 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—80.

Owner—C. O.

Subject—The merits and demerits of Kāvyas.

Beginning :

शरीरं नाम प्रथममधिकरणम् ।

प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ।
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते ॥

काव्यं ग्राह्यमलङ्कारात् ।

या शास्त्ररूपेण विचित्ररूपैरनुष्ठिता विश्वमिदं विचित्रम् ।
आद्यन्तहीना खलु निर्मिमीते सरस्वती तां प्रणमामि देवीम् ॥

वेदिता सर्वशास्त्राणां भट्टोऽभून्मुकुलाभिधः ।
लब्ध्वा कुतश्चिदादर्शं भ्रष्टाम्नायं समुद्धृतम् ॥

काव्यालङ्कारशास्त्रं यत् तेनैतद्वामनोदितम् ।
असूया तत्र कर्तव्या विशेषालोकिभिः क्वचित् ॥

आकर्ण्य भवस्तसाद्दयितस्य विधीयते(?) ।
विवृ(त्ति?तिः) सहदेवेन वामनीयस्य सम्प्रति ॥

End :

'एति संज्ञायामगात्' इति तु गणसूत्रम्; अवन्तिसेनादीनां संज्ञारूपत्वे गणसूत्रस्य व्यापारस्तदभावे सूत्रस्येत्यभिप्रायः, आहि-

तत्वस्येति—आहितत्वमारोपितत्वं, यथा इक्षुवाहणं शरवाहणमित्यत्र, अत्र हि इक्षवो यत्रारोप्यन्ते, शराश्चैतदेवमुच्यते, इति सिद्धम् ।

इत्यष्टमाध्याये शब्दपरिशुद्धिः ।

Colophon :

चतुर्दशानामपि यः प्रसिद्धो
विद्यास्थितीनां परपारदृश्वा ।
शशाङ्कपूर्वं धर इत्युदारं
यन्नाम लोके नितरां प्रसिद्धम् ॥

तदीयशिष्यः सहदेवनामा
कुले प्रसूतः खलु तोमराणाम् ।
व्याख्यामिमां काव्यविचारशास्त्रे
व्यधत्त लघ्वीमिह वामनीये ॥

काश्मीरदेशादपसर्पतो मे
शब्दानुशुद्धिं त्रिमुनिं निशम्य ।
अवाप्तसिद्धेर्वरुणात्मजस्य
प्रयोजकोऽभूदिह पद्मनाभः ॥

इति वामनीयालङ्कारटिप्पणकं समाप्तम् ।

Author—Text : Vāmana.
Com : Sahadeva.

Remarks—This has been transcribed from a Bālabindu transcript borrowed from the Baroda Central Library. The author belonged to the Tomara family and was a disciple of Śaśāṅkadhara. The Ms. is a very rare one.

## ॥ व्यक्तिविवेकः ॥

## No. 1206 A. VYAKTIVIVEKA.

C. O. L. No. 1685 A.

Substance—Palm leaf. Size—15″ × 2″. Leaves—96. 9—11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—2880. Complete.

Owner—K. R. Keśava Piṣārodi Avl., Kailāsapuram, Kaḍuthurutti, Vykom.

Subject—Discussion on the theory that Dhvani is included in inference.

Author:

Remarks—This has been published as No. 5 in TSS. The name of the scribe is furnished at the close.

## ॥ व्यक्तिविवेकव्याख्या ॥

## No. 1206 B. VYAKTIVIVEKAVYĀKHYĀ.

C. O. L. No. 1685 B.

Substance—Palm leaf. Size—15″ × 2″. Leaves—65. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1750.

Owner—Same as No. 1206 A.

Subject—A commentary on the Vyaktiviveka.

Author :

Remarks—This contains only Vimarśa I and a portion of the next.

---

## ॥ व्यक्तिविवेकः ॥

## No. 1207. VYAKTIVIVEKA.

C. O. L. No. 2323.

Substance—Palm leaf. Size—9¾″ × 1½″. Leaves—143. 8—9 lines per page and 42—46 letters per line. Script—Malayāḷam. No. of Granthas—3250.

Owner—Agniśarman Bhaṭṭatiri Avl., Kuzhikkāḍ, Tiruvalla.

Subject—Establishment of the theory that Dhvani is included in inference.

Author—Mahimabhaṭṭa.

Remarks — The leaves are disarranged in the codex. This Ms. was also used in the publication of the work. The numbers are repeated on some FF.

---

॥ व्यक्तिविवेकः

No. 1208. VYAKTIVIVEKA.

C. O. L. No. 2356.

Substance—Palm leaf. Size—$13\frac{3}{4}'' \times 1\frac{1}{2}''$. Leaves—127. 6 lines per page and 62—68 letters per line. Script—Malayāḷam. No. of Granthas—3250.

Owner—Tuppan Tuppan Nampūdiri, Punnorkoṭṭu Mana, Kumārapuram.

Subject etc.—Same as No. 1207.

Remarks—The Ms. is much damaged. The leaves are disarranged.

---

॥ श्रीरामभूषणव्याख्या

No. 1209. ŚRĪRĀMABHŪṢAṆAVYĀKHYĀ.

C. O. L. No. 2243.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 2''$. Leaves—67. 9—12 lines per page and 40—44 letters per line. Script—Malayāḷam. No. of Granthas—1750.

Owner—Maniar Kṛṣṇa Bhaṭṭatiri Avl., Budhanur, Congannūr.

Subject—A commentary on the Śrīrāmabhūṣaṇa, a work on poetics.

Beginning:

श्रीरामाङ्कितमलङ्कारप्रबन्धं चिकीर्षुः कविस्तस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवतास्मरणलक्षणं मङ्गलं मुखतस्सम्पादयन्नाह—

आनन्दसत्यघनचिद्वपुषं स्फुरन्तं
स्रष्टारमाद्यममलं परिपूर्णमेकम् ।
जन्मादिहेतुमनिशं जगतः स्वशक्त्या
रामाख्यमच्युतममुं शरणं प्रपद्ये ॥

अमुं नित्यापरोक्षात्मस्वरूपं रामाख्यमच्युतं शरणं प्रपद्ये—

End:

वाचकशब्दस्य प्रतिपादकमात्रपरतया व्यञ्जकसाधारण्यादनयोर्द्वयोरेकवाचकानुप्रवेशसङ्करयोः समप्राधान्यः सङ्करः । नह्यनयोः

परस्परमन्यत्र वाङ्गत्वमस्ति एवमत्र श्लोके चतुर्णामपि सङ्कराणां यथायोग्यं सङ्करः । एवमन्यत्रापि सम्भावितस्थले द्रष्टव्यः—

Colophon :

इत्थं चिदम्बरपतेः कृ(ताऽतौ) श्रीरामभूषणे ।
दर्शितान्यर्थचित्राणि शतं पञ्चदशाधिकम् ॥

श्रीरामभूषणमिदं सुधियो विलोक्य
दोषं विधूय गुणवृन्दयुतं क्रियासुः ।
हारेऽपि मौक्तिकमसाधु निरस्य तज्ज्ञाः
रत्नानि सुन्दरतराणि हि योजयन्ति ॥

श्रीरामाय नमः ।

Author—Cidambareśa.

Remarks—The Ms. is in good condition.

## ॥ श्रीरामभूषणव्याख्या ॥

No. 1210. ŚRĪRĀMABHŪṢAṆAVYĀKHYĀ.

C. O. L. No. 992.

Substance—Paper. Size—12" × 9". Pages—175. 20 lines per page and 16 letters per line. Script—Devanagarī. No. of Granthas—1750.

Owner—C. O.

Subject etc.—Same as No. 1209.

Author :

Remarks :

---

## ॥ सरस्वतीकण्ठाभरणव्याख्या ॥

## No. 1211. SARASVATĪKAṆṬHĀBHARAṆA-VYĀKHYĀ.

C. O. L. No. 1086.

Substance—Palm leaf. Size—19½"×1½". Leaves—73. 7—9 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—3000. Incomplete.

Owner—Rāja of Cirakkal.

Subject — A commentary on the Sarasvatīkaṇṭhābharaṇa.

Beginning :

हरिः । श्रीगणपतये नमः ।

हरेरम्बुरुहोद्धूतं कीर्णं केसररेणुभिः ।
भुवनोत्पत्तिकेदारं तं वन्दे नाभिपल्वलम् ॥

भोजक्षितिपतिरचितं कण्ठाभरणं महत् सरस्वत्याः ।
(यावदभियोगबोधं व्या)चष्टे भट्टनरसिंहः ॥

आरिप्सितस्य ग्रन्थस्याविघ्नपरिसमा(प्त्य? प्त्यै)कृतमभिमताम्यु ... .... ...ध्वनिरनक्षरः शब्दः। अक्षरात्मको वर्णः। वाचकत्वशक्त्युपहितो वर्णाकारः पदम्।

End :

अथ कागअ? अतर्किताागतदृष्टेवधूजातामरिगुरुपुरतः खिद्यते विगलितेभ्यो विषविदलभ्यो? वलयेभ्यः रणेति रमित्वा पदं विगतो यदोपगूहितुं प्रतिनिवृत्तः अहं प्रोक्षितपतिकौ? तत्क्षणं समवासी वहोत वहिअं स स भविष्यत् पथिकस्य जाया आप्रश्नजीवितधारणा... ... ... ...

Colophon :

इति भट्टसिंहविरचितायां सरस्वतीकण्ठाभरणव्याख्यायां चतुर्थः परिच्छेदः।

Author—Bhaṭṭasimha.

Remarks — The author's name is seen as both Bhaṭṭasimha and Bhaṭṭanarasimha. The Ms. abounds in scribal errors. The commentary extends to a portion of the 5th pariccheda.

---

## ॥ सरस्वतिकण्ठाभरणव्याख्या ॥

### No. 1212. SARASVATĪKAṆṬHĀBHARAṆAVYĀKHYĀ.

C. O. L. No. 291.

Substance—Paper. Size—13¾″ × 8¾″. Pages—155.

20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1750.

Owner—C. O.

Subject etc.—Same as No. 1211.

End :

बाला व्याकुलापक्रमणा श्लथनिवमना ग्रहणं श्रुत्वा विनिष्क्रामन्ती निद्रया विह्वलिता राहुरपि तस्या मुखं पश्यति पुनः पश्यति गगनं श्रान्तो लगितुं न जा... ...

Colophon :

इति भट्टनरसिंहविरचितायां सरस्वतीकण्ठाभरणव्याख्यायां तृतीयः परिच्छेदः ।

Author—Bhaṭṭasimha.

Remarks—The first three Paricchedas and a portion of the 4th are comprised herein.

## ॥ साहित्यमीमांसा ॥

### No. 1213 A. SĀHITYAMĪMĀMSĀ.

C. O. L. No. 619 A.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—69. 8—10 lines per page and 64—70 letters per line. Script—Malayāḷam. No. of Granthas—2600, Complete.

Owner—Rāja of Tekkumkūr, Naṭṭāśśeri, Ettumānūr.

Subject — The characteristics, divisions etc. of Kāvyas.

Author :

Remarks—This has been published as No. 114 in TSS.

---

## ॥ काणादसिद्धान्तचन्द्रिकाव्याख्या ॥

## No. 1213 B. KĀṆĀDASIDDHĀNTACANDRIKĀ-VYĀKHYĀ.

C. O. L. No. 619 B.

Substance—Palm leaf. Size—10″ × 2″. Leaves—46. 11—12 lines per page and 40 letters per line. Script— Malayāḷam. No. of Granthas—1350. Incomplete.

Owner—Same as No. 1213 A.

Subject—A commentary on the Kāṇādasiddhāntacandrikā.

Beginning :

हरिः । श्री... ... ...

... ... .... .... ...सन्नः

चिन्मुद्रया कलितपाणिरसौ स देवो

गेही... ... ... ...

... ...द्वी कल्पवृक्षाः कटाक्षे ॥

शम्भुश्चव्याचक्षते चित्तवृत्ति येषां युक्तं

.... ... ... ... रसुधीमणिः ।

सिद्धान्तचन्द्रिकाव्याख्यां तनोति विदुषां मुदे ॥

प्रा... ... ....समाप्तये कृतमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षा.... .... .... .... ....तं प्रतिजानीते नत्वेत्यादिना—

End :

घटत्वादिश्च न द्रव्यविभाजक इति विशेषणेनोक्तदोषनिरासः । नचैवमपि गन्धत्वाश्रयसामानाधिकर.... .... .... .... लत्वोभयाभावादिसमानाधिकरणगन्धादिवृत्तितया उक्तदोषानति...

Colophon :

Author—Gaṅgādhara.

Remarks—The Ms. is old and damaged. It extends to the beginning of Guṇanirūpaṇa. The original text has been published as No. 25 in TSS.

## ॥ वासवीशान्तनवम् ॥

## No. 1213 C. VĀSAVĪŚĀNTANAVAM.

C. O. L. No. 619 C.

Substance—Palm leaf. Size—11″ × 2″. Leaves—18. 11 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas — 500. Complete.

Owner—Same as No 1213 A.

Subject—A drama with love as the dominating sentiment.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

सूत्र—

कृष्णो वः परिपातु सूतवृषभः सभ्यान् समभ्यागतान्
यस्तूत्प्लुत्य च वासवीहितकरो रोषातिमग्नो रथान् ।
हन्तुं शान्तनवं किलेव कलया शार्दूलविक्रीडितं
क्षोणीं कम्पयति स्मितेन नमितो भक्त्या विमुक्तात्मना ॥

अलं विस्तरेण । परिक्रम्य नेपथ्याभिमुखमवलोक्य भाव इत-स्तावद् आगम्यताम् । (प्रविश्य द्वितीयः)

द्वितीयः—मारिष अयमस्मि ।

सूत्र—आज्ञापितोऽस्मि सभ्यैर्यथा श्रीरामराजेन्द्रकुलशेखरगुरुकरुणापरिपूरितविद्येन भूभुजा शतभिषगुत्पन्नेन गोदवर्मणा विरचितं वासवीशान्तनवं नाम नूतं नाटकं केरलाश्रयपुराधीशस्य भगवतो देवयात्राकुतूहलेऽस्मिन्नभिनयैरलंकुर्विति ।

End :

रा—प्रिये पश्य

प्राभातिकीं गतवतीमपि रागपूर्णां
सन्ध्यां विहाय भगवानयमंशुमाली ।
पश्चादिमां कमलिनीं रसवासभूमिं
रक्तां कराग्रसु.... ....तामुपगुह्य भाति ॥

वा—सलज्जं तिष्ठति ।

रा—तत् त्वरयाहमाश्रमानुरूपं धर्मं चरामि ।

इति निष्क्रान्तौ । षष्ठोऽङ्कः ।

Colophon :

शुभमस्तु । भरतः ।

इति खलु वसुपुत्र्याः शन्तनोः प्राप्तिरूपां
पठं नटपडुलोकत्वं कथां चाभिनेतुम् ।
यदुदितरसमाध्वीं कल्पयात्मार्थसिद्ध्यै
रसिकजनगुरूणां प्राभृतं सज्जनानाम् ॥

Author—Godavarma.

Remarks :

---

## ॥ साहित्यमीमांसा ॥

## No. 1214. SĀHITYAMĪMĀMSĀ.

C. O. L. No. 968 B.

Substance—Paper. Size—$8\frac{3}{4}''$ × $6\frac{1}{2}''$. Pages—47. 16 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas — 375.

Owner—C. O.

Subject—Rhetoric.

Beginning :

निदानं जगतां वन्दे वस्तुनी वाच्यवाचके ।
ययोः साहित्यवैचित्र्यात् सतां रसविभूतयः ॥

साहित्यं सपरिष्कारं कविना परिकल्पितम् ।
भावयन् रसिको लोके सुखमत्यन्तमश्नुते ॥

वृत्त्यादीनां समष्टिः स्यात् साहित्यं तन्त्रनिष्कृतिः ।
शब्दार्थयोः परिष्कारः कविस्तस्य प्रसाधकः ॥

End :

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयो भूत् ।

भद्रा ह्येषां वाचि लक्ष्मीर्निषिक्ता
नैते वाचं विप्लुता धा(रये)युः ॥

इति । तदेवं काव्यार्थभावनया रसेन स्वनिरतिशयानन्दलाभस्य कविवचनेषु भद्राया लक्ष्मीनिधानस्य च श्रवणात् कविकाव्ययोर्महत्त्वं रसिकस्य च प्रयोजनं श्रुतिसिद्धमेवेति सर्वं समञ्जसम् ।

Colophon :

इति साहित्यमीमांसायामष्टमं प्रकरणम् ।

Author:

Remarks—This transcript contains only the text. This was got transcribed from the Sarasvatī-mahāl Library, Tanjore. The work has been printed.

---

## ॥ साहित्यसारः ॥

### No. 1215 A. SĀHITYASĀRA.

C. O. L. No. 103 A.

Substance — Paper. Size—11″ × 9″. Pages — 61. 20 lines per page and 16 letters per line. Script — Malayāḷam. No. of Granthas—600.

Owner—C. O.

Subject etc.—Same as No. 1402 A, DCSMMPL.

Author :

Remarks :

---

## ॥ भावविवेकोदयः ॥

No. 1215 B. BHĀVAVIVEKODAYA.

C. O. L. No. 103 B.

Substance — Paper. Size—11″ × 9″. Pages—12. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—120.

Owner—C. O.

Subject—The definition and enumeration of various Bhāvas.

Beginning :

प्रणम्य भावरसयोरनुकर्तारमीश्वरम् ।
विवेकः क्रियतेऽस्माभिः सात्त्विकांगिकयोस्तयोः ॥

जानन्नपि जनो भेदानेतयोरभिधानतः ।
स्फुटमन्तर्न जानाति तच्छिक्षार्थोऽयमुद्यमः ॥

बाह्यार्थालम्बनो यस्तु विकारो मानसो भवेत् ।
स भावः कथ्यते सद्भिः तस्योत्कर्षो रसः स्मृतः ॥

पुंसः पूर्वापरीभूता सुखित्वेन व्यवस्थितिः ।
बुद्धेरुन्मीलनी गाढं प्रीतित्वेन निगद्यते ॥

End :

सितपीतसमायोगात् पाण्डुवर्णः प्रकीर्तितः ।
पीतनीलसमायोगात् हरितो नाम जायते ॥

पीतरक्तसमायोगात् गौरवर्णः समुत्थितः ।
सितनीलसमायोगात् कडार इति संज्ञितः ॥

भावा इमे देवनृणां वपुस्था-
श्चित्ताश्रयाश्चात्मसमाश्रयाश्च ।
इमान् प्रयत्नेन विलोभनीयान्
जानीत सर्वे कवयः प्रवीणाः ॥

Colophon :

इति भावविवेकोद्देशः समाप्तः ।

Author :

Remarks :

## ॥ नाट्यवेदः (व्याख्योपेतः) ॥

No. 1216 A & B. NĀṬYAVEDA
with commentary.

C. O. L. No. 566.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{4}''$. Pages—530.
20 lines per page and 18 letters per line.
Script—Devanāgarī. No. of Granthas—6000.

Owner—C. O.

Subject—Histrionics.

Beginning :

मू— प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ॥

व्या— यस्तन्मयान् हृदयसंवदनक्रमेण
द्राक् चित्रशक्तिगणभूमिविभागभागी ।
हर्षोल्लसत्परविकारजुषः करोति
वन्देतमां तमहमिन्दुकलावतंसम् ॥

* * * * * *

सद्विप्रतीकवदनोदितनाट्यवेद-
तत्त्वार्थमर्थिजनवाञ्छितसिद्धिहेतोः ।
माहेश्वराभिनवगुप्तपदप्रतिष्ठः
संक्षिप्तवृत्ति विधिना विशदीकरोति ॥

* * * * * *

भरतमुनिरुचितदेवतानमस्कारपूर्वमभिधेयगुणीभावेन प्रयोजनं मुख्यया वृत्त्या प्रतिजानानो विशेषणद्वारेण गुरुपूर्वकमर्थाक्षिप्तत- या चाभिधेयप्रयोजनतत्संबन्धान् दर्शयति—

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ॥

पितामहोऽत्र न पितुः पिता, महेश्वरश्च न राजादिरिति देवशब्दः। एतच्च नाशङ्कनीयं प्रसिद्धेः । एको विजिगीषुर्नाट्यप्र(वृत्त?वर्त)यिते ति। देवो भगवांस्त्वानन्दानिर्भरतया क्रीडाशीलः सन्ध्यादौ नृत्यतीति।

End :

चक्रतटित्पताकया
मञ्जर्यः कर्णचूलिकाश्चैव ।
कुटिलगतयश्च सर्वे
निर्देश्याः साधुवादाश्च ॥

चक्रे ऊर्ध्वमुखं पार्श्वगतं पार्श्वान्तरं भ्रमन्ती कार्याधिक्यनिरुद्ध- मुखागतागतं एवमन्यत्रोत्प्रेक्ष्यं मञ्जर्यः लताः। कर्णचूलिका कर्णपूरः कुटिलगतयोऽमीनाद्याः। साधुवादा भद्रं शोभनमित्याद्याः । बाल- सर्वाणां पृथगुपादानं गतिवैलक्षण्य... ...मीनेभ्यः वल्ली लता- मञ्जरीणामवान्तरो भेद उत्प्रेक्ष्यः तद्यथा अलाबूप्रभृतयोप... ... द्राक्षादयो लताः भूतादीनां मञ्जर्यः शिखण्डः कुमारकाणां काक- पक्षः परिपतनं पातो वक्रं नक्रत्वं मण्डलं वर्तुलत्वम् ।

Colophon:

इति माहेश्वराभिनवगुप्तविरचितायां नाट्यशास्त्रविवृतौ रसाध्यायः षष्ठः ।

Author—Text: Bharatamuni.

Commentary—Abinavaguptācārya.

Remarks—Only the commentary on chapters 6 and 7 is available herein. 23 pages after the close contain the variants in the original Ms. of the Madras Oriental Library. It is published in Baroda. This transcript comprises two volumes.

---

॥ नाट्यवेदव्याख्या ॥

## No. 1216 C. NĀṬYAVEDAVYĀKHYĀ.

C. O. L. No. 566 C.

Substance—Paper. Size—13½" × 8½". Pages—232. 24 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—3330.

Owner—C. O.

Subject—Histrionics.

Beginning :

जातिविनियोगकल्पं
भूक्षणवैचित्र्यं विजनयति या ।
वन्देवतत(?)भेदकरीं
तां विद्यां शाङ्करीं शक्तिम् ॥

अस्य योनिर्भवेद्गानामिति गानसम्प्रदायेनास्य गान्धर्वलक्षणस्यार्थस्यागतत्वाज्जात्यात्मको गान्धर्वभाग उक्तः; तस्य भागे केनांशेनोपयोग इति अभिप्रायेणाध्यायान्ते पूर्वमुक्तम् । यथा यस्मिन् रसे योऽध्येति गान्धर्वशेषतैव चार्थस्य मा संभवीत्येतदर्थमध्यायच्छेदः तथा च वक्ष्यति—

'एवमेता बुधैर्ज्ञेया जातयो नाट्यसंश्रयाः ।

इति । अर्थं नाट्योपयोगिन्य इत्यर्थः, तत्र षड्जग्रामाश्रितांस्तावद्रसेषु विनियोक्तुमाह—षड्जोदीच्यवती धैवेति ।

End :

काव्यपातैर्वर्णयितुं कुताश्चिन्निमित्ताश्च शक्यन्ते । ते गीतवाद्यैरुदाहर्तुं कथयितुं शक्याः तर्हि नाटककाव्यवद्गीतकाव्ये सन्धितदङ्गनिर्वहणादिप्रयासंभवतः तैरेवेति राजादिवर्णनयानताङ्गमेपि तत्सदृशं सादिवर्णनेन(?)तैरेव तु कार्यार्थैरन्यैरौपम्यसंश्रयैरित्युक्तं । तत्र कस्य केनौपम्यमिति प्रस्तारयितुमाह—ध्रुवानामाश्रय इति । वर्णनीया इष्टतैवौपम्यं सादृश्यं तदेव गुणः प्रकृतोपयोगासंभवप्राप्तिरा-

चित्यं येषामित्यर्थः कस्य किमुचितमिति दर्शयति । आदित्यसोम-
पवना इत्यादि । अत्रापि प्रतापह्लादकत्वशैघ्र्याद्यवान्तरं राजेरन्येष्य?
एवं सर्वत्र ग्रहा जीवादश्च उक्तवृषगस्त्रिष्यादयः काला इति शास्य
गाहुः ?

Colophon :

इति श्रीमहामहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवृतौ
अभिनवभारत्यां ततातोद्यविधानमेकोनत्रिंशोऽध्यायः समाप्तः ।

Author—Abhinavaguptācārya.

Remarks—The commentary herein comprises chapters 29—30 and a portion of chapter 31.

---

## ॥ नाट्यवेदविवृतिः ॥

### No. 1217. NĀṬYAVEDAVIVṚTI.

C. O. L. No. 551 A & B.

Substance—Paper. Size—$13\frac{1}{2}'' \times 8\frac{1}{2}''$. Leaves—477. 16—20 lines per page and 10—20 letters per line. Script—Devanāgarī. No. of Granthas—4300.

Owner—C. O.

Subject—Histrionics.

Beginning :

वर्तुलत्वम् । समाहारे द्वन्द्वः । भूयो बहुतरमित्यास्मिन्नर्थे चायम-

भिनयः । ऊर्ध्वावलोकितत्वोक्तिः प्रयोगवृत्त्या वैचित्र्येण विभजनीया । तारा नक्षत्राणि घोणा नासिका, एकत्वं सङ्ख्या, दण्डः, परं प्रति तर्जनम् । यष्टिः लगुडः । पृथग्वा तत्क्षेत्रे, तर्जन्यूर्ध्वा । दंष्ट्रिष्ववकाराद् दंष्ट्रित्वेनाप्रसिद्धेष्वपि राक्षसादिष्वास्ये यो योगभागः शुक्ललक्षणस्तेन सम्बन्धानता सती तथेति तेन दंष्ट्राकारेण कार्या संमुखतला कार्येत्यर्थः ।

End :

तदुक्तं दत्तिलाचार्येण-"पदस्थस्वरसङ्घातस्तालेन सुमितमिति" । तेन पदताला यादृशा गान्धर्वेण तादृशा गानेन स्वरगत एव तूभयसाततोपयोगीति तात्पर्यम् । अवधानं योगरूपं तच्चात्र नोपयोगि.... ... .... ....पूर्वरङ्गे तत्र हि देवतापरितोषादेव सिद्धिः । तदेतदुक्तम्– "गीतज्ञो यदि योगेन नाप्नोति परमं पदम्" रुद्रस्यानुचरो भूत्वेति केचित् । तस्यार्थस्य.... .... ....

Colophon :

नृसिंहगुप्तापरनामधेयो विद्यावदातो मुखलाभिधानः ।
यं गेहविद्याभिरयूयुजत्स प्रयोगसिद्धिं कृतवान् महार्थाम् ॥

इति काश्मीरमहामहेश्वराचार्याभिनवगुप्ताचार्यविरचितायां नाट्यवेदवृत्तावभिनवभारत्यां सिद्ध्यध्यायस्सप्तविंशः ।

Author—Abhinavaguptācārya.

Remarks—This transcript lacks beginning and end. It commences on the middle of the 9th chapter and ends on that of the 28th.

## ॥ नाट्यवेदविवृतिः ॥

## No. 1218. NĀṬYAVEDAVIVṚTI.

C. O. L. No. 1854.

Substance—Palm leaf. Size—11″ × 2″. Leaves—128. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2580.

Owner—Kūḍallūr, Brahmadattan Nambūdiripāḍ,

Subject—Same as No. 1217.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

यस्तन्मयान् हृदयसंवदनक्रमेण
द्राक्चित्रशक्तिगणभूमिविभागभागी ।
हर्षोल्लसत्परविकारजुषः करोति
वन्देतमां तमहमिन्दुकलावतंसम् ॥

षड्विंशकात्मकजगद्गगनावभास-
संविन्मरीचिचयचुम्बितबिम्बशोभम् ।
षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन्
वन्दे शिवं श्रुतितदर्थविवेकधाम ॥

विश्वबीजप्ररोहार्थं मूलाधारतया स्थितम् ।
सर्त्तृशक्तिमयं वन्दे धरणीरूपमीश्वरम् ॥

तद्विप्रतोकवदनोदितनाट्यवेद-
तत्त्वार्थमर्थिजनवाञ्छितसिद्धिहेतोः ।
माहेश्वराभिनवगुप्तपदप्रतिष्ठः
संक्षिप्तवृत्तिविधिना विशदीकरोति ॥

उपादेयस्य संपाठस्तदन्यस्य प्रतीकनम् ।
स्फुटव्याख्याविरोधानां परिहारस्सुपूर्णता ॥

लक्ष्यानुसरणं श्लिष्टवक्तव्यांकविवेचनम ।
